

अथ सत्योपाख्यानं प्रारभ्यते ।

रामेश्वरानन्द श्रीवास्तव, श्रीप्रेमसोसाइटी अहमदाबाद, ७.

इस ग्रन्थका रजिस्टरी हक यन्त्राधिकारीने रक्खा है.

ता. २२ ११-१९६०

* श्री खेमराज श्रीकृष्णदास *
21 NOV 1961
मुम्बई, श्री वेंकटेश्वर

श्रीमतेरामानुजायनमः ॥ श्रीसरस्वत्यैनमः ॥ दशरथसुतरामंयोगिसेव्यांघ्रिपद्ममजमथसनकाद्यैःपूज्यमानंसदैव ॥ हृदिहृदिकृतवासं
नारदाद्यैश्चगीतंतमहमखिलदेवंसर्वकर्मानतोस्मि ॥ १ ॥ सूतंसर्वपुराणज्ञंसर्वशास्त्रार्थकोविदम् ॥ नमस्कृत्याब्रुवन्सर्वेऋषयःशौनकादयः
॥ २ ॥ ऋषयऊचुः ॥ भोभोसूतमहाबुद्धेसर्वशास्त्रविशारद ॥ श्रीरामस्यकथांपुण्यांकथयस्वप्रसादतः ॥ ३ ॥ सूतउवाच ॥ विप्रवर्याः
शृणुध्वंहिश्रीरामस्यकथांशुभाम् ॥ व्यासेनकथितांपूर्वंतामहंकथयामिवः ॥४॥ चित्रकूटंमहापुण्यंपर्वतानांहिसुंदरम् ॥ वाल्मीकिश्चमहाते
जान्यवसद्धर्मतत्परः ॥५॥ दर्शनार्थंमुनेस्तस्यमार्कंडेयोमहामुनिः ॥ आजगामचिरायुर्हिचित्रकूटालयंमुनिम् ॥६॥ तमागतंमुनिंदृष्ट्वावा
ल्मीकिश्चमहातपाः ॥ उत्थायपूजयामासभार्गवंभृगुवंशजम् ॥७॥ दिव्यासनेनिवेश्याथउवाचमुनिसत्तमम् ॥ कृपाकृतात्वयाविप्रतीर्थीकृतं
ममाश्रमम् ॥ ८ ॥ किमर्थमागतोसित्वंशीघ्रंकथयभार्गव ॥ सूतउवाच ॥ इत्येवंमुनिनापृष्टोमार्कंडेयोथबुद्धिमान् ॥ ९ ॥ उवाचप्रणतोवा
क्यंवाल्मीकिंचतपोधनम् ॥ मार्कंडेयउवाच ॥ प्राचेतसमहाभागश्रीरामस्यकथांशुभाम् ॥१०॥ कथयस्वमहाबुद्धेरामस्यपरमात्मनः ॥
वाल्मीकिरुवाच ॥ सर्वंजानासिरामस्यचरितंहिमहामुने ॥ ११ ॥ तथापिकथयिष्यामितवप्रीत्याहिसुव्रत ॥ रामोनारायणःसाक्षा
त्सर्वदेवैश्चप्रार्थितः ॥ १२ ॥ पृथ्व्यांभारावतारायजातोदशरथात्स्वयम् ॥ अंगणेरिंगमाणश्चभ्रातृभिःसहितोनघः ॥ १३ ॥ धूलिधूसर
सर्वांगोधातृभिःपरिरक्षितः ॥ शिरोरुहावृतमुखःपीतवेष्टनशोभितः ॥ १४ ॥ कञ्चुकेनावृतोरामोकुंडलाभ्यांविराजितः ॥ अंगदेचमहा
दिव्येवलयेरत्नभूषिते ॥ १५ ॥ नूपुरादीनिदिव्यानिसर्वांगेषुव्यधारयन् ॥ चकारक्रीडांरामोहिज्ञातीनांसुखमावहन् ॥ १६ ॥ एकदातु
गृहंराज्ञोवसिष्ठोभगवान्ऋषिः ॥ विवेशभवनंदिव्यंनानारत्नोपशोभितम् ॥१७॥ विभ्रत्पिङ्गजटाभारंमहायोगेश्वरोमुनिः ॥ तमायांतंमुनिं

दृष्ट्वाचेटिकाश्चसहस्रशः ॥१८॥ कौशल्यांचसमाजग्मुःसुमित्रांचतथापराः ॥ कैकेयींचतथासर्वाऊचुर्वाक्यंससंभ्रमम् ॥ देव्यःशृणुतभद्रंवः सांप्रतंप्रत्युपस्थितम् ॥ १९ ॥ यस्माद्ब्रूहात्समायातोगुरुःपद्मजसंभवः ॥ स्वंस्वंपुत्रंसमादायगम्यतांमुनिसन्निधौ ॥ २० ॥ वंदनीयो गुरुर्देव्योयस्मादज्ञाननाशनः ॥ इतिवाक्यंचताः श्रुत्वासर्वाहर्षसमन्विताः ॥ २१ ॥ कौशल्यापिकरेरामंप्रगृह्यकलनूपुरम् ॥ मंदंमदंचगच्छंतमिंद्रनीलमणिप्रभम् ॥ २२ ॥ कौशल्यापुत्रसहितामुनेःपादौनमामच ॥ पूजांसमर्पयाद्दिव्यांरामहस्तेनसुंदरी ॥ २३ ॥ वशिष्ठोपिमहातेजाराममूर्ध्निकरंदधत् ॥ चिरंजीवचिरंजीवचिरंजीवावदद्वशी ॥ २४ ॥ सिंहासनेसमासीनोराममंकेन्यवेशयत् ॥ तस्मिन्काले सुमित्रातुपुत्रावादायसुप्रभा ॥ २५ ॥ ववन्देचमुनेःपादौपुत्राभ्यांचशुचिस्मिता ॥ मंगलंमंगलंपुत्रौतयोर्मूर्ध्निकरंदधत् ॥ २६ ॥ उक्त्वाशिषंचधर्मात्मापार्श्वेबालौन्यवेशयत् ॥ अंतःपुरस्त्रियःसर्वामुनिंवीक्ष्यमुदंययुः ॥ २७ ॥ कैकेयिनाम्नीखलुकेकयस्यराज्ञस्तुपुत्री भरतस्यमाता ॥ दास्यापुनर्मंथरयाचयुक्तापुत्रेणहस्तांगुलिलंबिनाच ॥ २८ ॥ सखीभिरीताव्यजनादिग्राहिभिर्जगाममंदंमुनिसन्निधानम् ॥ सावादयंतीचरणारविंदंवस्त्रेणदेहंवसतीसलज्जम् ॥ २९ ॥ ववंदमूर्ध्नामुनिमास्थितंसातथास्वपुत्रंनमयत्करेण ॥ मुनिस्तु तस्योपरिहस्तमादधद्यशोलभस्वेतिवदन्सुभाषी ॥ ३० ॥ राजपत्नीश्चताद्दृष्ट्वामुनिर्वचनमब्रवीत् ॥ सदैवकुशलंदेव्योयुष्मासु श्रीमतीषुच ॥ ३१ ॥ पुत्राःक्रीडन्तुक्षेमेणराज्ञोधर्मेणरक्षिताः ॥ ३२ ॥ इतिश्रीवाल्मीकिमार्कंडेयसंवादेसत्योपाख्यानेप्रथमोऽध्यायः ॥ १ ॥

॥ कौशल्योवाच ॥

॥ सर्वदाकुशलंनाथत्वयितिष्ठतिरक्षके ॥ यथासूर्येदिविस्थेचनभयंतमसोभवेत् ॥ १ ॥ परंतुममसंदेहोवर्ततेहृदिसर्वदा ॥ कदाचिद्रामंपश्यामिस्वप्नेपरमभास्वरम् ॥ २ ॥ गरुडोपरिराजं

तंशंखचक्रधरंसुतम् ॥ सुमित्रोवाच ॥ ममापिशृणुविप्रर्षेस्वप्नेपश्यामिलक्ष्मणम् ॥ ३ ॥ सहस्रशिरसंनागंरजतस्येव
विग्रहम् ॥ शत्रुघ्नंचमहादिव्यंकोटिसूर्यसमप्रभम् ॥ ४ ॥ सुदर्शनाभंभूदेवसंशयंनुदमेविभो ॥ कैकेय्युवाच ॥ ॥
अहंपश्यामिभोविप्रभरतंशंखरूपिणम् ॥ ५ ॥ अन्याःसपत्न्यऊचुः ॥ अस्माभिर्दृश्यतेरामोदेवदेवोहरिःस्वयम् ॥ क्षितीशस्यतु
पत्नीनांवाक्यंश्रुत्वामहामुनिः ॥ ६ ॥ अंतर्गतमनाभूत्वाध्यानस्तिमितलोचनः ॥ रामोनारायणःसाक्षाद्भूभाररहणायच ॥ ७ ॥
रावणादीनिरक्षांसिकोटिशोनिहनिष्यति ॥ एतास्तत्त्वंनजानंतिरामस्यपरमात्मनः ॥ ८ ॥ मयाभ्योपिनवक्तव्यंरामस्याक्लिष्ट
कर्मणः ॥ तथाएतानजानंतिपरतत्त्वंमहात्मनः ॥ ९ ॥ विदितेपरतत्त्वेचपुत्रभावोगमिष्यति ॥ पुत्रभावेगतेनूनंपुत्रभावसुखं
नहि ॥ १० ॥ इतिध्यात्वामुनिस्तूर्णंप्रहसन्नाहसुंदरीम् ॥ वसिष्ठउवाच ॥ एतेपुत्रामहात्मानोनारायणसमागुणैः ॥ ११ ॥
तस्मात्स्वप्नेहिदृश्यंतेविष्णुपार्षदरूपिणः ॥ राजपत्न्यऊचुः ॥ वेतालभूतप्रेताश्चडाकिन्यःकिलहेगुरो ॥ १२ ॥ मारिकाराक्षसाब्रह्मन्
नवाधंतेतथाकुरु ॥ अजिरेक्रीडमानेषुदृष्टिदोषोनकस्याचित् ॥ १३ ॥ रक्षाचाक्रियतांस्वामिन्सर्वोपद्रवघातिनी ॥ इक्ष्वाकु
वंशस्यगुरुस्त्वमेवत्वमेवपूज्योरघुभिःसदैव ॥ १४ ॥ तस्मात्त्वयापाल्यतमाश्वसर्वेतवैवभृत्यावयमेवसर्वे ॥ तासांविज्ञापितं
श्रुत्वामुनिश्चसस्मिताननः ॥ १५ ॥ वसिष्ठउवाच ॥ समीचीनंवचोदेव्योयुष्माभिःसमुदाहृतम् ॥ बालकानांचरक्षा
र्थमागमिष्यामिनित्यशः ॥ १६ ॥ जगामाथमहातेजाःपूर्ववृत्तांविचारयन् ॥ एषामर्थेमयापूर्वंपौरोहित्यंचस्वी
कृतम् ॥ १७ ॥ धन्याएताहिरामस्यमातरःपुण्यमूर्त्तयः ॥ धन्योराजादशरथोधन्यायोध्यामहापुरी ॥ १८ ॥ धन्यो

हंगुरुरेतेषांतस्मान्मह्यंनमोनमः ॥ इतिध्यायन्महातेजाःपूज्यमानोनृभिःपथि ॥ १९ ॥ विवेशभवनंदिव्यंस्वकुंडोपरिराजितम् ॥
शिष्यैःपरिवृतंरम्यंतथासाद्धिर्निषेवितम् ॥ २० ॥ एवंवासिष्ठोनित्यंहिरामदर्शनलालसः ॥ चकारदर्शनंहृष्टोरक्षाव्याजेननित्यदा ॥ २१ ॥
सूतउवाच ॥ इतिश्रुत्वामुनेःपादावभिवंद्यमृकंडजः ॥ वाल्मीकिंसमुवाचेदंगिरागद्गदयामुनिः ॥ २२ ॥ मार्कंडेयउवाच ॥ भग
वंस्त्वत्प्रसादेनरामतत्वंमयाश्रुतम् ॥ इदानीङ्गतसंदेहोजातोहंमुनिपुंगव ॥ २३ ॥ सूतउवाच ॥ परिक्रम्यमुनिंप्रीतोह्ययोध्यांविवि
शेमुदा ॥ रामचंद्रंचदृष्ट्वाथनत्वास्वाश्रममीयिवान् ॥ २४ ॥ पुष्यभद्रातटेरम्यंनानामुनिगणैर्वृतम् ॥ वसंतियत्रसत्वानिनिर्वैराणि
निसर्गतः ॥२५॥ यत्राश्रमेभूत्किलकामदेवःस्त्रीभिश्चसार्द्धंविफलप्रयासः ॥ मृदंगनादैर्युवतीकटाक्षैर्नक्षोभयामासमुनेश्चमानसम् ॥ २६ ॥
श्रीरामचंद्रस्यपदारविंदंलक्ष्मीकराभ्यांपरिशीलितंच ॥ ध्यायन्स्वचित्तेरमतेसदैवमुनिश्चिरायुर्वतहेद्विजाग्र्य ॥ २७ ॥ ॥
इतिश्रीवाल्मीकिमार्कंडेयसंवादेसत्योपाख्यानेद्वितीयोऽध्यायः ॥ २ ॥ ॥ शौनकउवाच ॥ ॥ अन्यत्कथयरामस्यचरि
तंपरमाद्भुतम् ॥ एकैकमक्षरंनृणां पापपर्वतदारुणम् ॥ १ ॥ मानुषंजन्मसंप्राप्यरामंनभजतेहियः ॥ वंचितःकर्मणापापइतिजानीहिबु
द्धिमन् ॥ २ ॥ सूतउवाच ॥ रामचंद्रपदद्वंद्वमकरंदस्यषट्पदम् ॥ चरितंशृणुभूदेवकथ्यमानंमयामहत् ॥ ३ ॥ एकदारामचंद्रस्तुमा
तुरंकेमनोहरः ॥ चकारक्रीडांबलवान्परमात्मानराकृतिः ॥ ४ ॥ तस्मिन्कालेचरामंचकौसल्यामाजगामवै ॥ नाम्नाधन्येतिविख्याता
धात्रीपरमसुंदरी ॥ ५ ॥ बिभ्रतीनासिकायांचमुक्तांचमणिसंयुताम् ॥ कर्णयोःकुंडलेदिव्येललाटेचमहामणिम् ॥ ६ ॥ अलकान्बिभ्रती
रम्यान्द्विरेफलोभकारकान् ॥ दंतैश्छविंचमुष्णंतीदाडिमस्यमनोहराम् ॥ ७ ॥ नेत्राभ्यांशतपत्रस्यबिभ्रतीभावमुत्तमम् ॥ कंठेहारंचबि

भ्राणास्तनयोर्मध्यलंबिताम् ॥८॥ वसानाकंचुकींरक्तांस्वर्णबिंदुविराजिताम् ॥ अंगदाभ्यांचराजंतींवलयैश्चप्रकोष्ठगैः॥९॥अंशुकस्योपरि
न्यस्तांवादयंतीचमेखलाम् ॥ पादयोःपादकटकैर्हंसकाद्यैर्विभूषिता ॥१०॥ शाट्यांगानिनिगूहंतीसूक्ष्मयानीलवर्णया ॥ एतस्मिन्नंतरेरा
मोधात्रींवीक्ष्यमुदायुतः ॥ ११ ॥ मातुरंकात्समुत्थायतस्याःक्रोडंजगामच ॥ सातुरामंसमादायनिजांकेसमवेशयत् ॥ १२ ॥ उवाचाथ
चकौशल्यांपुरंध्रीराममातरम् ॥ धन्योवाच ॥ ॥ शृणुदेविप्रवक्ष्यामिवृत्तंतेह्यद्भुतंमहत् ॥ १३ ॥ सांप्रतंवर्ततेराजाकैकेयीभवनेशुभे ॥
सौविदल्लैर्मयाज्ञातस्तस्मादाज्ञांचदेहिमे ॥ १४ ॥ अद्यरामंविभूष्याहंभूषणैःसुमनोहरैः ॥ नयामिभूपतेःपार्श्वेकैकेय्यासहतिष्ठतः ॥१५॥
सूतउवाच ॥ इतिवाक्यंतुसाश्रुत्वाजगादशुभयागिरा ॥ कौशल्योवाच ॥ ईदृशीयदितेश्रद्धानयरामंमनोहरे ॥ १६ ॥ तदाशीघ्रंतुसाधा
त्रीरामंसंभूष्यभूषणैः ॥ कैकेय्याभवनंप्राप्यराममंकेनिवेश्यच ॥ १७ ॥ अन्याश्चशतशः सख्यस्तथाबालाअनेकशः ॥ रामक्रीडन
कंगृह्यधात्रीमनुययुःशुभाः ॥ १८ ॥ कैकेय्याभवनंरम्यंदासदासीसमाकुलम् ॥ सारिकाशुकहंसैश्चकृत्रिमाकृत्रिमैर्युतम् ॥१९॥ मृदंगना
दैर्गीतैश्चनादितंविस्मयावहम् ॥ मणिदामवितानैश्चवज्रयष्टिभिरुच्छ्रितैः ॥२०॥ छादितंप्रांगणंयत्रमणिकाचैश्चनिर्मितम्॥लसंनिस्वर्णभां
डानिदिव्यरत्नमयानिच ॥ २१ ॥ प्रासादोपरिनृत्यंतिमृदंगघनगर्जितैः ॥ वितत्यस्वस्यबर्हाणिमयूरास्तुमनोहराः ॥ २२ ॥ लज्जयात
त्रपश्यंतिराजानंकशिपौस्थितम् ॥ शाटीमध्यगतैर्नार्योलोचनैःकर्णविस्तृतैः ॥ २३ ॥ पर्य्यंकास्तत्रवर्त्तंतेगजदंतमयाःशुभाः ॥ तत्रासी
नोदशरथोधर्मात्माधर्मतत्परः ॥ २४ चामरैरत्नदंडैश्चवीज्यमानोनरेश्वरः ॥ कैकेयीचमहाराज्ञीराज्ञोनिकटवर्त्तिनी ॥ २५ ॥ हसंतीहा
सयंतीचमहाराजंचवीक्षितैः ॥ लालयानाहिभरतंपुत्रतातेतिसादरम् ॥ २६ ॥ सूतउवाच ॥ तस्मिन्नवसरेधात्रीरामचंद्रेणसंयुता ॥ प्राप्ता

समीपंराज्ञस्तुसखीभिःपरिवारिता॥२७॥राजादशरथोराममपश्यद्धर्मसंगरः ॥ अतसीपुष्पसंकाशंपीतवेष्टनवेष्टितम् ॥२८॥ उषःशुक्रसमं
चारुदधतंनासिमौक्तिकम्॥स्वहस्तेवज्रयष्टिञ्चदधानंपीतकंचुकं २९रामंत्वशिक्षयद्धात्रीनम्रोभवनरेश्वरम्॥तथैवपुत्रहेराज्ञींताततातेतिशी
घ्रतः॥३०॥धात्र्यावाक्यंतुसंश्रुत्यरामस्तुसस्मिताननः ॥ प्रणनामपितुःपादौकैकेय्याःपुनरेवहि॥३१॥राजादशरथःस्वांकेरामंप्रीत्यान्यवे
शयत्॥ततानपितुरानंदंरामोराजविलोचनः॥३२॥पश्चाद्रामंतुसाराज्ञीनिजांकेसमकल्पयत् ॥ जघ्रौशिरसिरामस्यप्रेम्णस्तुहिपरागतिः ॥
॥ ३३ ॥ उवाचसुमुखीसुभ्रूःसस्मितंवीक्ष्यतीनृपम् ॥ कैकेय्युवाच ॥ ॥ शृणुराजन्महाबाहोरामेममरतिर्दृढा ॥ ३४ ॥ ईदृशीभरते
नैवयथारामेप्रवर्तते ॥ राजोवाच ॥ ॥ सत्यंवदसिभोदेविरामेतवरतिर्ध्रुवा ॥ ३५ ॥ इत्थंवदतिभूपाले लक्ष्मणोप्याजगामच ॥ कंदु
कंधारयन्हस्तेकुमारःक्रीडयन्सखीन् ॥ ३६ ॥ संतुष्टोपिमहातेजाः बालकैःसहवेगतः ॥ विवेशभवनंप्रेम्णालक्ष्मणस्यचपृष्ठतः ॥ ३७ ॥
आजग्मतुस्तयोर्धात्र्यौबालनारीभिरावृते ॥ राजादशरथोमग्नःसुखसिन्धौमहामनाः ॥ ३८ ॥ पुत्रैश्चशुशुभेराजाप्रजापतिरिवापरः ॥
नरेंद्रदाराःस्पृहणीयशीलाःनृपोपकंठंत्रिशतान्यगुश्च ॥ पुनःशतार्द्धंद्विजचेटिकानांविलोकितुंक्रीडनकांशिशूनाम् ॥ ३९ ॥ रराजराजा
जिरभूमिमध्येंसिहासनस्थोनिजसुंदरीभिः ॥ यथाहिस्वर्गेभगवान्बिडौजादिव्याप्सरोभिस्तुपुलोमजायाः ॥ ४० ॥ इतिश्रीसत्योपाख्या
नेसूतशौनकसंवादेराजराज्ञीपुत्रसमागमोनामतृतीयोध्यायः ॥ ३ ॥ श्रीशौनकउवाच ॥ ॥ कथ्यतांकथ्यतांतूर्णंरघूणांचरितंशुभम् ॥
मनोमेत्वरतेसूतकथापानायसादरम् ॥१॥ सूतउवाच ॥ अथभूयोमहाबाहुःशिक्षयामासकैकयीम् ॥ भोदेविभवनंसर्वाःसपत्न्यस्तवसंग
ताः ॥ २ ॥ पूजयस्वमहाभागेमालाचंदनवटिकैः ॥ श्रुत्वातुभूपतेर्वाक्यंसस्मिताजगृहेस्मसा ॥ ३ ॥ संस्थिताभ्यःपुनर्देवीचंदनंमलयो

द्रवम् ॥ मालांपुष्पमयींरम्यांतांबूलंक्रमुकैर्युतम् ॥४॥ स्थलपद्मरसंदिव्यंददौराज्ञीप्रहर्षिता॥स्थितासुतासुसर्वासुराजादशरथोवशी॥५॥ पुत्रान्सर्वान्समादायजगादनिजयोषितः ॥ राजोवाच ॥ शृणुध्वंसकलादेव्योयुष्माकंपुण्यतोबलाः ॥ ६ ॥ जाताःकुमारकाःशुद्धाममवंशविवर्द्धनाः ॥ समीचीनासुनारीषुयेषांपुत्रानजज्ञिरे ॥ ७ ॥ तेषांतुपितरःसर्वेऔदासिन्येनस्वःस्थिताः ॥ तस्मात्सर्वप्रयत्नेनपुत्रमुत्पादयेन्नरः ॥ ८ ॥ मह्यंतुब्राह्मणैर्दत्ताःकुमारा कुलभूषणाः ॥ येषुतुष्टानभूदेवास्तेषांजन्मगतंवृथा ॥ ९ ॥ तस्मात्सर्वप्रयत्नेनसाधुविप्रांश्चतोषयेत् ॥ येषांपादोदकंपीत्वाधूतपापोभवेन्नरः ॥ १० ॥ भवतीनांकुमारावैलालनीयानसंशयः॥ सूतउवाच ॥ क्षितीशस्यतुतद्वाक्यंनिशम्यपरमाःस्त्रियः ॥ ऊचूराममनस्कास्ता राजानंपृथिवीपतिम् ॥११॥ श्रीराजपत्न्यउचुः ॥ त्वंतुराजन्धर्ममूर्तिर्नास्तित्वत्सदृशो भुवि ॥ १२ ॥ अस्माकंप्राणतुल्याश्चसर्वेषांपुरवासिनाम् ॥ भूयादेषांविवाहोवैश्रीरंगस्यप्रसादतः ॥ १३ ॥ सवधूंश्चतदाराजन्द्रक्ष्यामस्तवपुत्रकान् ॥ यदारामंगजस्थंचासितछत्रेणशोभितम् ॥१४॥ यांतंराजपथेनैवप्रकीर्णाभ्यांचवीजितम् ॥ ऐक्षिष्यामोमहाराजतदाजन्मभृतोवयम् ॥ १५ ॥ श्रीसूतउवाच ॥ यामंथरेतिकैकय्यादासीमंथरगामिनी ॥ मंथरंकर्मतस्यास्तुजनमंथरकारिणी ॥ १६ ॥ वाक्यंश्रुत्वानरेशस्यपत्नीनामतिचुक्रुधे॥ उवाचकैकयींमंदात्रिवक्राक्रूरगामिनी ॥ १७ ॥ मंथरोवाच ॥ अत्रागच्छमहाभागेमुग्धेसौंदर्यगर्विते ॥ पूर्ववृत्तंनजानासिमत्ताक्रीडसिमंदिरे ॥ १८ ॥ मंथरायावचःश्रुत्वाकैकयीसुस्मिताभवत् ॥ उवाचमधुरंराज्ञीःकौसल्याप्रमुखास्तदा ॥ ॥ १९ ॥ कैकय्युवाच ॥ कुब्जाकारयतेसुभ्रूअहंगच्छामितांप्रति ॥ वीक्ष्यतेकिलरक्ताभ्यांचक्षुर्भ्यांवक्रगामिनी ॥ २० ॥ सूतउवाच ॥ इत्युक्त्वाचजगामाथवादयंतीचमेखलाम्॥ आज्ञांप्राप्यसपत्नीनांमंथरायत्रतिष्ठति॥२१॥मंथराद्विजकैकय्याःपाणिनापाणिमग्रहीत् ॥प्रासा

दंरुरुहेकुब्जानिः श्वसंतीस्थगोर्भरात् ॥ २२ तत्रारुह्यानिविष्टाचकंबलेपरमाद्भुते ॥ मंथरावटिकान्दिव्यान्खादयामासकैकयीम् ॥२३॥
पुनस्तुवीजयामासचामरेणसुशोभिना ॥ रत्नदंडेनशुभ्रेणमंदमंदेनमंथरा ॥ २४ ॥ कैकय्युवाच ॥ मंथरेवदशीघ्रंत्वंहृद्गतंकारणंहिमे ॥
यदर्थमहमानीतानृपपत्नीसमूहतः ॥ २५ ॥ सूतउवाच ॥ इतिश्रुत्वाचकैकय्यावाक्यंपरमशोभिनम् ॥ जगादतर्जनींकृत्वाओष्ठस्योपरि
मंथरा ॥ २६ ॥ मंथरोवाच ॥ शृणुदेविप्रवक्ष्यामिकथांचपरमाद्भुताम् ॥ प्रवदंतिसपत्न्योहिरामराज्यंभविष्यति ॥ २७ ॥ तदावयंज
न्मभृतोभविष्यामोनसंशयः ॥ इत्यासांनृपदाराणांवचनैःस्मृतिरागता ॥ २८ ॥ विवाहस्यचसुश्रोणितवराज्ञोघटस्तानि ॥ कैकय्युवाच॥
कीदृशंखलुमेवृत्तंविवाहस्यचमंथरे ॥ २९ ॥ राज्ञःप्रियाकथंजाताकथंचोद्वाहिताह्यहम् ॥ ३० ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादे
मंथराकैकयीसमागमोनामचतुर्थोऽध्यायः ॥ ४ ॥ ॥ मंथरोवाच ॥ ॥ एकदाब्रह्मपुत्रस्तुनारदोमुनिसत्तमः ॥ वादयन्महतींवी
णामयोध्यांप्रययौमुनिः ॥ १ ॥ राजादशरथस्तंहिपूजयामासभक्तितः ॥ सिंहासनेमहादिव्येसंनिवेश्ययथाविधि ॥ २ ॥ ॥
श्रीदशरथउवाच ॥ कस्माज्जनपदाद्विप्रप्राप्तोसिममचालयम् ॥ पावयन्सकलान्लोकान्पादैरटसिसूर्यवत् ॥ ३ ॥ पातालेस्वर्गलोकेवा
ब्रह्मलोकेतथाक्षितौ ॥ किंचित्रंवर्ततेविप्रसत्यंकथयमेप्रभो ॥ ४ ॥ ॥ नारदउवाच ॥ ब्रह्मलोकादहंप्राप्तःपृथिवींशृणुभूपते ॥
सर्वेविलोकितादेशानरनारीप्रपूरिताः ॥ ५ ॥ प्रयागश्चमयादृष्टःपुरीकाशीविलोकिता ॥ कांचीविलोकिताराजंस्तथावंतीविलोकिता॥६॥
आनर्तश्चमयादृष्टस्तथामधुपुरीशुभा ॥ एतेष्वन्येषुनोदृष्टामयानार्य्यःसुमध्यमाः ॥ ७ ॥ यथादृष्टामयाराजन्कन्याकेकयभूपतेः ॥
नैव देवीनगंधर्वीयथासाकिलवर्तते ॥ ८ ॥ अहमश्वपतेराजन्गृहंगत्वाविलोकिता ॥ तस्याहस्तोमयादृष्टोरेखाहस्तगतातथा ॥ ९ ॥

तांदृष्ट्वाशीघ्रमु त्थायप्राप्तोस्मिहितवांतिकम् ॥ तस्याःपाणिश्चगृह्णीष्वयत्नेनखलुभूमिप ॥ १० ॥ तस्यांपुत्रोयशस्वीचमहाज्ञानी
महातपाः ॥ भविष्यतिमहाराजतवपुत्रोनसंशयः ॥ ११ ॥ श्रावयित्वातुराजानंदेवर्षिःपरमद्युतिः ॥ ब्रह्मलोकंययौधीमा
न्नृपमामंत्र्यसुंदरि ॥ १२ ॥ राजादशरथस्त्वांहिरूपेणाप्रतिमांभुवि ॥ श्रुत्वाशुशोचलाभार्थंकथंप्राप्स्यामितांस्त्रियम् ॥१३॥ तत्रागता
नरेंद्रस्यसमीपंदेवियोगिनी ॥ तयापृष्टोमहाराजःकिंत्वंध्यायसिभूमिप ॥ १४ ॥ अश्वागजाश्चमातंगास्तवसंतिशुभाच्छुभाः ॥ पत्तय
स्तेतुसामंताःपरसामंतदारणाः ॥ १५ ॥ राजन्राज्यंतवस्फीतंप्रतापहतकंटकम् ॥ पत्न्यःसप्तशतार्द्धांनिवर्त्ततेरतिमूर्त्तयः ॥ १६ ॥
प्रतापस्तेमहाबाहोदेवविस्मयकारकः ॥ एतत्सर्वंहितेराजन्किंत्वंशोचसिदीनवत् ॥ १७ ॥ राजोवाच ॥ इदानींनारदोदेविह्यागतोम
मसन्निधौ ॥ तेनरूपंहिकैकेय्याममसर्वंनिवेदितम् ॥ १८ ॥ कथंप्राप्स्याम्यहंतांवाइतिशोचामिपंडिते ॥ यदिदूतोमयाभद्रेप्रेषितव्योनृ
पांतिके ॥ १९ ॥ जनाःसर्वेंप्रहासंचकरिष्यंतिनसंशयः ॥ कथंराजारघूणांवैविवाहेस्वयमुद्यतः ॥ २० ॥ धर्मात्मासत्यसंधश्चवृद्धानां
पर्युपासकः ॥ कामकारेणवर्त्ततेराघवाधर्मतत्पराः ॥ २१ ॥ बोधितोनारदेनाहंविवाहार्थंतयासह ॥ सूतउवाच ॥ नरेंद्रस्यचतद्वाक्यं
निशम्यप्राहयोगिनी ॥ २२ ॥ मोहिनींनरनारीणांरूपिणीजनहारिणी ॥ योगिन्युवाच ॥ प्रापयामिमहाभागकैकेयींतवसन्निधौ॥ २३ ॥
धैर्य्यंकुरुमहीपालदूतीभावेमयिस्थिते ॥ मोहयिष्यामिगंधर्वींदेवींवाकिमुमानुषीम् ॥ २४ ॥ परंतुशृणुकाकुत्स्थसतांधर्मोनईदृशः ॥
छलेनपरदारेःपरकन्येच्छुश्चयोनरः ॥ २५ ॥ सघोरंनरकंयातिताडितोयमकिंकरैः ॥ तस्मात्तस्यास्त्वयासार्द्धंविवाहार्थंयताम्यहम्
॥ २६ ॥ मंथरोवाच ॥ राज्ञासभाजितासापिययौशीघ्रंचयोगिनी ॥ देशान्जनपदान्रम्यान्मनसोमोहकारकान् ॥२७॥ वनानिरमणी

यानिसेवितानिमतंगजैः ॥ नदीश्चविविधाकारास्तरंगावर्त्तभीषणाः ॥ २८ ॥ साहिस्वल्पेनकालेनप्राप्ताकेकयपत्तनम् ॥ दृष्ट्वासानगरो
पांतेसरःपंकजमंडितम् ॥ २९ ॥ चतुरस्रश्चसोपानैःशोभितंस्फटिकोपमैः ॥ चक्रवाकैःसमाकीर्णंहंससारससेवितम् ॥३०॥ लक्ष्मणाभिः
सदापूर्णंवरटाभिश्चशोभितम् ॥ निःपंकंनिर्मलंस्वच्छंसाधूनांहृदयंयथा ॥ ३१ ॥ प्रफुल्लैःशतपत्रैश्चराजितंभ्रमरान्वितैः ॥ एवंविधंस
रोदृष्ट्वाचकारमतिमीदृशिम् ॥ ३२ ॥ अत्राहमुटजंकृत्वावसाम्यस्मिन्सरोवरे ॥ कायक्लेशंकरिष्यामिह्यात्मप्राकट्यकारणात् ॥ ३३ ॥
अत्रसर्वजनोनित्यंस्नातुमायातिपत्तनात् ॥ अत्राप्यश्वपतेःकन्यानिश्चयेनागमिष्यति ॥ ३४ ॥ तयासार्द्धंचसंवादोममचात्रभाविष्य
ति ॥ तयानीताह्यहंरम्यंमवरोधंचभूपतेः ॥ ३५ ॥ द्रक्ष्येकेकयराजश्चतदाकार्यंभविष्यति ॥ इतिसानिश्चयंकृत्वाचोवाससरसस्तटे
॥ ३६ ॥ नागरैःपूज्यमानाचनारीभिश्चविशेषतः ॥ त्वमपिस्नातुमायातात्वयादृष्टापितापसी ॥ ३७ ॥ त्वंचदेवीनजानासिचरितंशुभ
मात्मनः ॥ अथवाविस्मृतंभद्रेश्यामयाचरितंहियत् ॥ ३८ ॥ मयानाविस्मृतांरामेकथातवप्रियामम ॥ त्वांददर्शसमीपस्थांपूर्णेंदुसदृशा
ननाम् ॥३९॥ सुनेत्रांसुष्टुदशनांसुललाटांशुचिस्मिताम् ॥ सुकपोलांसुकेशींत्वांबिंबोष्ठींकर्णकुंडलाम् ॥ ४० ॥ सुष्टुनासांसुकंठांचकंठा
भरणभूषिताम् ॥ स्वर्णसूत्रेणसुप्रोतांमुक्तांचनसिबिभ्रतीम् ॥४१॥ वेणींकामकशाकारांमुक्तादामेनग्रंथिताम् ॥ कंदर्पस्ययथापाशंतादृशं
भुजयोर्द्वयम् ॥ ४२ ॥ कुचौचनिबिडौपीनौवर्त्तुलौश्रीफलोपमौ ॥ नाभिन्ह्रदंचगंभीरंजघनंमेखलायुतम् ॥४३॥ ऊरूरंभोपमौसुभ्रूचरणौ
कमलोपमौ ॥ एवंविधांहिकामस्यकांतांरतिमिवापराम् ॥४४॥ सुतामश्वपतेर्ज्ञात्वालेभेसापरमांमुदम् ॥ तामुवाचशुभाचारांलक्षणज्ञांवि
शारदाम् ॥ ४५ ॥ योगिन्युवाच ॥ स्वर्गलोकोमयादृष्टस्तथास्वर्गभवाःस्त्रियः ॥ भूमेरधोमयालोकाःसर्वेदृष्टामनोहराः ॥ ४६ ॥ ईदृशी

नमयाकन्यादेवानांनविलोकिता ॥ गंधर्वाणांचनागानामप्सरासुचरूपतः ॥ ४७ ॥ अहोधामवयस्तेजोनृणांमोहकरंवपुः ॥ राजलक्षण
संयुक्काराजपत्नीभविष्यसि ॥ ४८ ॥ मंथरोवाच ॥ इत्युक्काविररामाथयोगिनीजनमोहनी ॥ तस्यावाक्यंचसंश्रुत्यमंदहास्यं
त्वयाकृतम्॥ ४९ ॥ त्वयानीतागृहंप्राप्तामातुस्तेपरमाद्भुतम् ॥ मानिताराजभवनेराज्ञामात्रात्वयापुनः ॥ ५० ॥ प्रासादोप
रिवासस्कृदत्तस्तस्याःशुचिस्मिते ॥ एकदात्वांजगादेतिराज्ञस्तेदेविविस्मृतम् ॥ ५१ ॥ इदृशस्तेपितादेविजननीशीलरू
पिणी ॥ गृहंचपरमाश्चर्यंदासीदाससमाकुलम् ॥ ५२ ॥ आल्यस्तवमहादिव्याःकामस्यपृतनाइव ॥ भ्रातातेतिबलीयान्वैपितृमातृयश
स्करः ॥ ५३ ॥ किंबहूक्तेनभोदेविनास्तिकाचित्त्वयासमा ॥ पृथिव्याःसागरांतायाराजाभर्त्ताभवेद्यदि ॥ ५४ ॥ तर्हिरूपस्यसाफल्य
मन्यथाव्यर्थमेवाहि ॥ विररामप्रवीणासायोगिनीजनमोहिनी ॥ ५५ ॥ ॥ इतिश्रीसत्योपाख्यानेमंथराकैकयीसंवादेपंचमोध्यायः ॥
॥ ५ ॥ ॥ मंथरोवाच ॥ ईदृशंवचनंतस्याःश्रुत्वात्वंविस्मयंगता ॥ पुनस्त्वयाचसापृष्टातत्सर्वंकथयामिते ॥ १ ॥ कैकेय्युवाच ॥
अटंतिपृथिवींमातःसाधनेधर्मविग्रहाः ॥ सुशीलाःशांतरूपाश्चपरकार्य्यरताःसदा ॥ २ ॥ त्वमप्येतादृशीभद्रेलोकेचरसिसर्वदा॥तस्मा
द्योजयमांपत्यासर्वलक्षणशोभिना ॥ ३ ॥ हरिध्यानरताःसर्वेंपरोपकृतिनस्तथा ॥ प्रपन्नाःपादमूलेतेविष्णोर्नारायणस्याहि ॥ ४ ॥
महावीरेणशुभ्रेणराजसिंहेनमानिना ॥ धर्मज्ञेनसुशीलेनप्रतापहतशत्रुणा ॥ ५ ॥ सर्वलक्षणयुक्तेनकिंबहूक्तेनयोगिनि ॥ सूतउवाच ॥
निशम्यवाक्यंकैकेय्याउवाचशुभयागिरा॥स्ववाक्यवशगांज्ञात्वाकैकयींरुचिराननाम् ॥ ६ ॥ योगिन्युवाच॥ विश्वासोयादिरंभोरुममोक्तौ
तुवरानने॥वदामितुभ्यंराजानंदेवासुरनरैर्नुतम्॥७॥विद्यतेनगरीदिव्यादेवासुरनरैर्नुता॥अयोध्यानामविख्याताविष्णोराद्यापुरीशुभा॥८॥

वसंतियस्यांदेवाश्चकिन्नराःसिद्धचारणाः॥ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चधर्मतत्पराः ॥९॥ गृहस्थावानप्रस्थाश्चन्यासिनोब्रह्मचारिणः ॥
स्त्रियश्चरंतिरूपिण्योनराश्चकामरूपिणः॥१०॥सरयूतटिनीयत्रराजतेजलजैर्युता॥हंसकारंडवैर्युक्ताचक्रवाकैरलंकृता॥११॥सोपानैर्विवि
धाकारैर्नानारत्नविचित्रितैः ॥ प्रासादैः सर्वदेवानांशोभतेमानसोद्भवा ॥ १२ ॥तस्यादर्शनमात्रेणपापहानिः परंभवेत् ॥ तस्याः पुर्य्यां
स्तुभूपालोनाम्नादशरथोमहान् ॥ १३ ॥ चक्रवर्तीमहाबाहुर्नृपाणांककुदः कृती ॥ रक्षितासर्वधर्माणांज्ञानिनांपर्युपासकः ॥ १४ ॥ ध
र्म्मात्मासत्यसंधश्चराजराजश्चशत्रुहा ॥ महेन्द्रइवदुर्धर्षस्तेजसाग्निरिवापरः ॥ १५ ॥गिरीशइवप्रसादेसहिष्णुः पितराविव ॥ बृहस्पतिस्स
मोज्ञानेसौंदर्य्येमन्मथोपमः॥१६॥ दोर्दंडकृतनादेनधनुषारिपुदर्पहा ॥ ईदृशोयदितेभर्त्ताभवेच्छ्यामेसुलोचने ॥१७॥ कुचयोस्तवसाफ
ल्यंहेदेविकठिनस्तनि ॥ सूतउवाच ॥ कैकेयीवचनंश्रुत्वायोगिन्यामनसः प्रियम् ॥१८॥ अवदद्योगिनीश्यामामंदसस्मितभाषिणी ॥ कै
केय्युवाच ॥ नारदस्त्वमहायोगीह्येकदाममसन्निधौ ॥ १९ ॥ ऊचेगुणांस्तुभूपस्यराज्ञोदशरथस्यच ॥ तस्माद्दिनाद्धिमेचेतस्तस्मिन्भू
पेहिवर्त्तते ॥ २० ॥ त्वन्मुखाच्चपुनः श्रुत्वाउत्कंठामहतीमम ॥ केनोपायेनभूपःस कथंममधवोभवेत् ॥ २१ ॥ उपायंब्रुहिमेमातर्येनस
प्राप्यतेमया॥योगिन्युवाच॥ समीचीनमुपायंचह्यौदासिन्येनमंदिरे॥२२॥तिष्ठस्वधैर्यसंयुक्तातदाकार्य्यंभविष्यति ॥सुताकेकयराज्ञस्तुयो
गिन्याउपदेशतः ॥ २३ ॥ हृदिकृत्वामहाराजमौदासिन्येह्यवर्त्तत ॥ भोजनंनाकरोत्प्रेम्णापिपासांनजलेतथा ॥ २४ ॥ नददर्शसखीःपा
र्श्वेतांबूलंनचखादवै ॥ नदेहंगूहयामासवस्त्रेणैववरानना ॥ २५ ॥ नचकारललाटेचतिलकंचात्मपाणिना ॥ हास्यंनचक्रेसाश्यामासखी
भिः परिवारिता ॥ २६ ॥ मुहुर्मुमोचहिक्कांचनशुश्रावजनोदितम् ॥अनागसंचुकोपांशुनर्त्तनंनददर्शसा॥२७॥तस्याआलयपश्चतांदृष्ट्वाज

पति

ग्मुः शीघ्रंचमातरम् ॥ आहुश्चवचनंप्रेम्णाकैकेय्याजननींप्रति॥२८॥आल्यऊचुः ॥ पश्यपश्यमहाभागेस्वसुतांविकृतिंगताम्॥ भोजनेगू
हनेचेतोदेहस्यनहिवर्त्तते ॥२९॥ यदाप्रभृतितेगेहंयोगिनीदारमोहिनी ॥ आगताशंवरीमायामूर्त्याकिलनरेश्वरि ॥३० ॥ यद्दिनात्सन्निधौ
तस्याः स्थितिंचक्रेतवात्मजा॥तद्दिनान्मोहमापन्नानप्रसन्नाशुचिस्मिता॥३१॥तस्यामुखाच्चभूपानांकथाःशुश्रावचित्रधा ॥कथाभिर्मोहया
मासच्छलरूपाचयोगिनी ॥ ३२ ॥ सूतउवाच ॥ सखीनांवचनंश्रुत्वाविस्मयंपरमंगता ॥ युधाजितस्यसामातामहिषीकेकयस्यतु ॥ ३३ ॥
॥ जगामशीघ्रंकैकेय्याः समीपंवरवर्णिनी ॥ विलोक्यकैकयींम्लानांवचनंचेदमब्रवीत् ३४ ॥ ॥इतिश्रीसत्योपाख्यानेमंथराकैकयिसंवा
देषष्ठोध्यायः ॥६ ॥ ॥ मातोवाच ॥ ॥ कादशातवहेपुत्रिकिंचिकिर्षसिशंसमे ॥ शरीरेतवकाव्याधिस्तांयत्नैर्नाशयाम्यहम् ॥१॥ कै
केय्युवाच ॥ ममेयंप्रकृतिर्मातर्नचिकीर्षास्तिमानसे ॥ किंकरोमिनमेतृप्तिर्जायतेसर्ववस्तुषु ॥ २ ॥ सूतउवाच ॥ युधाजितस्यसामाता
योगिन्याअंतिकंगता ॥ जगादप्रांजलिंकृत्वास्तुवंतीपरयागिरा ॥ ३ ॥ कादशाममकन्यायाजातातवसमीपतः ॥ श्यामाभ्यौन
चवक्तव्यंराज्ञांचगुणविस्तरम् ॥ ४ ॥ श्रवणेनमनस्तासांतिष्वेवरमतेनृषु ॥ तथैवसुंदरीणांहिवर्णनेकामुकस्यतु ॥ ५ ॥ पतिव्रताश्चया
नार्योनशृण्वंतिपरान्गुणान् ॥ मनसोनहिविश्वासस्तस्मिन्गच्छतिमानवे ॥ ६ ॥ वशेकुर्वंतिदूत्यस्तान्नृकथाभिर्वधूजनान् ॥ अथवा
किंनजानासिलोकस्यचरितंत्विदम् ॥ ७ ॥ अथवात्वंनजानासितपस्यभिरतासदा ॥ योगिन्युवाच ॥ मयानुज्ञायतेभद्रेलोकवार्त्ताशुभा
शुभा ॥ ८ ॥ मामपृच्छच्छुभाचारातवकन्यामनोहरा ॥ केकेदेशास्त्वयादृष्टाभूभुजःकेमहीतले ॥ ९ ॥ इतिपृष्टाह्यहंभामेसुतयारु
चिरांगया ॥ तदावोचम्महंभद्रेकथादशरथस्यया ॥ १० ॥ अयोध्यावर्णिताराज्ञीतथैवसरयूनदी ॥ अनयापृष्टयाभद्रेकथैवकथिता

मया ॥ ११ ॥ उच्चाटनंनजानामिमोहनंनविशेषतः ॥ अनायासेनमोहंसाप्राप्ताचंद्राधिकानना ॥ १२ ॥ सूतउवाच ॥ योगिन्यावचनंश्रु
त्वामहिषींकेकयस्यतु ॥ विवेशभवनंसुभ्रूर्विस्मयाविष्टमानसा १३ रात्रौसमागतोराजाशयनार्थंततोद्विज ॥ केकयाधिपतीराजाराज्ञीं
वचनमब्रवीत् ॥ १४ राजोवाच ॥ वदनंतेह्यतिम्लानंवर्ततेकेनहेतुना ॥ सत्यंकथयमेराज्ञिपादयोःशपथोमम ॥ १५ ॥ राज्ञ्युवाच ॥
विवाहंकुरुकैकेय्याःश्यामायास्त्वंचभूमिप ॥ राज्ञादशरथेनैवकौशल्याधिपतेनच ॥ १६ ॥ योगिन्यावर्ण्यतेतस्यैचरितंतस्यभूपतेः ॥
तन्निशम्यदिवानक्तंकन्यायारमतेमनः ॥ १७ ॥ तस्मिंश्चरमतेभूपतस्माद्योजयतेनताम् ॥ राजोवाच॥तववाक्यंकरिष्यामिप्रातरेवनसं
शयः ॥ १८ ॥ कन्याशीघ्रंतुदातव्यावरायकुलशालिने ॥ तयोश्चकुर्वतोर्वार्त्तांव्यतीतारजनीद्विज ॥ १९ ॥ सूतउवाच ॥ कृत्वास्नानं
चभूपस्तत्प्राविशन्महतींसभाम् ॥ उपविष्टेमहीपालेसमाजग्मुःसभासदाः ॥२०॥ मंत्रिणश्चतथासर्वेसभांप्राप्ताअनेकशः ॥ राजानंचनम
स्कृत्यविविशुःस्वंस्वमासनम् ॥२१॥ राज्ञःपुरोहितोधीमान्नाम्नागर्गोमहामतिः ॥ राज्ञःसमीपंसंप्रापच्छात्रैःपरिवृतोद्विजः ॥ २२ ॥ पूज
यामसराजातुद्विजंक्षत्रियपुंगवः ॥ पीठेनिवेशयामासगर्गंरत्नविचित्रिते ॥ २३ ॥ क्षितिपालस्यतेसर्वेआदधुर्दृष्टिमानने ॥ प्रोवाचमंत्रिणः
सर्वान्मुख्यान्राजपरिग्रहे ॥२४॥ राजोवाच ॥ साकेतनगरेराजानाम्नादशरथोबली ॥ तस्मैदेयामयाकन्याकैकेयीनामतोजनाः ॥२५॥
यदिरोचेतमद्वाक्यंक्रियतामविलंबितम् ॥ सूतउवाच ॥ इतिवाक्यंनरेशस्यश्रुत्वासर्वजनोब्रवीत् ॥२६॥ नादयत्यागिरागेहंक्षितीशंधर्म्म
तत्परम् ॥ जनसमूहउवाच ॥ समीचीनंसमीचीनंवचनंतेनरेश्वर ॥२७॥ कन्यातस्मैप्रदातव्यासूर्य्यवंशध्वजायवै ॥ सूतउवाच ॥ इतिप्र
ब्रुवतांतेषांमंत्रीत्वेकउवाचवै ॥ २८ ॥ मंत्र्युवाच ॥ श्रूयतेखलुवृद्धोहिराजादशरथःकृती ॥ पुरंध्र्यःसंतिबह्व्यश्चतस्यराज्ञोमही

पते ॥ २९ ॥ कथंदेयाह्यपुत्रायबहुपत्नीयुतायच ॥ सूतउवाच ॥ तदाप्रोवाचगर्गस्तुविप्रोराजपुरोहितः ॥ ३० ॥ गर्गउवाच ॥ श्रोतव्यव
चनंसर्वैरितिमेप्रेमतोजनाः ॥ कैलासेपर्वतश्रेष्ठेअलकानामवैपुरी ॥ ३१ ॥ नंदयागंगयारम्यावृताचालकनंदया ॥ तस्यांवसतिवै
राजाकुबेरोधनपालकः ॥ ३२ ॥ तेनसत्रंकृतंपूर्वंश्रीहरेःप्रीतिकाम्यया ॥ तत्राजग्मुःसुरगणाब्रह्माद्याश्चदिवौकसः ॥ ३३ ॥ तथा
ऋषिगणाःसर्वेयज्ञेचधनदस्यच ॥ आजगामाशिवोयज्ञेपार्वत्यानंदिनासह ॥ ३४ ॥ पुत्राभ्यांसहितोदेवोगणेशेनगुहेनच ॥ शिवं
निवेशयामासुःसभामानम्यतेजनाः ॥ ३५ ॥ धनपालस्ययज्ञस्तुबभूवपरमाद्भुतः ॥ निर्विघ्नेनसमाप्तस्तुयज्ञोयंधनदस्यच ॥ ३६ ॥
नोपद्रवःकृतःसत्रेरावणस्यहिराक्षसैः ॥ इतिसर्वेजनादेवंपप्रच्छुर्गिरिजापतिं ॥ ३७ ॥जनाऊचुः ॥ गंगाधरमहादेवप्रलयेप्रलयंकर ॥ स
र्वेजानासिदेवेशभूतंभव्यंभवत्प्रभो ॥३८ ॥ रावणोराक्षसैःसार्द्धंकदानाशंव्रजिष्यति ॥ देवर्षिपितृभूतानांसर्वोपद्रवकारकः ॥ ३९ ॥
श्रीशिवउवा० ॥ शृणुध्वंसकलादेवाभविष्यच्चरितंमहत् ॥ अयोध्यायांमहापुर्य्यांराघवोवरिवार्त्तींहि ॥ ४० ॥ तस्यपत्नीसुमित्रा
चकौसल्याभानुमंतजा ॥ अपराकैकयीनामतथान्याश्चमहात्मनः ॥ ४१ ॥ तासुपुत्राभविष्यंतिचत्वारःपरमाद्भुताः ॥ नाम्नारा
मश्चशत्रुघ्नोलक्ष्मणोभरतस्तथा ॥ ४२ ॥ सर्वेलोकस्यकर्त्तारोभर्त्तारस्तेकुमारकाः ॥ उपास्याद्विजदेवानामस्माकंविश्वभावनाः
॥ ४३ ॥ तोषांमध्येचयोरामोभ्रातृणांज्येष्ठएवसः ॥ पितुराज्ञांपुरस्कृत्यवनंरामोगमिष्यति ॥ ४४ ॥ पुत्रपौत्रादिकैःसार्द्धंरावणंसहनि
ष्यति ॥ स्वस्थाभवतुभोदेवामाचिंताक्रियतांहृदि ॥ ४५ ॥ गर्गउवाच ॥ इतिवृत्तमहंयज्ञेह्यश्रौषंत्र्यंबकात्पुरा ॥ तस्मांदिक्ष्वाकवे
देयाकन्येयंहेसभासदाः ॥ ४६ ॥ राजोवाच ॥ सम्यगुक्तंत्वयाब्रह्मन्निदंवृत्तंमहामते ॥ कन्यांतस्मैप्रदास्यामिनररत्नायभोगुरो ॥ ४७ ॥

गत्वायोध्यांप्रकर्त्तव्योविवाहस्तुत्वयानघ ॥ कैकेय्यास्तस्यभूपस्यसमयेनमहामते ॥ ४८ ॥ समयस्त्वीदृशोविप्रधार्यतांप्रवदामिते ॥
कैकेय्यांममपुत्र्यांतुराज्ञःपुत्रोभविष्यतिं ॥ ४९ ॥ तस्मैराज्यंप्रदेहित्वंसत्येनानेनगृह्यताम् ॥ एवंकृत्वात्वयाविप्रदेयाकन्यानृपायवै
॥ ५० ॥ गर्गउवाच ॥ गमिष्यामिमहाराजनगरंप्रतिभूभुजः ॥ विवाहंकारयिष्यामिपुत्र्यास्तेसमयेनतु ॥ ५१ ॥ सूतउवाच ॥ राज्ञाज्ञ
प्तस्त्वसौविप्रःप्रतस्थेविमलांप्रति ॥ फलदानंतुसंगृह्यविप्रैर्नागरिकैश्वहि ॥ ५२ ॥ शुश्रावकैकयीवृत्तमितिप्रोवाचयोगिनीम् ॥ कैकेय्यु
वाच ॥ हेयोगिनिमहामायेगृह्णीष्ववचनंमम ॥ ५३ ॥ गच्छायोध्यांपुरींरम्यांराजानंब्रुहिमद्दशाम् ॥ यथागृण्हातिमांभूयोदासीतवभवा
म्यहम् ॥ ५४ ॥ गर्गोयातिविवाहार्थममत्वंगच्छचाग्रतः ॥ सूतउवाच ॥ कैकेयीवचनेनैवविज्ञाप्यसकलान्जनान् ॥ ५५ ॥ योगिनी
विमलांप्रापगर्गादग्रेद्विजोत्तमात् ॥ चरितंवर्णयामासह्यात्मनायदनुष्ठितम् ॥ ५६ ॥ राजामुमोदतच्छ्रुत्वाध्यायन्गर्गस्यचागमम् ॥ एवं
कालेप्रयातेसह्ययोध्यांप्राप्तवान्मुनिः ॥ ५७ ॥ राजातुनिर्ययौविप्रंग्रहीतुमग्रतोद्विजैः ॥ प्रणम्यपादौविप्रस्यपाद्यमर्घ्यंददौनृपः ॥५८॥
॥ राजोवाच ॥ सांप्रतंजन्मसाफल्यंजातंममत्वयाद्विज ॥ दिष्ट्यामूर्ध्नामयापादौस्पृष्टौतेदुरिक्षयौ ॥ ५९ ॥ अनुकंपाहिविप्रास्मिन्दासेदी
नेकृतात्वया ॥ ब्राह्मणाहरिभक्ताश्चभूतेषुसुहृदःसदा ॥ ६० ॥ भुव्यटंतिमहात्मानःपुनंतोनिखिलंजगत् ॥ इक्ष्वाकूणामहंधन्यस्तवदर्श
नकारकः ॥ ६१ ॥ प्रवेशंकुरुहेविप्ररघुणांभवनेषुच ॥ अयोध्येयंपुरीधन्यायत्रप्राप्तोभवादृशः ॥ ६२ ॥ वैष्णवाब्राह्मणाश्चैवगेहेदेहेचपत्त
ने ॥ यत्रयत्रनवैयांतिव्याघ्रक्रोष्टृगृहाश्चते ॥ ६३ ॥ पुनीहिपादयोर्धूल्यातस्माच्चेदंगृहंसम ॥ सूतउवाच ॥ स्तुत्वाचैवंमुनिंगृह्यब्राह्मणैः
सहराजराट् ॥ ६४ ॥ गृहंप्रवेशयामासविधिनाविहितेनच ॥ गर्गस्तुमंदिरंप्राप्यददर्शमहतींःस्त्रियः ॥ ६५ ॥ जहर्षमतिमान्विप्रोदृष्ट्वा

राज्ञोमहोदयम् ॥ एवंहर्षससंप्राप्तोद्रष्टव्यंराजमंदिरम् ॥ ६६ ॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेगर्गराजासमागमोनामसप्तमोऽ
ध्यायः ॥ ७ ॥ ॥ सूतउवाच ॥ अथराजादशरथोययाचभोजनायतम् ॥ चतुर्विधंसुपक्वान्नंभुज्यतांब्राह्मणैःसह ॥१॥ गर्गउवाच ॥ तवसं
दर्शनादेवछिन्नोमेसर्वसंशयः ॥ यस्माद्ब्रवीषिधर्मत्वमिक्ष्वाकूणांमहारथः ॥ २ ॥ मनुप्रभृतिराजानःसूर्य्यवंश्यानरेश्वराः ॥ पूजिताश्चार्थि
नोयैस्तुदानैर्मानैर्विशेषतः ॥ ३ ॥ रघूणांहृदयंनैवप्रापुरन्याःकिलस्त्रियः ॥ पृष्ठंनलेभिरेयुद्धेरिपवःशस्त्रपाणयः ॥ ४ ॥ वाणीनशक्यते
स्तोतुंरघुवंशंनरेश्वर ॥ रघूणांयशसाव्याप्तं भूगोलंवर्त्ततेनृप ॥ ५ ॥ देवलोकेचगायंतिदेवकन्याःसहस्रशः ॥ यशस्तवमहाराजपातालेना
गकन्यकाः ॥ ६ ॥ यशसातवहेराजन्कर्णौपूर्णौममानघ ॥ नेत्रयोः सफलार्थायसन्निधौतेजनाधिप ॥७॥ आशयाचागतोराजन्नहंदूरात्तवां
तिकम् ॥ पूर्णांकुरुममाशांचवदान्यानांशिरोमणे ॥ ८ ॥ तदाभुंजेमहाराजतवान्नंप्रीतमानसः ॥ सूतउवाच ॥ निशम्यचमुनेर्वाक्यमब्रवी
त्सनरोत्तमः ॥९॥ ध्यायंश्चयोगिनीवाक्यंश्रीगर्गकोसलाधिपः॥ श्रीदशरथउवाच ॥कथयस्वमहाभागवांछितंत्वद्यात्मनःशुभम् ॥१०॥ तथै
वाहंकरिष्यामियथाशाद्विजजायते ॥ किंबहूक्तेनतेकार्यंप्राणैरर्थैश्चसाधये ॥ ११ ॥ गर्गउवाच ॥ प्रेषितोहंनरेंद्रेणकाश्मीरस्याधिपेनच ॥
तुभ्यंदास्यतिकन्यांसःसमयेननराधिपः ॥ १२ ॥ समयंशृणुभोराजन्नीतिस्तस्यमहीपतेः ॥ कैकेय्यांममकन्यायांयस्तुपुत्रोभविष्यति
॥ १३ ॥ तस्मैराज्यंददात्वेवंगृह्णातुममकन्यकाम् ॥ अनेनसमयेनापिविवाहंकुरुभूमिप ॥१४॥ इच्छाप्रोक्तंत्वयाचैवप्राणैरर्थैश्चसाधये ॥
इतिप्रोक्तंत्वयामत्यंमिदानींक्रियतांनृप ॥ १५ ॥ सूतउवाच ॥ राजानिशम्यतद्वाक्यंमनस्येतद्विचारयत् ॥ राज्ञोवाच ॥ किमेषवदते
विप्रोमनसोभ्रमकारकम् ॥ १६ ॥ विवाहस्तुममाभीष्टोनपुत्रेराज्यतर्पणम् ॥ यदिचेन्ममपुत्राश्चभविष्यंतिस्त्वपुत्रिणः ॥ १७ ॥ तेचापि

स्वस्यवंशस्यमर्यादांचकुमारकाः ॥ नत्यजंतिमहात्मानआदाविक्ष्वाकुनाकृताम् ॥ १८ ॥ हृदिनिश्चित्यराजाचवसिष्ठादिभिरात्मवान् ॥ निश्चयंचात्मनःकृत्वागर्गमाहकृतांजलिः ॥ १९ ॥ यथावदसिभोविप्रतथैवकरवाण्यहम् ॥ सूतउवाच ॥ गर्गस्तुभोजनंचक्रेअनेनसमयेनच॥२०॥ राज्ञादशरथेनापिजग्मेकेकयपत्तनम् ॥ अयोध्यांमंत्रिषुन्यस्यविवाहार्थंमहाद्युतिः॥२१॥काश्मीरदेशपालेनपूजितःपरमार्हणैः ॥ चकारग्रहणंपाणेःकैकेय्याराजपुंगवः ॥ २२ ॥ काश्मीरस्यपतिःप्रीतःपारिबर्हंददौमुदा॥चंक्रीवतस्तुगंधर्वान्कंबलान्याजिनानिच ॥ २३॥ गृह्यमंथरयासाकंकैकेयींकेकयात्मजाम् ॥ विवेशाविमलांप्रीतोवृतःसैन्यैर्महाबलैः ॥२४॥ रेमेराजातयासार्द्धंसंवत्सरगणान्बहून् ॥ पौलोम्याचयथादेवअयोध्यायांतथानृपः ॥ २५ ॥ चकारविविधांक्रीडांपल्यवगुह्यकेश्वरः ॥ ईदृशोनहिराजासीदन्वयेसोमसूर्ययोः ॥ २६ ॥ ॥मंथरोवाच॥ वर्णितस्तेमयाभद्रेविवाहस्तुमनोहरः ॥ अनेनसमयेनापिस्मारितंतेसुलोचने ॥ २७ ॥ किंवदन्तीसपल्यस्तुविस्मृत्यसमयंतव ॥ यदिरामस्यराज्यंचयौवनेचभविष्यति ॥ २८ ॥ तदावयंनिरुत्साहाश्चेटिकास्तेभवेमहि ॥ सूतउवाच ॥ निशम्यवाक्यंकुब्जायाःकैकेयीचस्मितानना ॥ २९ ॥ कर्णस्थितेनपद्मेननिघ्नंतीप्राहमंथराम् ॥ कैकेय्युवाच ॥ कर्मणात्वांचजानामिदैत्यकन्यांचमंथरे ॥ ३० ॥ ईदृशीयदिरामेचबुद्धिस्तवसमागता ॥ जिह्वायाश्छेदनंचैवकर्त्तव्यंतवपापिनि ॥ ३१ ॥ नेत्रयोःपातनंचैवनासिकायाविशेषतः ॥ अयंपापसमूहस्तेवक्ररूपेणवर्तते ॥ ३२ ॥ पृष्ठोपरिमहापापेश्रीरामेक्रूरदर्शिनि ॥ पुनर्जघानपद्मेनमंथराचारुहासिनी ॥ ३३ ॥ सूतउवाच ॥ घटिकांतरमात्रेणराजादशरथोद्विज ॥ उवाचशत्रुहंतारंताताकारयकैकयीम्॥३४॥ सौधस्थितांचहेपुत्रगृहीत्वाहस्तमानय ॥ पत्न्यःसर्वास्थिताह्यत्रकिंकरोतिचकैकयी ॥ ३५ ॥ सूतउवाच ॥ शत्रुघ्नःसखिभिःसार्द्धंप्रासादंकरकंदुकः ॥ आरुरोहमहावीर्य्योमातुराकारणाय

वै ॥ ३६ ॥ मातरंवीक्ष्यशत्रुघ्नःप्रोवाचकलनूपुरः ॥ शत्रुघ्नउवाच ॥ अंबांबगच्छभोमातर्त्वंधोमंथरयासह ॥ ३७ ॥ राजाकारयतेत्वांच
गंतव्यंतत्रवैत्वया ॥ सूतउवाच ॥ इत्युत्त्काहस्तमाकृष्योत्थापयामासकैकयीम् ॥३८॥ शत्रुघ्नोरिपुवीरघ्नोमहावीरोमहाबली॥ कैकेय्याः
शाटिकांतंचप्रकृष्यमंथराब्रवीत् ॥ ३९ ॥ पुनश्चश्रूयतांभद्रेमद्वाक्यंप्रेमतःप्रिये ॥ शत्रुघ्नस्यसखायस्तुमंथरांवाक्यमब्रुवन् ॥ ४० ॥
॥इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेमंथराकैकयीसंवादोनामाष्टमोऽध्यायः ॥८॥ बालाऊचुः ॥ मुंचमुंचत्रिवक्रेत्वंभरतस्यचमातरम्॥
॥सूतउवाच॥ मंथराचोत्थिताकोपात्जानौहस्तंविधायच ॥ १ ॥ भर्त्सयामाससाबालान्ह्यंगुलिभंगंचकुर्वती ॥ शीघ्रंतताडशत्रुघ्नोताव
त्तस्याश्चकूबरम् ॥ २ ॥ पपातमंथराभूमौहाहाशब्दंचकुर्वती ॥ शत्रुघ्नोपिमहावीर्य्योजहासबालकैःसह ॥ ३ ॥ हस्तांगुलिंचकै
केय्याःगृहीत्वापितुरंतिके ॥ निनायमातरंबालोजहासमंथरांप्रति ॥ ४ ॥ मंथराचययौतत्रस्खलंतीचपदेपदे ॥ राज्ञःपपा
तसाचाग्रेकराभ्यांनिघ्नतीस्तनौ ॥ ५ ॥ शत्रुहाबालकैःसार्द्धंदुद्रावसदनाद्बहिः ॥ मंथरांरुदतींदृष्ट्वाभूपाग्रेनिघ्नतींशिरः ॥ ६ ॥ सोपालंभ
मिदंवाक्यंजगादमंथरानृपम् ॥ मंथरोवाच ॥ त्वंमांपश्यमहाराजपतितांधरणीतले ॥७॥ शत्रुघ्नेनकुमारेणपृष्ठवंशेचताडितां॥ वज्ररूपपतं
गेनसुमित्रातनयेनमाम् ॥८॥ नाम्नाकुब्जेतिविख्यातांमंदिरेतवभूमिप ॥ स्तनभारेणनम्राहंनतुकुब्जंमयिस्थितम् ॥ ९ ॥ इदानींरूपतोया
ताशत्रुघ्नेनचताडिता ॥ कुब्जाकृतात्वयाराजन्पुत्रद्वारेणभूभुजा ॥१०॥सूतउवाच ॥ पुनरुत्थायसाचंडीसुमित्रांवाक्यमब्रवीत् ॥ अहोदे
विकुमारेणकंदुकेनचताडिता ॥ ११ ॥ शत्रुघ्नेनमहाभागेप्रेरितेनत्वयाह्यहम् ॥ सुमित्रोवाच ॥ नमयाप्रेरितश्चंडिशत्रुहाकरकंदुकः॥१२॥
बालकानांस्वभावोहिरोदनेताडनेध्रुवम् ॥ वर्त्ततेमंथरेमांकिंसोपालंभमिदंवचः ॥ १३ ॥ सूतउवाच ॥ तावज्जगादरामस्यधात्रीपरमसुं

दरी॥मुखंविलोक्यराज्ञस्तुसपत्नीनांतथैवच ॥१४॥ धन्योवाच॥ मंथरेश्शृणुमद्वाक्यमर्भकस्यक्षमस्वतम् ॥ अपराधंमहापापेबालानांक्रीडनेसदा ॥ १५ ॥ नवज्रपतनंजातंकूबरेतवपापिनि ॥ ताडनेकंदुकस्यैवगदाभग्नेवरोदिषि ॥१६॥ सूतउवाच ॥ कुब्जानिशम्यवाक्यंचधन्याधात्र्यामुखेरितं ॥ विचार्यहृदयेचार्थंतस्यवाक्यस्यमंथरा ॥ १७ ॥ ऊचेरामस्यधात्रींचतत्तुभ्यंवर्ण्यतेद्विज ॥ मंथरोवाच ॥ प्रतिसंबोधनंमांचपापेपापेकुभाषिणि ॥१८॥ त्वंवदसिमहाधूर्त्तेंदृष्ट्यामोहयतींनृपम् ॥ शत्रुघ्नकरमुक्तोयंकंदुकोवज्रसन्निभः ॥१९॥ तेनपृष्ठिश्चमेभग्नातस्यांजातंचकुब्जकम्॥ त्वयाधन्येकृतंसर्वंराममानीयचात्रच ॥२०॥ नरामोत्यत्रमायातिनचैताःपुत्रमातरः ॥ सूतउवाच ॥ इत्येवंविललापाथमंथरापापदर्शिनी ॥ २१ ॥ उवाचजनतांक्रूरंनिघ्नतीमात्मनःशिरः ॥ येषांक्रूरस्वभावश्चक्रूरकर्माणितेस्थिताः ॥ २२ ॥ हसतीनांचनारीणांताडनेकंदुकादिभिः ॥ राजादशरथस्तांतुजगादमंथरांतथा ॥ २३ ॥ श्रीदशरथउवाच ॥ कुरुमारुदनंभद्रेचिकित्सांकारयामिते ॥ हरिद्रांतवपृष्ठेचलेपयामिनसंशयः ॥ २४ ॥ मंथरोवाच ॥ मांकिंवंचयसेराजन्व्रणंकृत्वाचपृष्ठके ॥ लेपनंचैवक्षारस्यत्त्वग्निदग्धेवचोयथा ॥२५॥ कदापित्त्वस्यवाक्यस्यफलंप्राप्स्यसिभूपते ॥ सूतउवाच ॥ इत्येवंवदतींपापांमंथरांपापदर्शिनीम्॥ २६ ॥ भर्त्सयामासकैकेयीशत्रुघ्नप्रियकारिणी॥ अन्याभिर्भर्त्सिताचंडीविवेशगृहकोणकम् ॥२७॥ लज्जितातत्रसाकुब्जास्वस्थाभूत्वावसच्चिरम् ॥ कैकेयीभवनाद्राजापत्नीभिःकिलवीक्षितः ॥२८॥ प्रहसन्प्रययौगेहंराममातुःसुभास्वरम्॥राजपत्न्योययुर्गेहंकैकय्याचाभिनंदिताः ॥ २९ ॥ शौनकउवाच ॥ श्रीरामेचापिशत्रुघ्नेभरतेलक्ष्मणेऽथवा ॥ सर्वेषामधिकाप्रीतिर्जनानांपुरवासिनाम् ॥ ३० ॥ येषांचेतोनवैरामेलग्नंतेपशवःस्मृताः॥ब्रह्माद्याःसकलादेवाःसनकाद्यास्तपोधनाः ॥ ३१ ॥ शेषाद्याःपार्षदाःसर्वेकमलाद्याविभूतयः॥इंद्राद्यादेवताः सर्वेमन्वाद्याज्ञानिनो

नराः ॥ ३२ ॥ सर्वैराममुपासंतेयोगिनोयोगतत्पराः ॥ पुंसामोहनरूपेचनारीणांचित्तहारके ॥ ३३ ॥ रामभद्रेकथंपापादुष्टाद्रोह
श्चकारसा ॥ अभिप्रायन्तुकुब्जायाःवदसूतमहामते ॥ ३४ ॥ कारणेनविनासाहिकथंराज्यविघातिनी ॥ पूर्वजन्मनिकेयंचनाम्नाचाभू
चुमंथरा ॥ ३५ ॥ एतद्वैश्रोतुमिच्छामिरामस्यचरितंमहत् ॥ इतिसर्वमहाबुद्धेकथयस्वमहामते ॥ ३६ ॥ ॥ इतिश्रीसत्योपाख्या
नेसूतशौनकसंवादेनवमोऽध्यायः ॥ ९ ॥ ॥ सूतउवाच ॥ शृणुध्वमृषयःसर्वेकथांपौराणिकींशुभाम् ॥ रामराज्येयदाविघ्नंचकाराथच
मंथरा ॥ १ ॥ अयोध्यावासिनःसर्वेविस्मयंलेभिरेतदा ॥ तस्मिन्कालेमहातेजालोमशोमुनिसत्तमः ॥ २ ॥ आजगाममुनिर्द्वारेवासुदेव
परायणः ॥ तंप्रणम्यमुनिंसर्वेपप्रच्छुःपुरवासिनः ॥ ३ ॥ इदमेवमहाभागाश्रीमद्भिःपृच्छयतेऽधुना ॥ प्रियंहिरामंलोकानांमंथराद्वेष्टिवै
कथम् ॥ लोमशउवाच ॥ कथयिष्यामिभोलोकामंथराचरितंमहत् ॥ ४ ॥ यच्छ्रुत्वाभिद्यतेग्रन्थिरुत्पन्नोहृदयेषुवः ॥ दैत्यानां
प्रवरोराजाप्रह्लादस्यसुतोबली ॥ ५ ॥ नाम्नाविरोचनोदैत्योब्रह्मण्यःसत्यसागरः ॥ तस्येयंमंथराकन्यापूर्वजन्मनिनागराः ॥ ६ ॥ तत्रा
पिमंथरानामदैत्यकन्यायदाह्यभूत् ॥ विरोचनस्तुधर्मात्माब्रह्मण्योधर्म्मवत्सलः ॥ ७ ॥ राज्यंजहारदेवानांतेनदेवास्तुलज्जिताः ॥
हताश्रियोनिरानन्दाआचार्यंशरणंगताः ॥ ८ ॥ बृहस्पतिंसुरैःपूज्यमब्रुवन्नात्मनोऽहितम् ॥ ॥ देवाऊचुः ॥ वदोपायंमहाबुद्धेये
नलप्स्यामहेदिवम् ॥ ९ ॥ विरोचनेनसर्वंनोराज्यंलब्धमकंटकम् ॥ त्वयापिज्ञायतेस्वामिन्नस्माकंकथनेनकिम् ॥ १० ॥
॥ सूतउवाच ॥ ॥ प्राहोपायंमहाबुद्धिर्देवान्प्रतिबृहस्पतिः ॥ यूयंतुब्राह्मणाभूत्वाप्रयांतुदैत्यमंदिरम् ॥ ११ ॥ मोहयन्तःप्रियै
र्वाक्यैःकुर्वन्तुयाचनांसुराः॥दैत्यंपरमधर्म्मज्ञंतिष्ठंतंसत्यधर्मयोः॥१२॥यदिदानेप्रतिज्ञांचकुरुतेदैत्यसत्तमः॥तदायाचतचायूंषियूयंहिस्वा

र्थंतत्पराः ॥ १३ ॥ प्रदास्यतिमहातेजाज्ञात्वादेहंचचंचलम् ॥ निर्दिष्टागुरुणादेवादैत्यराजंसमाययुः ॥१४॥ कृत्वाब्राह्मणवेषांश्चतिलका
दिभिरन्विताः ॥ विरोचनस्तुधर्मात्माज्ञात्वादेवान्समागतान् ॥१५॥ब्रह्मरूपधरान्शत्रून्पूजयामासधर्मवित् ॥ अद्यमेहंसमायाताब्राह्मणाः
क्षितिदेवताः॥१६॥ वांछितंब्रूतधर्मज्ञाःकिमर्थंमेगृहागताः ॥ देवाउचुः ॥ परागाययथाभृंगाःपुष्पाणांविद्रवंतिच ॥१७॥फलिनश्चयथावृक्षं
मक्षिकाश्चपतत्रिणः ॥ दानिनंह्यर्थिनःसर्वेयुवतीमिवकामुकाः॥१८॥तथैवत्वांवयंसर्वेविद्धियाच्भार्थिनोनृप ॥ विरोचनउवाच ॥ याचध्वं
भूसुराःकामंकंददाम्यहमद्यतम् ॥ १९ ॥ भूतयःपरकार्यायनृणांसंतियुगेयुगे ॥ द्रुमाणांचफलानीवरत्नानीवमहोदधेः ॥ २० ॥ जलानी
वचमेघानांमलयेचंदनंयथा ॥ तथैवममसर्वश्चदेहेनसहब्राह्मणाः ॥ २१ ॥ कीर्तिरस्तुपृथिव्यांमेश्रीमतांचप्रसादतः ॥ लोमशउवाच ॥
वाक्यंनिशम्यराज्ञस्तुत्यमराब्रह्मरूपिणः ॥ २२ ॥ दैत्यंपरमधर्मज्ञंकपटाच्चययाचिरे ॥ देवाऊचुः ॥ आयुर्देहिमहाराजब्राह्मणेभ्योहिया
चितम् ॥ २३ ॥ वचनंतुसमाकर्ण्यदेवानांकामरूपिणाम् ॥ जहासोच्चैर्महादैत्यःप्रहसन्वाक्यमब्रवीत् ॥ २४ ॥ गृह्यतांकाममेतंचआ
युषामेधनेनकिम् ॥ आश्रित्यमानुषंदेहंनोपकरायकल्पते ॥ २५ ॥ नकृताविप्रसेवाचतेनकिंनरजन्मना ॥ देहंमुमोचधर्मात्मासर्वेषांपश्य
तांसुधीः ॥ २६ ॥ बभूवपरमंकष्टंदैत्यानांदुःसहंमहत् ॥ हाहाशब्दस्तुलोकेषुकर्मदैत्यस्यशृण्वताम् ॥ २७ ॥ देहेदैत्यस्यवृष्टिश्चपुष्पा
णांस्वर्गिभिःकृताः ॥ इंद्रादयोलोकपालाविरंचिभवसंयुताः ॥ २८ ॥ प्रशंसंतिस्मतत्कर्मदैत्येनाचरितंहियत् ॥ आदितेयाश्चतेसर्वेसंक्रंद
नपुरःसराः ॥ २९ ॥ त्रिदिवंभेजिरेहृष्टाःसंपरेतेविरोचने ॥ परमानंदमापन्नास्त्रिदिवेशामहाबलाः ॥ ३० ॥ दैत्यानांचमहाशोकोमृते
राजन्यभूत्किल ॥ समेताःसंघशःप्रोचुःसभायामेकदास्थिताः ॥ ३१ ॥ अहोदेवामहाधूर्ताअस्माकंहननेरताः ॥ छलेनास्माकंपालस्य

ह्रताःप्राणामहीपतेः ॥ ३२ ॥ किंकुर्मोहिवयंकस्यशरणंहिव्रजामहे ॥ लोमशउवाच ॥ एतस्मिन्नंतरेलोकाःमंथरादैत्यरक्षिका
॥ ३३ ॥ सुताविरोचनस्यासीत्पंडितासुरकर्मसु ॥ उवाचदैत्यान्सदासिप्रगल्भादैत्यरक्षणे ॥ ३४ ॥ मंथरोवाच ॥ अहंरक्षांकरिष्यामि
युष्माकंचात्मविद्यया ॥ चरंतुनिर्भयालोकेहननार्थंदिवौकसाम् ॥ ३५ ॥ लोमशउवाच ॥ प्रोक्तंमंथरयावाक्यंनिशम्यदनुजात्मजाः ॥
तुष्टवुर्मुदितास्तांतुवाक्यैःसंदर्भशोभनैः ॥ ३६ ॥ उद्यमंपरमंचक्रुश्चोदितादैत्यकन्यया ॥ मयश्चशंबरोबाणोबलिर्वैरोचनिस्तथा ॥३७॥
हयग्रीवःशंकुशिरायेचत्रिपुरवासिनः ॥ पौलोमाःकालकेयाश्चप्रल्हादाद्यामहाबलाः ॥ ३८ ॥ वाहनान्पूजयंतस्तेदंशितादुष्टचेतसः ॥
गजानारुरुहुःसर्वेरथानन्येचकाश्यपाः ॥ ३९ ॥ अश्वैःकेचिच्चनिर्याताःसूकरैर्गर्दभैर्मृगैः ॥ सिंहैरन्येखरैरन्येर्बस्तैःपक्षिभिर्निर्ययुः ॥
॥ ४० ॥ आनकान्वादयंतश्चशंखानन्येचशत्रवः ॥ अग्रेगतामहावीर्य्याः सेनायाध्वजधारिणः ॥ ४१ ॥ दैत्यानांचसमुद्योगंवीक्ष्य
शंकितमानसः ॥ देवदूतोमहाबुद्धिर्नाम्नाशौनकचाशुगः ॥ ४२ ॥ कथयामासचेंद्रायसहाय्यंमंथराकृतम् ॥ देवराजोमहातेजादेवानाज्ञा
पयत्तदा ॥ ४३ ॥ वध्यतांदैत्यसंघानांबलंसर्वंहिदेवताः ॥ देवराजेनचाज्ञप्तादेवाः सर्वेचनिर्गताः ॥ ४४ ॥ गंधर्वाएवगायंतिदे
वानामग्रतोमुने ॥ केतनैः शोभमानाश्चकंपमानैश्चवायुभिः ॥ ४५ ॥ गजराजंसमारुह्यवज्रपाणिःसुरारिहा ॥ उदन्वानिवदेवानां
दैत्यानांबलमाबभौ ॥ ४६ ॥ पृथिव्यांचाभवद्युद्धंजनानांभयकारकम् ॥ द्वंद्वयुद्धंमहाभीमंदेवदानवयोर्महत् ॥ ४७ ॥ देवैः
पराजितादैत्याःस्मरंतोमंथरागिरम् ॥ निर्ययुः शरणंतस्याश्चात्मत्राणायभीरवः ॥ ४८ ॥ मंथराचमहामायादेवानांनाशहेतवे ॥
निर्जगामगृहात्तूर्णं माकाशंचात्मविद्यया ॥ ४९ ॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेदशमोऽध्यायः ॥ १० ॥ ॥छ॥

॥ लोमशउवाच ॥ तत्रस्थितान्शुनासीरान्गणयामासतत्क्षणम् ॥ आदित्यांश्चमहेंद्रादीनश्विनौमरुतस्तथा ॥१॥ विश्वेदेवान्वसूंश्चैवरु
द्रान्वीरान्विनायकान् ॥ संख्यांकृत्वाचसर्वेषांहस्तेपाशान्समादधे ॥ २ पाशैर्बबंधदेवानांविमानानिचवाहनान् ॥ पातयामासभूमौचगज
राजंमहाबलम् ॥ ३ ॥ आखंडलोपिवैशीघ्रंगजपीठाच्चवेगतः ॥ पलायितोगजंत्यक्त्वादेवान्सर्वांश्चगोत्रभित् ॥ ४ ॥ ग्राहंवैवरुणस्यैवबस्तं
चाग्नेस्तथैवच ॥ वायोर्मृगंतथाशीघ्रंदेव्याःसिंहंमहाबलम् ॥ ५ ॥ आदित्यानांतथाचाश्वान्वायुवेगसमान्जवे ॥ मूषकंचगणेशस्यनीलकंठ
स्यनंदिनम् ॥ ६ ॥ कुमारस्यमयूरंचतथाचान्यान्बबंधसा ॥ माहिषंयमराजस्यशिविकांधनदस्यच ॥ ७ ॥ स्यंदनंसोमराजस्यबबंधमं
थराभृशम् ॥ बध्वासर्वान्महाचंडीपाशान्जग्राहपाणिना ॥ ८ ॥ गृहीत्वाकर्षणंचक्रेदेवानांसत्वशालिनाम् ॥ लज्जिताश्चाभवन्देवावीक्षंतश्च
परस्परम् ॥ ९ ॥ गंधर्वाश्चतदासर्वेजगदुर्निर्जरान्प्रति ॥ गंधर्वाऊचुः ॥ क्वगतोमघवादेवोहित्वाचाभ्रमुवल्लभम् ॥ १० ॥ अहल्यासंगकर्ता
चदेवराजोनदृश्यते ॥ क्वचास्तिगुरुपत्न्यांचगामीचंद्रोनिशाकरः ॥ ११ ॥ क्वचास्तिरुद्रोजगतःप्रलयेनिरतःसदा ॥ स्त्रीरूपस्ययोविष्णो
रधावत्पृष्ठतःपुरः ॥ १२ ॥ क्वचास्तिधनदोराजारणकामोहिमंदधीः ॥ पार्वत्यामुखपद्मेनपिंगत्वंप्रापचक्षुषि ॥ १३ ॥ क्वाचास्तिसुरा
चार्योभ्रातुःपत्न्यांचभोगवान् ॥ भोगएवरताःसर्वेनचसंरक्षणेसुराः ॥ १४ ॥ अस्माकंपीड्यमानानांबलेःस्वस्त्रारणाजिरे ॥ विनिंदंतस्तदा
देवान्गंधर्वारणपीडिताः ॥ १५ ॥ विश्वावसुर्हिगंधर्वोगंधर्वान्स्वानतर्जयत् ॥ विश्वावसुरुवाच ॥ कुगीतंनैवगायंतुसदादेवैश्चपालिताः ॥
॥ १६ ॥ गुणानेषांपरित्यज्ययूयंवैत्ववगुणेरताः ॥ यथाकोलोवनेभुंक्तेत्यक्त्वासर्वफलंविषम् ॥ १७ ॥ नारायणस्यचांगानिदेवाह्येतेमहा
बलाः ॥ एतान्निंदंतियेपापास्तेवैनरकगामिनः ॥ १८ ॥ निंदंतिदेवान्खलुपापमूढाः साधूंश्चविप्रान्खलुवैष्णवांश्च ॥ तीर्थानिसिंधूंश्चव्रता

न्यमांश्चतेवैगमिष्यंतियमालयंच ॥ १९ ॥ माननीयंवचोह्येषांकर्मचैषांक्वचित्क्वचित् ॥ तस्माद्यशोहिगायंतुसुराणांप्रधनेबुधाः ॥ २० ॥
एतेक्षणाच्चजेष्यंतिदैत्यान्विष्णोर्विभूतयः॥सदालाभोजयस्तेषांयेषांविष्णुःप्रसीदति ॥ २१ ॥ निर्भर्त्सिताश्चतेसर्वेगंधर्वाःस्वेनस्वामिना॥
लज्जिताश्चाभवन्सर्वेजगुर्देवान्महास्तवैः ॥ २२ ॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेमंथराचरितेएकादशोध्यायः ॥ ११ ॥
॥ ॥ लोमशउवाच ॥ ॥ तदादेवामहात्मानःस्वंस्वंगीतिंनिशम्यवै ॥ मंथराहननंयत्नंचक्रुस्तेरणमंडले ॥ १ ॥ ॥ देवाऊचुः ॥ हे
महेंद्रमहाबाहोमंथराहननेयत्न ॥ अज्ञातोकान्यथाभूमौबध्वाकर्षतिमानवः ॥ २ ॥ तथास्माकमियंपापाकुरुतेचरणाजिरे ॥ एतांजहि
महाधूर्त्तांत्वंवधेनहिदोषभाक् ॥ ३ ॥ ॥ सूतउवाच ॥ ॥ देवैरुक्तश्चमघवावधेनास्यामनोदधे ॥ स्त्रीत्वाच्चदेवराजोहंकथंचाकरवं
वधम् ॥ ४ ॥ सागस्सुखलुयोषित्सुप्रहरंतिनमानवाः ॥ किंपुनर्मद्विधाः पापंकुर्वंतेनहित्वीदृशम् ॥ ५ ॥ वाक्यंनिशम्यतेदेवाबला
रातेर्मुखोद्गतम् ॥ ऊचुःपरस्परंलेखाइंद्रवाक्येनविस्मिताः ॥ ६ ॥ इंद्रेणचकृतासंधानाहंहन्मीतिमंथराम् ॥ तस्माच्चमनसाविष्णोः
शरणंवधसंकटे ॥ ७ ॥ यामोनिश्चित्यचादित्याः पादपद्मंहरेर्हृदि ॥ धारयामासुरव्यग्रामंथराहननोद्यताः ॥ ८ ॥ नारदोपि महायो
गीवैकुंठेहरिमीश्वरम् ॥ न्यवेदयतदेवानांसंकटंमंथराकृतम् ॥ ९ ॥ तच्छ्रुत्वाभगवान्शीघ्रंबबंधासिमहाबलः ॥ नंदकंनामचक्रंचसुदर्श
नमितीरितम् ॥ १० ॥ पांचजन्यंमहाशंखं गदांकौमोदकींतथा ॥ स्कंधेदधारशार्ङ्गचकटौतूर्णींश्रियः पतिः ॥ ११ ॥ नभोनिभंमहाचर्मह
स्तेनैकेनपंकजम् ॥ पीतांबरंसमाविष्टचगरुडोपरिचारुहत् ॥१२॥ जगामपार्षदैः सार्द्धंसमरेदेवदैत्ययोः ॥ चामरैर्वीज्यमानश्चश्वेतच्छत्रेण
राजितः ॥ १३ ॥ पार्षदैः सेव्यमानश्चतार्क्ष्येणस्तोत्रवाञ्जनाः ॥ नारायणोहिविश्वात्मादेवानांरक्षकः सदा ॥ १४॥ आजगाममहासंख्ये

देवानांरक्षणायच॥तमायांतंसमीक्ष्याथसुराःपरमहार्षिताः॥१५॥ उत्थिताःसमरेशीघ्रंप्राणांस्तन्वइवागतान्॥पिबंतइवचक्षुर्भ्यांलिहंतइव॥
जिह्वया॥१६॥जिघ्रंतइवनासाभ्यांश्लिष्यंतइवबाहुभिः॥प्रणेमुःसकलालेखाःशिरोभिश्चरणौहरेः॥१७॥ तुष्टुवुःप्रणताविष्णुंफुल्लपंकजलोच
नम्॥कोटिविद्युन्निभंवस्त्रंदधतंघनविग्रहे ॥ १८ ॥ दधानंकौस्तुभंकंठेलक्ष्म्याविभ्रमदर्पणम् ॥ वासुदेवंजगन्नाथंजगतांकारणंपरम् ॥१९॥
भुजैश्चविटपाकारैःसर्वाभरणभूषितैः ॥ तिष्ठंतंपरयालक्ष्म्याकल्पवृक्षमिवापरम् ॥ २० ॥ देवारियुवतिगंडतिलकश्रीविलोपिभिः ॥ आ
युधैर्मूर्तिमद्भिश्चकूजद्भिश्चमहास्वनम् ॥ २१ ॥ त्यक्तानंतविरोधेनकनिष्ठेनारुणस्यच ॥ मुकुलीकृतहस्तेनविनीतेनत्वद्युपास्थितम् ॥२२॥
अनुग्रहंप्रकुर्वंतंविशदैर्लोचनैर्जनाः ॥ नमस्कृत्यमहादेवमूचुर्देवाःसवासवाः ॥ २३ ॥ ॥ देवाऊचुः ॥ तुभ्यन्नमोजगत्साक्षिन्नमोविश्वसृजे
विभो ॥ विश्वंविभर्षिचिच्छक्त्याकल्पांतेविश्वहारिणे ॥ २४ ॥ उत्पत्तावजरूपोसिप्रलयेशिवविग्रहः ॥ पालनेत्वंमहाविष्णुःसत्वाद्यैश्च
त्रिधाकृतिः ॥ २५ ॥ नीलादीनांचसंयोगाद्विभातिस्फटिकोयथा ॥ यथाह्येकंजलंदिव्यंरसेषुबहुधेयते ॥ २६ ॥ तथैवत्वंमहाबाहोचे
तनाचेतनेषुच ॥ अमेयोह्यतिसर्वश्चत्वनर्थोसर्ववस्तुभाक् ॥ २७ ॥ अजितस्त्वंमहाबाहोजितोभक्तैश्चगीयते ॥ अव्यक्तंत्वांचवेदाश्चव
दंतिव्यक्तकारणम् ॥ २८ ॥ देहेस्थितंनिजानंदंह्यकामंतपकारणम् ॥ दयालुंत्वांहिभोदेवनजानातिविमूढधीः ॥२९॥ पुराणंजरयामुक्तं
सर्वज्ञंनविदुर्जनाः ॥ सर्वप्रभुरनीशस्त्वंसर्वयोनिस्त्वमात्मभूः ॥ ३० ॥ त्वमेकः सर्वभूतानांशरीरेव्याप्यातिष्ठसि ॥ चतुर्भुजचतुर्वर्गश्चतु
र्वेदाश्चतुर्युगाः ॥ ३१ ॥ चातुर्वर्ण्यंचत्वत्तोभून्नाभौचापिचतुर्मुखः ॥ ३२ ॥ सामादिवेदैरुपगीयसे त्वंजलेषुसुप्तोखलुसप्तकेषु ॥ कृशानुव
क्रेवतसप्तलोकैर्विराजमानोह्यादिसप्तसप्ते ॥ ३३ ॥ मनसानिगृहीतेनयोगिनस्त्वामुपासते ॥ अजस्त्वंजन्मधारीचनिरीहस्त्वंचशत्रुहा ॥

॥ ३४ ॥ योगनिद्रामीलिताक्षःसदाजागर्षिभोविभो ॥ आम्नायैःर्वहुधामार्गाःकृतापुरुषसिद्धये ॥ ३५ ॥ स्रोतांसीवचजान्हव्याःपतिष्णू
निसारित्पतिम्॥त्वत्समर्पिताचित्ताश्चत्वद्भक्तास्त्वदुपासकाः ॥ ३६ ॥ गतिस्तेषांमहावाहोभुक्तिमुक्तिप्रदोभवान् ॥ यथासर्वेषुभूतेषुत्वाका
शोव्याप्यातिष्ठति ॥ ३७ ॥ तथासर्वेषुभूतेषुभिन्नाभिन्नोविराजसे ॥ पुनासिसकलंनाम्नात्वंपापाद्भवनंप्रभो ॥ ३८ ॥ किंपुनःस्मरणेनापि
दर्शनस्पर्शवंदनैः ॥ समुद्रादिवरत्नानितेजांसीवविभावसोः ॥ ३९ ॥ तथात्वत्तोप्यपाराणिचरितानिलसंतिच ॥ प्राप्तव्यंतेस्तिसर्वंच
नचाप्राप्यंहिकिंचन ॥ ४० ॥ अनुग्रहायभक्तानांजन्मकर्मविभर्षिहि ॥ महिम्नस्तवचांतंचश्रुतयोनैवलेभिरे ॥ ४० ॥ एवंप्रसादयामासुः
सुरानारायणंहरिम् ॥ यथार्थकथनंतस्यनास्तुतिः परमात्मनः॥ ४२ ॥ तस्मैन्यवेदयन्वृत्तंहरयेप्रभवेनिजम् ॥ निरोधोदेवचास्माकंसंग
रेमंथरोदधौ ॥ ४३ ॥ अस्माकंतारणेशक्तोभवान्व्यसनसागरात् ॥ लोमशउवाच ॥ निशम्यवाक्यंदेवानांभगवानंबुजेक्षणः ॥ ४४ ॥
उवाचतान्नतान्देवान्मग्नान्व्यसनसागरे ॥ श्रीभगवानुवाच ॥ दूरेगच्छतुकष्टंवोमयितिष्ठतिनायके ॥ ४५ ॥ किंकरिष्यंतिदैत्याश्चकिंक
रिष्यतिमंथरा ॥ इदानींविद्रविष्यंतिमयियत्नेकृतेसति ॥ ४६ ॥ युष्माभिश्चकृतंस्तोत्रंयेपठिष्यंतिमानवाः ॥ तेषांकामवरान्दास्येनित्यं
चैवास्यपाठतः ॥ ४७ ॥ सर्वतीर्थावगाहस्ययत्फलंजायतेक्षितौ ॥ तत्फलंजायतेशीघ्रंस्तोत्रराजस्यपाठतः ॥ ४८ ॥ किंवहूक्तेनभोदेवाः
सर्वपापक्षयंकरम् ॥ स्तोत्रंचदेवदेवस्यशृण्वन्यातिपरांगतिम् ॥ ४९ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेद्वादशोऽध्यायः ॥ १२॥
॥ श्रीभगवानुवाच॥यथोच्यतेमयादेवास्तथैवपाकशासनः॥करोतुशीघ्रंसंग्रामंमंथरादेहनाशने ॥१॥स्त्रीवाथपुरुषोवापिषंढोवापिनराधमः॥
नतेषांहननेपापंयुद्धेतुसमुपस्थिते॥२॥तस्मात्प्रयाहिभोवज्रिन्मंथराहननेयुधि॥लोमशउवाच ॥ आज्ञप्तोहरिणाचेंद्रोत्यगमन्मंथरांप्रति ३॥

दैत्यैःसहतदादेवायुयुधूरणमंडले ॥ तदाचमंथरापापायुद्धेदृष्ट्वाशचीपतिम् ॥ ४ ॥ चकारबहुधोपायंपुरंदरनिवारणे ॥ ॥ इंद्रउवाच ॥
कुत्रयास्यसिपापेत्वंवैरंकृत्वामयासह ॥ ५ ॥ सहस्रारेणवज्रेणतताडेंद्रोहिमस्तके ॥ मंथरायाश्चक्रोधेनवशीभूतोहिवृत्रहा ॥ ६ ॥ वज्रपाते
नतस्याश्चमस्तकंघूर्णितंबहु ॥ पपातमूर्च्छिताभूमौकरंमूर्ध्निव्यधापयन् ॥ ७ ॥ हाहेतिरुदतीचोच्चैःपुनर्हाहेतिकुर्वती ॥ ननादसुमहानादं
लुठंतंधिरणितले॥८॥दिशश्चनादिताःसर्वाःपक्षिणश्चापतन्तदा॥ बृक्षाश्चकंपिरेसर्वेजनास्त्रासमुपागमन्॥९॥दानवाश्चापितांदृष्ट्वापतिता
मिंद्रताडिताम् ॥ विद्रवंतिरणंत्यक्त्वासर्वेप्राणस्यलिप्सया ॥ १० ॥ पतितान्यतमानांश्चपश्यन्तिस्मनकातराः ॥ पतितांश्चविलंघंतः
पश्यन्तोनहिपृष्ठतः ॥ ११ ॥ पराजयोहिसंजातोदैत्यानांविष्णुसन्निधौ ॥ जयोबभूवदेवानांसमरेविष्णुसन्निधौ ॥ १२ ॥ संदेहोत्रनकर्त्त
व्यः समोविष्णुश्चसर्वदा ॥ येषांतुयादृशीबुद्धिःफलदातातथैवसः ॥ १३ ॥ दानवानांचशत्रुश्चशत्रुभावेकृतेसति ॥ देवतानांतथामित्रं
मित्रभावेकृतेसति ॥ १४ ॥ नहिविषमतातस्यकल्पवृक्षोपमोहरिः ॥ शुनासीरस्तदादेवोमूर्छयित्वाचमंथराम् ॥ १५ ॥ आजगामहरेःपा
र्श्वंदेवराजःशचीपतिः ॥ जगृहेचहरेर्द्वंद्वंपादपद्मंपुरंदरः ॥ १६ ॥ तवप्रतापाद्देवेशपारंप्राप्तोरणोदधेः ॥ गच्छदेवनिजंस्थानंमयाज्ञप्तोरणा
जिरात् ॥ १७ ॥ एवंत्वयासदाकार्यंदेवानांरक्षणंरणे ॥ श्रीभगवानुवाच ॥ एवंभवतुवोदेवावचनंनानृतंक्वचित् ॥ १८ ॥ युष्माकंरक्षणं
नित्यंकरिष्येहंरणाजिरे ॥ लोमशउवाच ॥ आश्वास्यहिसुरान्विष्णुर्जगामचनिजालयम् ॥१९॥ ययुर्देवानिजंस्थानंवादयंतश्चदुंदुभीन् ॥
मुदापरमयायुक्ताबुभुजुःस्वर्गजंसुखम्॥२०॥अथदैत्याःसमास्वस्थागतान्देवान्विलोक्यच॥आगतासमरेशीघ्रंमंथरांप्रविलोकितुम्॥२१॥
दृष्ट्वासमागतान्दैत्यान्मंथराचाब्रवीदिदम् ॥मंथरोवाच॥ पश्यंतुदैत्यामूर्धानंपाकशासनताडितम्॥२२॥स्त्रियंमांघातयित्वातुयूयंधूर्त्ताःप

लायिताः ॥ गृहंनयतमांशीघ्रंदोलामारोप्ययत्नतः ॥ २३ ॥ विदीर्णंमेशिरोनूनंग्रीवाभग्नाविशेषतः ॥ भग्नाकटिश्चमेवज्रात्पृष्ठेजातोहिकूबरः ॥ २४ ॥ लोमशउवाच ॥ बहुधारुदतीह्येवंदैत्यानांशृण्वतांतदा ॥ असुरास्तुभुजैस्तांचदोलामारोपयन्शनैः ॥ २५ ॥ आनीताशिविकासाचगृहंप्रतिरणाजिरात् ॥ २६ ॥ सातुतैर्भयसंविग्नैर्वेश्ममध्येवतारिता ॥ उच्चैःसारुरुदेतीव्रंस्त्रीभिश्चपरिवारिता ॥ २७ ॥ ॥ इति श्रीसत्योपख्यानेसूतशौनकसंवादेत्रयोदशोऽध्यायः॥१३॥

लोमशउवाच॥ दैत्यपत्नीश्चसादृष्ट्वामंथरावाक्यमब्रवीत्॥हस्ताभ्यांताडतीवक्षः क्रोशंतीचसुरद्विषः ॥ १ ॥ ॥मंथरोवाच॥ ॥ पश्यंतुमेशरीरंहिवज्रघातेनपीडितम् ॥ युष्माकंस्वामिनामर्थेजाताहंचेदृशीरणे ॥ २ ॥ स्त्रिय ऊचुः ॥ अत्यर्थंजल्पसेमन्देह्यग्रेऽस्माकंनलज्जसे ॥ अबलाश्चस्त्रियोनित्यंबलंतासांनकुत्रचित् ॥ ३ ॥ ऋतेभोगविलासाच्चकामयुक्तनरेषुच ॥ आत्मनःपौरुषंचंडिप्राथितुंजगतीतले ॥ ४ ॥ गत्वात्वंरणमध्येचदेवदानवसंकुले ॥ अन्याऊचुः ॥ आलयःशृणुतचास्माकंवाक्यंचंडचाश्चहृद्गतम् ॥ ५ ॥ इयंयाताहिसमरेसुखंदर्शयितुंसुरान् ॥ यथागृह्णंतिमांदेवामोहिताममरूपतः ॥ ६ ॥ अन्याआहुः स्तनौयातादेवेभ्योदार्शितुंरणे ॥ गंडशैलप्रतीकाशोभुजावुत्थायशीघ्रतः ॥ ७ ॥ अपराऊचुः ॥ नूनंहिविस्मृतश्चेंद्रःकर्णौत्वस्यानकृंतितौ ॥ नासिकायानछेदश्चकृतस्तेनमहात्मना ॥ ८ ॥ अपराआहुः ॥ कदाप्येवंनकर्त्तव्यंयोभीतोरणमंडले ॥ पराजयेतुहास्यंस्याद्विजयेनाहिशोभनम् ॥९॥ अपराआहुः ॥ पुनर्गच्छपुनर्गच्छदेवानांविजयेच्छया ॥ इदानींगम्यतांमंदेगत्वाजेष्यसिवैसुरान् ॥ १०॥ ॥ लोमशउवाच ॥ ॥ इत्येवंजहसुस्तांचदैत्यपत्न्योगृहांगणे ॥ मंथरारुरुदेतीव्रंकराभ्यांनिघ्नतीशिरः ॥ ११ ॥ प्राहवाक्यंमहापापाभर्त्सयंत्यसुरस्त्रियः ॥ मंथरोवाच ॥ ॥ किंब्रवीम्यात्मनःपापंयन्मयाचरितंहितत् ॥ १२ ॥ उपकारायया ताहंदुःखितापरिभर्त्सिता ॥ पुरुहूतो

पिपापात्मायःस्त्रियंजघ्निवान्रणे ॥ १३ ॥ निजौजसानदोषोस्तिदोषोयंचक्रपाणिनः ॥ जनार्दनोपदिष्टेनवज्रेणेंद्रेणताडिता ॥ १४ ॥
कामचारोहिविष्णुश्चधर्मवक्तानधर्मभाक् ॥ नप्रहरंतियोषित्सुमहात्मानोनराःक्वचित् ॥ १५ ॥ एवंवदन्सपापात्माभृगुपत्नींचजघ्निवान्॥
मयाश्रुतंपुराणेषुताडकांयमयातनाम् ॥ १६ ॥ दयासिंधुर्दाशरथिःपूतनांनंदनंदनः ॥ नयिष्यतिमहाबाहुर्विष्णुर्मांयाविनांवरः ॥ १७ ॥
परस्त्रीषुनगंतव्यमितिवेदेषुचाब्रवीत् ॥ स्वयंयातोहिवृंदायांपत्युस्तस्यावधायच ॥ दयांकुरुतभोलोकाश्चेतनाचेतनेषुच ॥ १८ ॥ प्रल
यंकुरुतेचैव लोकस्यास्ययुगक्षये ॥ कर्मयत्क्रियतेनेनतन्निरर्थकमेवहि ॥ १९ ॥ जिव्हावृषभपृष्ठेचत्त्वजाकंठेतथास्तनौ ॥ कूबरंचोष्ठपृ
ष्ठेचचकारनहिसार्थकम् ॥ २० ॥ ईदृशंकर्मह्येतस्यभक्तानामपिकथ्यते ॥ प्रऱ्हादेनकृतंकर्मपुरासत्ययुगेस्त्रियः ॥ २१ ॥ दैत्येंद्रंचमहा
बाहुंनाम्नाहिरण्यकशिपुम् ॥ जघाननसिंहरूपेणविष्णुःप्रऱ्हादहेतुना ॥ २२ ॥ ध्रुवस्यश्रूयतांकर्मसंसारेह्यतिदारुणम् ॥ तपसाचहरिंतोष्य
घातयामासभ्रातरम् ॥ २३ ॥ किंबहूक्तेनभोलोकाहताहंविष्णुनाध्रुवम् ॥ यदिजीवामिदेहेनत्त्वनेनैवातिदारुणम् ॥ २४ ॥ विष्णुं
क्लिश्यामिभोदैत्याःपुनर्नकुरुतेयथा ॥ मृत्वाहमन्यदेहेनक्लेशयिष्यामिवैहरिम् ॥ २५ ॥ एवमेवकरिष्यामिभग्नपिंडेनकिंमम ॥
कूबरंममपृष्ठंचतेनाहंव्यथिताभृशम् ॥ २६ ॥ कूबरेणनशोभास्तियुवत्याःपुरुषस्यवा ॥ ॥ लोमशउवाच ॥ एवंचिंतयती
पापाकुब्जाबुद्धिंनिवेश्यसा ॥ २७ ॥ मृतोत्पन्नाचकाश्मीरेकस्यचित्किंकरस्यवै ॥ कैकेय्यासहप्रीतिश्चदृढाजातातयासह ॥ २८ ॥
तयोः स्नेहंपरिज्ञायराज्ञादत्ताचभूभृते ॥ राज्ञादशरथेनापिगृहीताकैकयीप्रिया ॥ २९ ॥ बहुकालेगतेलोकेपूर्ववैरंनविस्मृतम् ॥
विघ्नंचकाररामस्यराज्येचपरमात्मनः ॥ ३० ॥ रामोनारायणः साक्षात्परमात्मानराकृतिः ॥ भूभारहरणार्थायसर्वदेवैश्चप्रार्थितः ॥

॥ ३१ ॥ रावणस्यवधार्थायसीतयासहयात्यसौ ॥ वनानिदंडकादीनिचित्रकुटादिपर्वतान् ॥ ३२ ॥ एतेषांपावनार्थंचप्रयातोदक्षिणां
दिशम् ॥ शोकंकुरुतमालोकारामसंकल्पईदृशम् ॥ ३३ ॥ इतिश्रीसत्योपारव्यानेसूतशौनकसंवादेचतुर्दशोध्यायः ॥ १४ ॥ अयोध्या
वासिनऊचुः ॥ ॥ मंथराचेदृशीपापाअयोध्यांकथमापसा ॥ केनपुण्येनभोस्वामिन्संशयंनुदचोक्तिभिः ॥ १ ॥ लोमशउवाच ॥ हेतुर्मनो
हिसर्वेषांनराणांमुक्तिबंधने ॥ पुरामरणकालेचमंथरावज्रताडिता ॥ २ ॥ सस्मारमनसाविष्णुंक्रोधात्परमसुंदरम् ॥ तेनपुण्यप्रभावेनल
ब्धायोध्यातयाशुभा ॥ ३ ॥ नरोहिमनसायद्यत्ध्यायन्संत्यजतेतनुम् ॥ तत्तदाप्नोतिवैलोकेमनसाध्यातमेवच ॥ ४ ॥ मंथरयाश्रुतंवेदे
साकेतेविष्टरश्रवाः ॥ देवानांकार्यसिद्ध्यर्थंमहाविष्णुर्निवत्स्यति ॥ ५ ॥ रामरूपेणदिव्येनजनतामोहनेनच ॥ तत्राहंचनिवत्स्यामिविघ्ना
र्थंतस्यवैहरेः ॥ ६ ॥ एवंचिंतयतीदुष्टातत्त्याजस्वंकलेवरम् ॥ स्मरणस्यप्रभावेनप्राप्ताऽयोध्यांचमंथरा ॥ ७ ॥ अयोध्येयंमहापुण्यावि
ष्णोश्चनगरीशुभा ॥ अत्रवासाद्धिसर्वेषांविष्णुलोकोभवेन्नृणाम् ॥ ८ ॥ मंथरातुहरेर्लोकंगमिष्यतिनसंशयः ॥ यस्यामनोहिरामेचद्वेषाद्वस
तिसर्वदा ॥ ९ ॥ तस्यामुक्तौनसंदेहोयारामवदनांबुजम् ॥ युवतीनेत्रपुटकैर्द्वेषादपिचपश्यति ॥ १० ॥ द्वेषात्कामाद्भयाल्लोभाद्रामेचित्तं
यथाविशेत् ॥ तथैवकरणीयंहिनराणांमुक्तिमिच्छताम् ॥ ११ ॥ रामेचित्तंचयेषांहिमुक्तिस्तेषांनसंशयः ॥ उतदानतपोयज्ञदीक्षासंस्कार
संक्षमाः ॥ १२ ॥ एतैर्नतुष्यतेरामोयथाभक्त्याजनस्यच ॥ दानादिकंकृतंसर्वंरामेचित्तंनचस्थिरम् ॥ १३ ॥ स्वर्गवासस्तुतैःपुण्यैःपु
ण्यांतेचपतत्यधः ॥ यदिभाग्याद्धिसाधूनांसंगतिर्जायतेक्षितौ ॥ १४ ॥ तदारामस्यभक्तौचनराणांजायतेमनः ॥ विनाभक्त्यानमुक्तिश्च
नराणामंडगोलके ॥ १५ ॥ लोकेभवतुचाश्चर्यंजलाज्जन्मघृतस्यच ॥ सिकतायाश्चतैलंतुयत्नेयातिकथंचन ॥ १६ ॥ विनाभक्तिंनमुक्ति

श्चभुजमुत्थायचोच्यते ॥ यूयंधन्यामहाभागायेषांप्रीतिस्तुराघवे ॥ १७ ॥ वैकुंठेभवतांवासःसंशयोनात्रविद्यते ॥ अयोध्यावासिनः
सर्वेजगन्नाथस्यमूर्त्तयः ॥ १८ ॥ त्र्यंबकेनपुराप्रोक्तंपार्वत्यैतत्रचैकदा ॥ अयोध्यायाश्चमाहात्म्यंवक्तुंशक्तोनचाब्जजः ॥ १९ ॥
इतरेषांचकाशक्तिर्विश्वासाद्रहितात्मनाम् ॥ यत्रनारायणःसाक्षाच्चतुर्द्धाव्यस्यस्वांतनुम् ॥ २० ॥ सदैवरमतेयत्रतस्याःकिंवर्ण्यते
गुणः ॥ इतिसंक्षेपतश्चोक्तंचरितंमंथराभवम् ॥ २१ ॥ ॥ सूतउवाच ॥ ॥ एवमुक्ताययौविप्रोरामदर्शनलालसः ॥ लोम
शस्यचवाक्येननिःसंदेहस्तदाभवत् ॥ साकेतवासिनःसर्वेक्षितौधन्याश्चशौनक ॥ २२ ॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादे
पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ शौनकउवाच ॥ ॥ श्रीपादपद्मंरघुनायकस्यफुल्लंनराणांहृदिभक्तिभाजाम् ॥ तत्रापिचित्तंरमतेत
वैवभृंगोहिभूत्वारासिकेन्द्रसूत ॥१ ॥ राजेंद्रपुत्रस्यवदस्वलीलांसंजीविनींभक्तनरस्यनूनम्॥यस्याःश्रुतौसर्वमिदंहिजातमिष्टादिपूर्तस्यफलं
हिलोके॥२॥ सूतउवाच ॥ शृण्वंतुरामस्यकथांचदिव्यांव्यासप्रसादात्कथयामितुभ्यम्॥ व्यासेनचाप्ताद्विजद्वापरादौश्रीशक्तिपुत्राच्चतृतीय
केयुगे ॥३॥ पराशरःशक्तिसुतोहिविप्रवाल्मीकितःपुण्यकथांपपाठ ॥ तामेवतुभ्यंकथयामिवर्यविमुक्तयेहंभवपाशबंधात्॥४॥भूम्याःपतिः
पंक्तिरथोह्युदारोरामस्यतातोभुविकर्मगोप्ता ॥ रामंसमादायनिजाङ्कमध्येस्थितःसभायांनिजमंदिरस्य ॥ ५ ॥ तस्यांस्थिताःकुंडलधारिण
श्चकेयूरमुद्राभिरलंकृताश्च ॥ उष्णीषयुक्तैर्मुकटैःसुरत्नैर्विभ्राजमानाःसदसिविडौजसः ॥६॥ प्राच्याउदीच्याद्विजदाक्षिणात्याःसर्वेस्थिता
भूपतिसन्निधौच ॥ सर्वाःप्रजाःसर्वरतंचभूपंरामस्यतातंनयनैःपपुश्च ॥ ७ ॥ स्वर्णस्यदंडाहिकरेषुयेषांविचित्ररत्नैर्दृढनिर्मिताश्च ॥ तेवैस्थि
ताद्वारिमहाविभूतेःराज्ञोहिवाक्येनिरताःसदावै ॥ ८॥ गृह्णीष्वभोनाथमहेंद्रतुल्यनतिंनराणांरचिताञ्जलीनाम् ॥ वदंतिचैवंद्विजद्वारिकाश्च

स्वयंविनीताःकरकुड्मलैश्च ॥ ९ ॥ छत्रेणराजापरिरज्यमानस्तुल्येनचंद्रस्यहिमंडलेन ॥ मुक्तामणीनांग्रथितेनदाम्नाचक्षूंषिविप्राह
रताजनानाम् ॥ १० ॥ प्रकीर्णकाभ्यांचविराजमानोहंसद्युतिभ्यांशिरसाशिवाभ्याम् ॥ बंभ्रम्यमानंपरितस्तयोश्चराज्ञोहिछत्रं
शुभवायुनावै ॥ ११ ॥ गंधर्वमुख्याःप्रजगुस्तदानींनटाश्चस्तदाग्रेननृतुर्महीपतेः ॥ श्रीरामचंद्रंद्विजबालरूपंवाक्यैःप्रियैर्लालयतः
स्वपुत्रम् ॥ १२ ॥ श्यामंशुचिमेघनिभंक्षुमाभंदूर्वाप्रभंनीलमणिंचरामम् ॥ सुवर्णसूत्रैरचितांचपट्टिकांमूर्छांदधानांमणिचित्रितां
च ॥ १३ ॥ चंद्रोयथाराजतिचाष्टमीषुतथाहिरामस्यललाटफलकम् ॥ तस्मिन्दधानंशरभोद्भवस्यविशेषकंसाधुजनस्यमोह
नम् ॥ १४ ॥ भ्रुवौचनीलौधनुराकृतीचताभ्यांचसंसूचितभूर्यनुग्रहम् ॥ भक्तेषुतत्रैवचकालवासस्तेनैवलोकःप्रलयंसमेति ॥ १५ ॥
नेत्रद्वयंह्यंजनरंजितंचविलोकयंतंपितरंचतेन ॥ चापल्ययुक्तेनमनोहरेणखंजस्यमीनस्यचचंचलत्वे ॥ १६ ॥ नासाशुकस्येवसमुन्नता
चतयैवरम्यंपितुरंकदेशे ॥ गंडौचरम्यौशुभकुंडलाभ्यांपरीवृताभ्यामलकैःसुनीलैः ॥ १७ ॥ नीडंहिवेदस्यसुपर्णमूर्त्तेस्तत्रैवलीनस्यत
मेववक्ति ॥ कर्णौचदिव्यौरघुनंदनस्यदंताश्चबीजानितुदाडिमस्य ॥१८॥ ओष्ठद्वयंदाडिमपुष्पभासंहास्यंनरोन्मादकरंदधानम् ॥ ओष्ठा
दधस्ताच्चिबुकंचसुंदरंतस्यैवगर्तेनृपहार्षिमग्ना ॥ १९ ॥ ततोह्यधस्ताद्रघुनायकस्यकंठंत्रिरेखंजलजस्यनाम्ना ॥ स्तनद्वयंनीलमणेश्चभिन्नं
तथैवरामस्यनिबोधवक्षः ॥ २० ॥ विशोभमानंनखरैर्हरेश्चजांबूनदस्वर्णपरिष्कृतैश्च ॥ नरेंद्रपुत्रस्यचनाभिकुंडंतत्रैवजातंविधिलोक
पद्मम् ॥ २१ ॥ नितंबबिंबंरघुनायकस्यसूत्रेणनद्धंमणिचित्रितेन ॥ उरूचश्यामौपृथुलौचपीनौबिभ्रंतमेवंशिशुरूपरामम् ॥ २२ ॥
जानूचजंघेप्रपदेचादिव्येपादांगुलीभिर्नखचंद्रिकाश्च ॥ चिन्हानिसर्वाणिपदारविंदेप्रदर्शयंतंनिजसेवकेभ्यः ॥ २३ ॥ पदंचधेन्वाःकुलिशं

चविंदुंतथाध्वजंह्यमृतकुंडकंच ॥ वज्रांकुशंजंबुफलंचमत्स्यंधनुर्महेंद्रस्यतथात्रिकोणम् ॥२४॥ वज्रंचपद्मंचतथायवंचषट्कोणकंचाथ
मनुष्यमेकम् ॥ शंखंचचक्रंचतथाष्टकोणमूर्द्ध्वांचरेखांघटस्वस्तिकेच ॥ २५ ॥ हिमांशुमूर्तिश्चतथैवचार्द्धमेतानिचिन्हानिपदादधंतम् ॥
इत्थंनरेशःशिशुरूपरामंपीनेनगुप्तंशुभकंचुकेन ॥ २६ ॥ संलालयानोयुवतीभिरिष्टस्तथानरैःसाध्वितिवाच्यमानैः ॥ व्रतेषुश्रेष्ठाकिलया
तिथीनांरुद्रेणख्यातिर्भुवनेषुतस्याः ॥२७॥ तस्यांतिथौकल्पमहीरुहस्यछायांनिविष्टोलालपन्सुपुत्रम् ॥ देवामहेंद्रप्रमुखाश्चसर्वेस्वर्गस्य
द्वारेवतमज्जनाय॥२८॥चतुर्युगेषुहरिवासरेषुस्नानंहिपुण्यंद्विजवैसरय्वाः ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादषोडशोध्यायः॥१६॥
॥ सूतउवाच ॥ ॥ इंद्रादयोलोकपालाऋषयःपितरस्तथा ॥ समाजग्मुरयोध्यायांमज्जनायमहामुने ॥ १ ॥ इंद्रोरथंसमारुह्यसहस्राश्वपता
किनम् ॥ नानावस्तुसमाकीर्णंनानाचित्रोपशोभितम्॥२॥ कृत्रिमैःपक्षिवृंदैश्चईहामृगसमन्वितम् ॥ रचितंविविधोपायैःस्वर्णकीलदृढीकृत
म्॥३॥ ईदृशंरथमास्थायजगाममघवाप्रभुः ॥ शिवोपिस्वगणैःसार्द्धमारुह्यनंदिनंवृषम्॥४॥पार्वत्यासहचासीनःकपर्दीसर्पभूषणः॥सटायां
स्वर्णवर्णायांदधानोहरिपादजाम्॥५॥गणैश्चविविधाकारैर्विकटैर्भैरवैर्वृतः ॥६॥ वामनैःपिंगलैःश्वेतैर्विविधैश्चगणैर्वृतः॥ललाटेचार्द्धचंद्रेणशो
भमानोहिभस्मना॥७॥गजचर्मपरीधानःशूलहस्तोदिगंबरः ॥ चचालसोपिनिर्णेकुंसरय्वांहरिवासरे ॥८॥ ब्रह्माहंसंसमारुह्यवेदवक्ताचतुर्मु
खः॥पादेरक्तंमुखेरक्तंकैलासमिवरत्नकैः ॥ ९ ॥ शुक्लंशुक्लघटाकारंराजहंसंमहाप्रभम् ॥ तमास्थायमहादेवःपरमेष्ठ्यंबुजासनः ॥ १० ॥
गणेशःपर्वताकारोमूषकंगजसन्निभम् ॥ समास्थायजगामाथसरय्वांहरिवासरे ॥ ११ ॥ तुंदिलश्चैकदंतश्चदीर्घकर्णोगजाननः ॥ विष्णु
भक्तोगणाधीशोहस्तेपरशुधारकः ॥ १२ ॥ आखुपृष्ठेसमासीनोगजपृष्ठेयथाहरिः ॥ गंधर्वाश्चतदासर्वेअप्सरोभिश्चशोभिताः ॥ १३ ॥

विमानेचास्थिताःसर्वैंकिंकिणीजाळमालिनि ॥ पताकिनिमहादिव्येसर्वाश्चर्य्यसमन्विते ॥ १४ ॥ सहस्राणांशतंविप्रविमानानिप्रतस्थिरे ॥
देवानांध्वजिनीचाथप्रयातानगरंप्रति ॥ १५ ॥ साकेताख्यंमहादिव्यंसर्वदेवनमस्कृतम् ॥ ऐरावतोबभूवाग्रेध्वजिन्यानमुचिद्विषः ॥१६॥
केतनानिसुरक्तानिदीर्घदंडानिचाग्रतः ॥ प्रयातानिह्ययोध्यायामार्गमुद्दिश्यवेगतः ॥ १७ ॥ गायतांवाद्यतांचापिगंधर्वाणांप्रहर्षतः ॥ मृदं
गानांप्रणादेनतथागीतेनचांबरम्॥१८॥श्रुतंशब्दगुणंपूर्वंतथाज्ञातंनरैर्नभः ॥ वायुमार्गेणतेसर्वैंप्रास्थिताश्चसहस्रशः ॥ १९ ॥ स्वनवंतिविमा
नानिकिंकिणीभिश्चनाकिनाम् ॥ अभिलाषेणदेवानांविमानानिप्रयांतिवै ॥२०॥ वायुनाध्रियमाणानितपःसत्यनिवासिनाम् ॥ जनलोका
न्महर्लोकंध्रुवलोकंसमागमन्॥२१॥ध्रुवलोकान्महर्षीणांसप्तानांपुनरापतन्॥स्वर्गलोकंतथापश्यन्भुवर्लोकंतथापतन् ॥२२॥चंद्रमंडलमा
वार्यसूर्यलोकंचतेगमन् ॥ आकाशगंगासंपर्कादामोदैःकल्पशाखिनाम् ॥२३॥ युक्तेनवायुनासर्वेसूर्य्यतापंनतेविदुः ॥ क्वचिद्गच्छंतिवेगेन
केतनैर्वायुनेरितैः॥२४॥क्वचिद्गच्छंतिमेघेषुविमानानिचमंदतः॥अश्वागजारथाःसर्वेमेघेषुनचकाशिरे ॥२५॥वासवस्यमतंगस्तुसमूहेषुपयो
मुचाम् ॥ रराजगगनेपूर्णःशरदीवनिशाकरः ॥२६॥ वेगाच्चवाहनानांचमेघाअपिह्यधोभवन् ॥ स्यंदनानांचचक्रेषुगजदंतेषुतेभ्रमन्॥२७
पर्वताइवदृश्यंतेगगनेपक्षकैःसह ॥ पुनरुत्प्लुत्यतेसर्वेददृशुर्मेदिनीतलम्॥२८॥द्वीपांश्चसागरांश्चैवपर्वतांश्चवनानिच ॥सप्तभिःसागरैश्चैवशो
भितंधरणीतलम्॥२९॥भूदेव्यासर्वगात्राणिवृतानिवलयैरिव ॥ मध्येपृथिव्यामेरुंचकनकस्यसुमंयथा ॥३०॥योजनानांसहस्राणिचतुरशी
तिमुच्चकैः ॥ जंबूद्वीपस्यखंडानितेपश्यन्नवसंख्यया ॥ ३१ ॥ तत्रापिचाञ्जनाभेद्राक्प्रणेमुःकरकुंडलैः ॥ सूतउवाच ॥ तेषांप्रणामंतत्दृ
ष्ट्वापौलोमीपतिमब्रवीत् ॥ ३२ ॥ हास्यंप्रकुर्वतीपद्मंनर्तयंतीकरेणसा ॥ शच्युवाच ॥ ब्रूहिमह्यंत्रिलोकेशप्रणमंतिदिवौकसः ॥ ३३ ॥ क

स्मैदेवायतीर्थायदेशायवासुरेश्वर ॥ इद्रंउवाच ॥ शृणुदेविप्रवक्ष्यामिकारणंनमनस्यच ॥ ३४ ॥ इदंभरतखंडंचकर्मभूमिरियंशुभा ॥
अत्रदेवान्समाराध्यप्रयांतित्रिदशालयम् ॥ ३५ ॥ क्रतूनांचशतंकृत्वाप्राप्तोहंदेवराजताम् ॥ पुण्यानिबहुशःकृत्वात्वमप्यत्रैवमान
दे ॥ ३६ ॥ अत्रत्याहिजनाःसर्वोंहिमवाद्विंध्यमध्यगाः ॥ ३७ ॥ शुभकर्मकराश्चात्रधरण्यांचवरानने ॥ प्रयांतिपरमंस्थानंदिव्यं
सुकृतिनांपदम् ॥ ३८ ॥ इदंपश्यप्रियेस्थानंजगन्नाथस्यसागरे ॥ मुक्तयेकिलविश्वस्यब्रह्मणास्थापितंपुरा ॥ ३९ ॥ इदंक्षेत्रंमहापुण्यंखं
डेभरतसंज्ञके ॥ इयंकाशीमहापुण्याविश्वनाथकृतालया ॥ ४० ॥ यत्रगंगामहापुण्याहरिपादसमुद्भवा ॥ गयाक्षेत्रंमहापुण्यंपितॄणांमु
क्तिदंयतः ॥ तत्त्वंपश्यमहाभागेतीर्थराजंपुनःशुभम् ॥ ४१ ॥ यत्रगंगाचकालिंद्यासरस्वत्याचसंगता ॥ पश्यत्वंचित्रकूटंचशृंगैरुल्लिखतीवखम्
॥ ४२ ॥ महेंद्रंदुर्दुरंचास्यानितंबाविवतौक्षितेः ॥ ऋक्षवंतंचसह्यंचभूदेव्याश्चकुचाविव ॥ ४३ ॥ तौविलोकयभोभद्रेवेंकटेशंनमस्कुरु ॥
रामेश्वरंसेतुबंधेतीर्थान्यन्यानियानिच ॥ ४४ ॥ द्वारकांस्वर्गरूपांचश्रीकृष्णोयत्रतिष्ठति ॥ मायापुरींचमथुरांवनंवृंदावनंशुभम् ॥ ४५ ॥
यमुनापुलिनंभद्रेयत्रकृष्णोहिनर्त्स्यति ॥ पश्यायोध्यांपुनःकांतेशिरसाप्रणतिंकुरु ॥ ४६ ॥ यस्यांजातोहरिःसाक्षात्परमात्मानराकृतिः॥
॥ सूतउवाच ॥ पौलोमीतुहरेर्वाक्यंहृदिकृत्वाननामतम् ॥ ४७ ॥ पौलोम्यानमनंदृष्ट्वागंधर्वाप्सरसस्तथा ॥ प्रणेमुःप्रांजलिंकृत्वायोध्या
यैचपुनःपुनः ॥ ४८ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेसप्तदशोध्यायः ॥ १७ ॥ सूतउवाच ॥ शचींप्रणमन्तींदृष्ट्वासावित्रीपातिम
ब्रवीत् ॥ पत्युःकरंकरेणैवपडियंतीपतिप्रिया ॥ १ ॥ सावित्र्युवाच ॥ कस्मैनमंतिभोस्वामिन्ऋभुक्षप्रमुखाःस्त्रियः ॥ कस्मिन्देशेव
यंप्राप्ताःप्रभावंवदचास्यभो ॥ २ ॥ सूतउवाच ॥ तस्यावाक्यंनिशम्याथप्रत्युवाचप्रजापतिः ॥ प्रत्युत्थायप्रणम्यादौदंडवन्नगरंप्रति ॥ ३ ॥

॥ श्रीब्रह्मोवाच ॥ अयोध्येयंमहापुण्याविष्णोराद्यापुरीशुभा ॥ अस्यांजातोहरिःसाक्षात्परमात्मानराकृतिः ॥ ४ ॥ धन्योदशरथोराजा
यस्यपुत्रःस्वयंहरिः ॥ यस्याःपुर्यास्तुभूपालइक्ष्वाकूणांवरःसुधीः ॥ ५ ॥ यत्राशास्मोवयंसर्वैवस्तुंसुकृतकोटिभिः ॥ यत्रेयंसरयूर्दिव्यान
दीनामुत्तमानदी ॥ ६ ॥ यस्यादर्शनमात्रेणपापराशिर्वैनश्यति ॥ ब्रह्मद्रवमिदंभद्रेनास्त्यस्याउपमाक्वचित् ॥ ७ ॥ यस्यपादतलाज्जा
तागंगाभागीरथीक्षितौ ॥ स्नानाद्यर्थंतुयस्याश्चगच्छतोवैजनस्यच ॥ ८ ॥ पदेपदेश्वमेधस्यप्रफलंदुर्लभंभवेत् ॥ माहिम्नःक्वापिगंगायाः
पारःशास्त्रेनदृश्यते ॥९॥ सरय्वामहिमानंकोवेत्तिलोकेचपंडितः ॥यत्रनारायणोनाम्नारामःस्नास्यतिसर्वदा ॥१०॥ ब्रह्मद्रवंपुनश्चात्ररामः
क्रीडांकरिष्यति ॥ कैरस्यालभ्यतेपारःशास्त्रज्ञैस्थूलदृष्टिभिः ॥ ११ ॥ यमुनायाःसरय्वाश्चप्रभावोनाहिवर्णितः ॥ ऋषिभिःसुपुराणे
षुबहुधानाहिदर्शितः ॥ १२ ॥ यत्रकृष्णश्चरामश्चक्रीडांदिव्यांकरिष्यति ॥ भागीरथ्यामहिम्नस्तुयदिपारोनलभ्यते ॥ १३ ॥
तर्हिगंतुंमहिम्नोंतंकःसमर्थोनरस्तयोः ॥ हिमवद्विंध्ययोर्मध्येभूवैकुंठोपिदृश्यते ॥ १४ ॥ नाम्नायोध्येतिविख्याताह्यजेयासकलैरपि ॥
पश्यपश्यमहाभागेपुरींशृंगैरिवांबरे ॥ १५ ॥ आश्लिषंतींविमानानिभुजैश्चगगनोच्छ्रितैः ॥ प्रासादस्थानरानार्य्योंचाधोभागेषुवार्षुकान्॥
॥ १६ ॥ मेघान्पश्यंतिवर्षार्थांकौतुकेनस्तुवंतिच ॥ स्वर्णवस्त्रैर्दीर्घदंडैःकेतनैर्वायुलोलितैः ॥ १७ ॥ नरैर्नज्ञायतेसूर्य्यादातपश्चगृहेगृहे ॥
अस्याःशृंगेषुमेघाश्चस्थित्वास्थित्वाप्रयांतिवै ॥ १८ ॥ महताजलभारेणसेचनायजलागमे ॥ प्रासादस्थायुवत्यश्चवदनैश्चंद्रसन्निभैः ॥
॥ १९ ॥ रात्रौदिवाचलक्ष्यंतेचंद्राइवसहस्रशः ॥ शिखाभिर्विदीपानांधूमितंपश्यचांबरम् ॥ २० ॥ शातकुंभस्यरेणुर्वैप्रपदाताडितोपि
सन् ॥ मूर्धसुनपतत्येवनराणांमार्गगामिनाम् ॥ २१ ॥ पथिबालाःप्रक्रीडंतिस्वर्णधूल्यासहस्रशः ॥ अश्ववारैर्गजारोहैरक्षिताःस्यंदनैस्त

था ॥ २२ ॥ गजाश्वात्रसरय्वांवैचानीतायंत्रिभिर्वरैः ॥ कुशेशयैश्चक्रीडंतिगजीभिःकलभैःसह ॥ २३ ॥ स्वर्णशालापुरीचेयंसरय्वांछाय
यानिशम् ॥ वसतीवविमानाग्र्यैःपिशंगीकुंचतीदिशः ॥ २४ ॥ अपःपिवंतिवासिष्ठ्यावितृषोपिपुनःपुनः ॥ पुरस्त्रीस्तनविभ्रष्टनवकुंकुमपिं
जराः ॥ २५ ॥ वसंतिचात्रराजानोरघूणामाज्ञयासदा ॥ सदाभ्यासेनरचिताशिल्पिनांप्रवरेणच ॥ २६ ॥ दृश्यतेनरलोकेषुस्वर्गमूर्तिरि
वापरा ॥ अयोध्यायाःसरय्वाश्चमध्येसोपानजाद्युतिः ॥ २७ ॥ यथाकंठेयुवत्याश्चमालास्वर्णस्यभासुरा ॥ क्षितीशानांसहस्रैश्चपूर्तयेयंव
रानने ॥२८॥ विदधेयाविधानेनशिल्पिनांप्रवरेणच ॥ प्रेम्णैवसरयूर्यत्रमुक्तादामभुजोर्मिभिः ॥२९॥ बध्नातिसर्वतःपुर्य्याःपद्मिन्याःकुसुमैः
सह ॥ पश्येमांसरयूंदिव्यांविरजांविरजोद्भवाम् ॥३०॥ इक्ष्वाकूणांचसर्वेषांधात्रींपरममंगलाम् ॥ शैवालकेशांसरसीरुहाक्षींपद्माननांपद्मप
लाशवस्त्राम् ॥३१॥ दीर्घोर्मिहस्तांकुमुदद्विजांचहंसस्तनींविद्धिचफेनहासाम् ॥३२॥ पुलिनांकेपयोदुग्धैःपोषयंतीनरान्सदा ॥ एवंजानी
हिभोकांतेधात्रींश्रीसरयूनदीम् ॥ ३३ ॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेऽष्टादशोध्यायः ॥१८॥ ॥ ब्रह्मोवाच ॥ ॥ अन्ना
नांनिचयंपश्यनद्यास्तीरेसहस्रशः ॥ क्रियतेपर्वताकारंक्रयविक्रयकारिभिः ॥ १ ॥ सांयात्रिकाश्चबहवोनानादेशनिवासिनः ॥ क्रयंकृत्वा
चवस्तूनांयैतेषुस्थापयंतिच ॥ २ ॥ विक्रीयनिजवस्तूनांद्विगुणेनमहात्मनाम् ॥ पण्यवीथ्यांमणीनांचपूगंपश्यत्सहस्रशः ॥ ३ ॥ गारु
त्मतस्यशतशस्तथावैपद्मजस्यच ॥ मुक्तानांगजमुक्तानांमणीनांचंद्रसूर्ययोः ॥ ४ ॥ भूतयःसंतियाह्यत्रादिग्भुजांनगृहेषुताः ॥ अत्रदुंदु
भिनादाश्चभेरीनादाअहर्निशम् ॥ ५ ॥ सुस्वराअपिश्रूयंतेजनैश्चनिजभाग्यतः ॥ राज्ञोदशरथस्यापिजयशब्दंप्रकुर्वती ॥ ६ ॥ शरयूर्नि
जकल्लोलैर्लक्षणेतिकृतामया॥मेघावर्षंतिवर्षायांमंदिरेनगरेतथा ॥७॥ उच्चाट्टालंप्ररोहंतिनरानार्य्योर्भकैःसह ॥ तस्मिन्नट्टेपिवृष्टिश्चपुनरन्यं

प्रयान्तिवै॥८॥तत्रस्थावतजीमूतान्सदापश्यंतिकौतुकात्॥सूतउवाच॥एतस्मिन्नंतरेसर्वाःपूर्वचित्तिमुखाःस्त्रियः॥९॥तिलोत्तमामंजुघोषारंभाद्याउर्वशीमुखाः ॥ गंधर्वाप्सरसोयक्षाविद्याधरातिमन्मथौ॥१०॥विवर्णवदनौभूत्वाधातारंचव्यजिज्ञपन् ॥ सर्वेऊचुः ॥ देवदेवमहादेवपरमेष्ठिन्नमोस्तुते ॥ ११ ॥ अयोध्यांपश्यभोदेवचात्रस्थायुवतीःशुभाः ॥ सुकेश्यःश्यामनेत्राश्चश्यामाःश्यामेनवर्जिताः ॥ १२ ॥ नागवल्लीदलैःपूर्णशोभितंमुखपंकजम् ॥ नासायांमौक्तिकंचासांस्वर्णसूत्रेणराजते ॥ १३ ॥ कंचुक्याचकुचौपीनौछादितौवहुरत्नया ॥ तथानिर्गत्यकिंचिच्चराजेतेवर्त्तुलौपुनः ॥ १४ ॥ राजंतिललनाःसर्वाअट्टेट्टेविद्युतोपमाः ॥ युवानश्चात्रकामाभाःमणिकुंडलधारिणः ॥ १५ ॥ निष्कग्रीवावलयिनोहारिणोंगदिनोनराः ॥ किंवहूक्तेनभोदेवमदनाइवभूरिशः॥१६॥नैतादृश्योयुवत्यश्चस्वर्गलोकेकथंचन॥यादृशोयुवतीयूथादृश्यंतेह्यत्रभूरिशः ॥ १७ ॥ स्वर्गलोकाच्चभूलोकाद्विशेषोनहिविद्यते ॥ मामायंतंतुस्वर्गायस्वर्गभूमौप्रदृश्यते ॥ १८ ॥ वहुभिर्जपयज्ञैश्चक्लेशेनापिजिद्वातयः ॥ अत्रैवविविधाभोगाःसुखानिचवहूनिहि॥१९॥भुंजन्तेनरनार्य्यश्चतेषांस्वर्गेणकिंफलम् ॥ सूतउवाच ॥ इतिश्रुत्वागिरस्तेषांब्रह्माकमलसंभवः ॥२०॥ उवाचप्रहसन्वाण्यामेघनादगभीरया॥ब्रह्मोवाच॥मनुंस्वायंभुवंयूयंचांतिकेप्राप्यपृच्छत ॥२१॥ सर्वैछिनत्तियुष्माकंसंदेहंवचनैःप्रियैः ॥ सूतउवाच ॥ एतस्मिन्नंतरेतत्रमनुःस्वायंभुवःस्वराट् ॥ २२ ॥ आजगामविमानेनचांतिकेपितुरात्मनः ॥ तेतंसंगम्यपप्रच्छुःसंदेहंमानसोद्भवम् ॥ २३ ॥ सर्वेऊचुः ॥ भद्रंतेकिंकृतंराजन्प्रजाश्चसृजतात्वया ॥ अस्मत्तोप्यधिकाःकृत्वामुमोदसुकृतीभवान् ॥ २४ ॥ यूयंचयदिसर्गस्यमर्यादांनकरिष्यथ ॥ स्वर्गार्थंचपुनःराजन्नकोपिप्रयतिष्यते ॥ २५ ॥ देवाःश्रेष्ठामनुष्यावास्वर्गोवाभूतलंकिमु ॥ अयोध्यायांयथाराजन्दृश्यंतेपुरुषाःस्त्रियः ॥२६॥ नतथाक्वापिवर्त्ततेस्वर्गभूमेरधःप्रभो ॥ सूतउवाच ॥

वाक्यंनिशम्यतेषांतुजगादचमनुःस्वयम् ॥ २७ ॥ भारत्याप्रीणयन्नेवदेवानांपुरतस्तदा ॥ मनुरुवाच ॥ स्वर्गार्थंक्रियतेक
र्मजनैश्वस्वर्गगामिभिः ॥ २८ ॥ भूतलंभूतलंचैवस्वर्गःस्वर्गस्तथैवच ॥ जन्ममृत्युजराव्याधिर्भूतलेवर्ततेसदा ॥ २९ ॥
मलमूत्रशरीराणिनराणांनाशवंतिच ॥ पंचविंशतिवर्षस्थानरानार्य्यश्चषोडशे ॥ ३० ॥ तेषांदेहेनदुर्गंधानच्छायामलिनांबरम् ॥
ननिमेषश्चनेत्रेषुस्वर्गस्थाःसुखिनोजनाः ॥ ३१ ॥ शोकोनाक्रियतांदेवायूयंश्रेष्ठानसंशयः ॥ प्रहसन्प्राहदेवर्षीराज्ञोवाक्यंनिशम्यच ॥
॥ ३२ ॥ तस्मिन्कालेमहाहर्षाद्देवान्प्रत्यमितद्युतिः ॥ नारदउवाच ॥ राज्ञाचोक्तंयथातथ्यंतत्तथैवनसंशयः ॥ ३३ ॥ परंतुस्वर्गतः
श्रेष्ठायोध्येयंसुरदुर्लभा ॥ महात्म्यतइयंश्रेष्ठास्वर्गादपिवरानना ॥ ३४ ॥ स्वर्गवासात्पुनर्जन्ममरणंविद्यतेनृणाम् ॥ स्वर्गाच्च्युता
श्चभूलोकेपतंतिसुकृतक्षयात् ॥ ३५ ॥ अत्रमृताश्चवैकुठमूर्ध्वंगच्छंतिमानवाः ॥ कृमिकीटपतंगाश्चम्लेच्छाःसंकीर्णजातयः ॥३६॥ कौमो
दकीकराःसर्वेप्रयांतिगरुडासनाः ॥ लोकंसांतानिकंनामदिव्यभोगसमन्वितम् ॥ ३७ ॥ यद्गत्वानपतंत्यस्मिल्लोकेमृत्युमुखेनराः ॥ माहा
त्म्यादधिकंस्वर्गात्साकेतंनगरंशुभम्॥३८॥अयोध्ययासमंकिंचिन्नस्वर्गेभूतलेतथा॥योषितःखलुचात्रस्थाविधाताविदधेबहु ॥३९॥आत्म
नोदोषनाशायरचिताभूतलेस्त्रियः ॥ यदाहल्यांविधाताचनिर्ममेपरमाद्भुताम्॥४०॥ तदालोकैश्चविज्ञातंघुणाक्षरमिदंविधेः ॥ तद्दोषमार्ज
नायैवनिर्ममेचात्रयोषितः ॥ ४१ ॥ कुर्वंतुसंशयंदेव्योसौंदर्य्येणकदाचन ॥ अत्रनार्यःश्रियोमूर्त्यौनराश्चहरिविग्रहाः ॥ ४२ ॥ सूतउवाच॥
नारदस्यऋषेर्वाक्यंनिशम्याप्सरसस्तदा ॥ मतिंचक्रुश्चसाकेतेवासितुं स्वर्गनिःस्पृहाः ॥ ४३ ॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवा
देएकोनविंशोऽध्यायः ॥१९॥ स्फाटिकानांचसौधानिचंद्ररश्मियुतानिच ॥ रात्रौरात्रौविलोक्यंतेजनैराहत्यसर्वतः ॥ १ ॥ अट्टेषुचंद्रकांते

भ्यःजलधाराःपतंत्यधः ॥ निशायांरश्मिसंयोगात्द्विजराजस्यनित्यशः॥ २ ॥ लज्जयात्रगृहीत्वापोरात्रौदीपान्समाप्यच ॥ लज्जंतेऽत्रपुनः
सर्वामूर्तिभिःकुड्यनिर्मितैः ॥ ३ ॥ इतस्ततोजनास्त्वेवंस्फाटिकानांचभित्तिषु ॥ तेषांताहशबिंबेनसजीवाइववैगृहाः ॥ ४ ॥ यत्रस्वर्णम
यास्तंभाःसौधेसौधेनिरूपिताः ॥ कपोलान्यत्रपश्यंतियुवत्यःकामपांडुरान् ॥ ५ ॥ पाकशालाक्षितिस्तत्रनीलरत्नैश्चकुट्टिमाः ॥ नकुर्वंति
भ्रमात्तस्यांनववध्वश्चगोमयम् ॥ ६ ॥ प्रांतेषुपटलानांचनृत्यंतिशिखिनोमुहुः ॥ वितत्यस्वस्यबर्हाणिमृदंगानांस्वनेनच ॥ ७ ॥ विलो
क्यकालमेघाभंधूमंचागुरुसंभवम् ॥ गगनोड्डीयमानानांपक्षिणांरत्नजांगणे ॥ ८ ॥ प्रतिबिंबस्यतेषांतुग्रहणायइतस्ततः ॥ हिंस्रोधा
वतिपापात्मामार्जारःकिलमारकः ॥ ९ ॥ कामिनश्चात्रशतशोवल भीषुवधूजनैः ॥ भ्राजंतेपरमानंदंमहापौरुषिकाइव ॥ १० ॥
युवतीनांमुखान्यत्रप्रमदायनृणांमधु ॥ बिभ्रंतिसततंकांतेनेत्राणांपुटकेतथा ॥ ११ ॥ लोकवार्तांयथालोकाःप्रवदंतिगृहेस्वके ॥ प्रपठं
तितथारम्यंपंजरस्थाश्चसारिकाः ॥ १२ ॥ पतिनासहयज्जातंनवोढायारतादिकम् ॥ तद्दिवावक्तुकामस्यकीरस्यमुखपंकजे ॥ १३ ॥
वधूर्ददातिशकलंविद्रुमस्यपुनःपुनः ॥ अत्रवस्त्राणिरम्याणिक्षौमकौशेयकानिच ॥ १४ ॥ कुचादीनिप्रदृश्यंतेतत्रांगानियथार्थतः ॥
राजमार्गेमहादीर्घैतत्रगच्छंतिभूरिशः ॥ १५ ॥ अश्वागजारथाःसर्वेअसंकीर्णप्रयांतिच ॥ वृक्षाश्चात्रमहादीर्घाःकल्पवृक्षोपमाःसदा ॥
॥ १६ ॥ प्रयच्छंतिनराणांचसर्वकामांश्चवांछितान् ॥ इंद्राच्छ्रेष्ठोहिराजर्षिःसाकेतेवसतेसदा ॥ १७ ॥ तेनेयंचपुरीचाद्यास्वर्गा
च्छ्रेष्ठाचराजते ॥ सूतउवाच ॥ देवानांचविमानानिप्राप्तानिनगरोपरि ॥ १८॥ पुनःप्रोवाचवैस्रष्टावीक्ष्यमाणोवनानिच ॥ ब्रह्मोवाच ॥
॥ पश्यध्वंदेवताःसर्वेवनंचाशोकसंज्ञितम् ॥ संतानकवनंचात्रमंदारवनमेवच ॥ २० ॥ वनंचपारिजातानांचंदनानांतथैवच ॥ चं

पकानांवनंदिव्यंयत्रयांतिनषट्पदाः ॥ २१ ॥ वनंरमणकंदेवारमणंयत्रवैहरेः ॥ वनंप्रमोदकंचापिप्रमोदंयत्रभूरिच ॥२२॥ आम्राणांचवनंदिव्यंतथैवपनसैःकृतम् ॥ कदंवानांवनंदीर्घकेसरैरुपशोभितम् ॥ २३ ॥ तमालानांवनंदिव्यंवल्लीभिःपरिवेष्टितम् ॥ वनान्येतानिरम्याणिसंख्यातानिचद्वादश ॥ २४ ॥ तथाचोपवनान्येवपुष्पाणांक्रमशःसुराः ॥ रमणीभिर्युवानोहियांतिरंतुंमुदासदा ॥ २५ ॥ आखेटकायराजानोवनेषुपरितोबलैः ॥ वृत्ताःक्रीडंतितेनित्यंभवंतइवनंदने ॥ २६ ॥ इत्येवंविवदन्ब्रह्मादेवान्प्रतिमहातपाः ॥ सरय्वाभूमिभागांश्चयानान्यवतरंस्तथा ॥ २७ ॥ देवानांब्रह्मरुद्राणांविमानानिसमंततः ॥ ब्रह्माद्याःसकलादेवाविमानेभ्योअवातरन् ॥ २८ ॥ अप्सुनद्यास्तदाचक्रुःस्नानंचैवविधानतः ॥ युवत्यःकिलदेवानांनिर्णेजुर्निजविग्रहम् ॥२९॥ स्नात्वासम्यक्वहिश्चाद्भ्यःगत्वावासांसिपर्यधुः ॥ दत्वादानानिविप्रेभ्योनानारत्नमयानिच ॥ ३० ॥ एकादश्यांपुण्यतिथौसंध्यांजेपुस्तथाशुभाम् ॥ इत्येवंतीर्थयात्रातुकृतादेवैर्महर्षिभिः॥३१॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेविंशतितमोऽध्यायः ॥२०॥सूतउवाच ॥ ॥ तस्मिन्कालेवसिष्ठस्तुनोदितश्चनृपाज्ञया ॥ आजगामविधेःपार्श्वेविधिपुत्रोविधानतः ॥१॥ समागत्यविधेःपार्श्वेववंदेप्रयतःपदौ ॥ ब्रह्माशीघ्रंसमुत्थायपरिष्वज्यचबाहुभिः ॥२॥ उपकंठतमावेश्यपर्यपृच्छदनामयम् ॥ राज्ञोदशरथस्यापितथारामस्यभूरिशः ॥३॥ सूतउवाच ॥ पृच्छंतंपितरंचैववसिष्ठोभगवानृषिः ॥ उवाचश्लक्ष्णयावाचापितरंभूपनोदितः ॥ ४॥ वसिष्ठउवाच ॥ येषांकुशलकामोसिभव्यंतेषांतुविद्यते ॥ आगमिष्यतिराजातुपुत्रैस्त्वामभिवंदितुम् ॥ ५ ॥ विधातापिमुनेर्वाक्यंश्रुत्वाविस्मितमानसः ॥ प्रहसन्प्राहधर्मात्मावसिष्ठंकमलासनः ॥ ६ ॥ ब्रह्मोवाच ॥ अहमप्यागमिष्यामिगृहंराज्ञोमहात्मनः ॥ देवैःसहमुनेयाहिश्रुहिश्रुहिममाज्ञया ॥ ७ ॥ यस्यपुत्रोरमानाथोरामचंद्रोथभ्रातृभिः ॥

वर्ततेऽथगृहंतस्यादर्शनार्थंव्रजाम्यहम् ॥ ८ ॥ रामोनारायणःसाक्षान्ममोपास्यःसदाद्विज ॥ भवान्ज्ञातामुनिःसर्वंममरामस्यभू
रिशः ॥ ९ ॥ रामस्यनाभिपद्मेहिजातोहंप्रलयार्णवे ॥ ममदेहाद्भवंतोवैजातादक्षादयःसुताः ॥ १० ॥ एवंनज्ञायतेपुत्रत्वयाकिंममचो
च्यते ॥ नराकारस्यरामस्यवयंत्वंचसहायकाः ॥ ११ ॥ एतेदेवास्तथासर्वेंऋषयश्चतपोधनाः ॥ संगोपनीयमस्माभीरामतत्त्वं
चसांप्रतम् ॥ १२ ॥ यथासुखंभवेद्भूरिपित्रोश्चैवतथानृणाम् ॥ सूतउवाच ॥ एवंविश्राव्यवैब्रह्मारघूणांदेशिकंमुनिम् ॥ १३ ॥
अहमप्यागमिष्यामिचेतिवाक्यंपुनःपुनः ॥ वसिष्ठंप्रेषयित्वातुयानंचारुरुहेनिजम् ॥ १४ ॥ वसिष्ठोपिमहातेजाआजगामनृपांतिकम् ॥
आगत्यकथयामासवेधाश्चायातिभोध्रुवम् ॥ १५ ॥ तवबालस्यरक्षार्थंसर्वेंदेवाः सवासवाः ॥ दीर्घभाग्यंविजानीयादात्मनःपुत्रसंभ
वात् ॥ १६ ॥ एतस्मिन्नंतरेदूताब्रह्मादीनांसमागताः ॥ वर्धयित्वातुराजानंप्रोचुःप्रांजलयोनृपम् ॥ १७ ॥ दूताऊचुः ॥ आगताःशतशो
देवाःश्रीमतांशुभतोरणम् ॥ आज्ञाप्यतांमहाराजासभायांप्रविशंतुते ॥ १८ ॥ श्रीराजोवाच ॥ इदंगृहंतुदेवानामिदंराज्यंपुरंमम ॥ स्वगृ
हेकोविचारोस्तिचाज्ञांकस्यप्रतीच्छथ ॥ १९ ॥ सूतउवाच ॥ इत्युक्त्वाचस्वयंराजाप्रचचालवरासनात् ॥ रामंस्वांकेघनश्याममिंद्रनी
लसमप्रभम् ॥ २० ॥ कृतावलिंसमादायदेवानांनमितुंययौ ॥ एतस्मिन्नंतरेब्रह्माप्रविवेशनृपालयम् ॥ २१ ॥ देवैःसहमहाबाहुःप्रहसन्क
मलासनः ॥ प्रणनाममहाराजोब्रह्माणंचचतुर्मुखम् ॥ २२ ॥ पादयोःपातयामासरामचंद्रंचवेधसः ॥ सिंहासनेसमावेश्यविधिंराजामहा
मनाः ॥ २३ ॥ तदेंद्रोपिगणेशोपिमहादेवादयः सुराः ॥ राज्ञासंपूजिताःसर्वेंविविशुश्चयथासुखम् ॥ २४ ॥ अप्सरसश्चरंभाद्याः पूर्वचि
त्यादयस्तथा ॥ समाजग्मुश्चगंधर्वानानावेषधराःशुभाः ॥ २५ ॥ राजानंवर्धयित्वातुस्थानेस्थानेयथाविधि ॥ हसन्प्राहमहाराजोब्रह्माणं

सर्वदेवताः ॥ २६ ॥ अद्यमेसफलंजन्मअद्यमेसफलंगृहम् ॥ अद्यमेसफलास्वामिन्सुप्रभातानिशामम ॥ २७ ॥ साधूनांचसुराणांचदर्शनंदुर्लभंनृणाम् ॥ कृतार्थोहंकृतार्थोहंयूयंदर्शनमागताः ॥ २८ ॥ युष्माकंदर्शनंयज्ञेनृणांभवतिभाग्यतः ॥ तीर्थस्नानमिषेणैवमद्गृहेषुसमागताः ॥ २९ ॥ किंपुनर्महिमाशक्योवर्णितुंस्वमुखात्ततः ॥ सूतउवाच ॥ ब्रह्माराज्ञोदितंवाक्यंश्रुत्वासाधुनिरूपितम् ॥ अब्रवीत्सस्मितंकृत्वाराजानंहंसवाहनः ॥ ३० ॥

॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेएकाविंशतितमोध्यायः ॥ २१ ॥

॥ श्रीविधिरुवाच ॥ ॥ सत्यंचोक्तंत्वयासर्वंतवभाग्यान्नचाधिकम् ॥ भूलोकेदेवलोकेचपातालेचनरेश्वर ॥ १ ॥ भाग्यंहिविद्यतेराजन्नरकस्यकथंचन ॥ यस्यपुत्रामहात्मानःश्रीरामभरतादयः ॥ २ ॥ जाताःपुण्याच्चलोकानांसर्वथापरिरक्षकाः ॥ युगेयुगेचगावोहिब्राह्मणाःसाधवस्तथा ॥ ३ ॥ पृथिवीचमहाराजह्यनेनपरिरक्षिताः ॥ येस्मिन्प्रीतिंकरिष्यंतितेचामोघानसंशयः ॥ ४ ॥ चरितंचास्यलोकस्यपापपर्वतदारणम् ॥ यावल्लोकाधरिष्यंतियावत्तिष्ठतिमेदिनी ॥ ५ ॥ तावद्रामकथालोकेप्रचरिष्यतिपापहा ॥ किंबहूक्तेनभोराजन्नारायणसमोर्भकः ॥ ६ ॥ ॥ सूतउवाच ॥ ॥ द्रुहिणस्यमुखोद्गीतंसमाकर्ण्यनराधिपः ॥ प्रहर्षंपरमंलेभेश्रुत्वापुत्रंगुणान्वितम् ॥ ७ ॥ एतस्मिन्नंतरेतत्रसभार्यांनारदोमुनिः ॥ आजगामविधेःपुत्रोदर्शनार्थंसतुंबुरुः ॥ ८ ॥ जनकांकगतंरामंददर्शविनयान्वितः ॥ दृष्ट्वादृष्ट्वापुनर्दृष्ट्वामुमोदचपुनःपुनः ॥ ९ ॥ श्यामसुंदररामस्यरूपाब्धौडुबितोभवत् ॥ बहिर्निर्गत्यधैर्येणरामस्यपरमात्मनः ॥ १० ॥ तेनस्तोत्रंसमारब्धंब्रह्मादीनांचसन्निधौ ॥ नारदउवाच ॥ वंदेसुराणांसारंचसुरेशंश्यामसुंदरम् ॥ ११ ॥ योगीश्वरंयोगबीजंयोगिनांचपरंगुरुम् ॥ ज्ञानानंदंज्ञानरूपंज्ञानगम्यंसनातनम् ॥ १२ ॥ तपसांफलदातारंसर्वसंपत्तिदंशुभम् ॥ तपोबीजंतपोरूपंतपोद्रव्यंतपोवरम् ॥ १३ ॥ वरेण्यं

वरदंचेड्यंभक्तानुग्रहकारकम् ॥ वेदानशक्तायंस्तोतुंकिमहंस्तौमितंप्रभुम् ॥ १४ ॥ कारणंभुक्तिमुक्तीनांनरकार्णवतारणम् ॥ आशुतो
षंप्रसन्नास्यंकरुणामयसागरम् ॥ १५ ॥ ब्रह्मज्योतिःस्वरूपंचदुष्टदानवनाशनम् ॥ अपरिच्छिन्नशक्तिंचकायवाङ्मनसःपरम् ॥ १६ ॥
सत्वाद्गुणात्परंरामंरजसस्तमसःपरम् ॥ ब्राह्मणानामुपास्यंचयोगिनांहृदयंगमम् ॥ १७ ॥ कोटिकंदर्पलावण्यंद्विभुजंरघुनंदनम् ॥
ज्योतीरूपमरूपंचरमानाथंजगद्धितम् ॥ १८ ॥ ब्रह्मज्योतिःप्रभुंरामंवासुदेवंजनार्दनम् ॥ वैकुंठंमाधवंविष्णुंदैत्यारिंमधुसूदनम् ॥ १९॥
नमोहंसायशुद्धायशुचीनांशुचयेनमः ॥ विष्वक्सेनायमहतेरामायामिततेजसे ॥ २० ॥ मत्स्यकूर्मवराहाणांरूपिणेपरमात्मने ॥
रामचंद्रायमहतेरामायामिततेजसे ॥ २१ ॥ मत्स्यकूर्मवराहाणांरूपिणेपरमात्मने ॥ रामचंद्रायहरयेनमस्तेसिंहरूपिणे ॥ २२ ॥
नमोवामनरूपायजामदग्न्यायब्रह्मणे ॥ नमस्तेरामचंद्रायश्रीकृष्णायनमोनमः ॥ २३ ॥ नमस्तेबुद्धरूपायनमस्तेकल्किरूपिणे ॥
॥ सूतउवाच ॥ स्तोत्ररत्नमिदंकृत्वाविरराममहामुनिः ॥ २४ ॥ रघूणांप्रवरोराजामुनिंप्रोवाचलज्जितः ॥ वाक्यंचश्रूयतांसत्यंतवभक्तस्य
मेविभो ॥ २४ ॥ श्रीराजोवाच ॥ ममपुत्रस्यव्याजेनकृतंस्तोत्रंहरेरिदम् ॥ एवमेवचकर्तव्यंसकलैःप्राणिभिःसदा ॥ २५ ॥ इदानींममपु
त्रस्यमंत्ररक्षाविधीयताम् ॥ सूतउवाच ॥ नारदोपिमहायोगीविरक्तानांशिरोमणिः ॥२६॥ पस्पर्शचालंपाणिभ्यांरक्षाव्याजेनमस्तकम् ॥
कंठंवक्षः स्थलंचैवह्यंघ्रीस्पृष्ट्वाजगामसः ॥ २७ ॥ ब्रह्मादयस्तुतेदेवाःशशंसुर्मनसामुनिम्॥ अहोमुनिर्महाबुद्धीरामस्यचरणौशुभौ ॥२८॥
स्पृष्ट्वाशीघ्रंप्रयातोहिरसिकानांशिरोमणिः ॥ इदंस्तोत्रंमहापुण्यंनारदेनसमीरितम् ॥ २९ ॥ स्तोत्ररत्नमिदंज्ञेयंरामचंद्रस्यशौनक ॥ यो
नित्यंपठतेविद्वान्योवाधारयतेसुधीः ॥ ३० ॥ नतस्यपुनरावृत्तिःकल्पकोटिशतैरपि ॥ नियमाद्यःपठेत्स्तोत्रंप्रातरुत्थायबुद्धिमान् ॥३१॥

प्राप्नोतिसकलानर्थान्बालरामप्रसादतः ॥ स्तोत्ररत्नमिदंदिव्यंमासमात्रंशृणोतियः ॥ ३२ ॥ ध्रुवंवित्तंभवेत्तस्यरामचंद्रप्रसादतः ॥
महामूर्खश्चदुर्मेधामासंभक्त्याशृणोतियः ॥ ३३ ॥ बुद्धिंविद्यांचलभतेगुरूपदेशमात्रतः ॥ अपुत्रोलभतेपुत्रंवर्षमेकंशृणोतियः ॥ ३४ ॥
इहलोकेसुखंभुक्त्वाकृत्वाकीर्तिंसुदुर्लभाम् ॥ नानाप्रकारंधर्मंचयात्यंतेचहरेर्गृहम् ॥ ३५ ॥ यःशृणोतित्रिसंध्यंचनित्यंचस्तोत्रमुत्तमम् ॥ किंबहूक्तेनभोविप्रनास्त्यस्मादधिकंफलम् ॥ ३६ ॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेद्वाविंशतितमोध्यायः ॥ २२ ॥ ॥ सूतउवाच ॥ ॥ गतेऽथनारदेराजाब्रह्मादीन्वाक्यमब्रवीत् ॥ प्रांजलिःप्रयतोभूत्वाधर्मिणांप्रवरोनृपः ॥ राजोवाच ॥
एकादश्यांचभोदेवाःफलाहारोगृहेमम ॥ भवद्भिःक्रियतामत्रविहितोयंमयांजलिः ॥ २ ॥ येषांगृहेनभुंजंतेदेवावाऋषयोद्विजाः ॥ तेषांगृहं
भवेच्छून्यंफेरुराजगृहोपमम् ॥ ३ ॥ ब्रह्मोवाच ॥ अद्यचैकादशीराजन्फलाहारोनशस्यते ॥ एकादश्यांफलाहारोमध्यमःप्रोच्यतेबुधैः ॥
॥ ४ ॥ भोजनंचमहानिंद्यमन्नानांचनराधिप ॥ तस्मादद्यनभोक्तव्यंकर्तव्यंचजनैर्द्वयम् ॥ ५ ॥ रात्रौजागरणंचैवदिवाचहरिकीर्त्तनम् ॥
तृप्ताश्चास्मोवयंसर्वेतवदर्शनतोनृप ॥ ६ ॥ इत्येवंब्रुवतःसर्वान्पुनःप्रोवाचभूमिपः ॥ रक्षाचक्रीयतांस्वामिन्बालकस्यममाद्यवै ॥ ७ ॥
चिरंजीवीभवेद्येनतथावैक्रियतांशुभाम् ॥ गिरमाकर्ण्यभूपस्यवात्सल्यगुणभूषिताम् ॥ ८ ॥ तथाभवतुवाक्यंतेप्रत्यूचुश्चसुरेश्वराः ॥ अथ
ब्रह्मासभायांतुगणेशंचगणाधिपम् ॥९॥ अब्रवीत्प्रहसन्वाक्यमेकदंतंगजाननम् ॥ ब्रह्मोवाच ॥ एकदंतमहावीर्यनमःपरशुपाणये ॥ १० ॥
सिध्यंतिसर्वकार्य्याणित्वत्प्रसादाद्गणाधिप ॥ शिवपुत्रायभव्यायमातंगास्यायतेनमः ॥ ११ ॥ नमःपार्वतिपुत्रायविष्णुभक्तायतेनमः ॥
गणानांपतयेतुभ्यंनमस्तेचैकदंतिने ॥ १२ ॥ विघ्नार्णवनिमग्नानांतारणायनमोनमः ॥ येयेभजंतित्वांदेवतेषांविघ्नोनविद्यते ॥ १३ ॥

सर्वमंगलकार्येषुभवान्पूज्योजनैःसदा ॥ मंगलंतुसदातेषांत्वत्पादेचधृतात्मनाम् ॥ १४ ॥ बहुधैवंचविज्ञाप्यपुनःप्रोवाचपद्मजः ॥ रक्षा
चक्रियतामस्यसांप्रतंबालकस्यवै ॥ १५ ॥ आज्ञाप्यैवंविधातापिविररामगजाननम् ॥ गजाननोपिरामंहिपश्यन्प्रेम्णामुहुर्मुहुः ॥ १६ ॥
जहासमनसादेवोवाक्यंश्रुत्वाविधेरिदम् ॥ बुद्ध्याविचारयामासविधिवाक्यंमहामतिः ॥ १७ ॥ रक्षाचक्रियतामस्यबालकस्यच
सांप्रतम् ॥ विधिनाचैवप्रोक्तोहमितिवाक्येनसांप्रतम् ॥ १८ ॥ अयमर्थोहिवाक्यस्यमनसैवविचार्यते ॥ अकारोवासुदेवःस्यात्वं
न्तेह्यस्यभवेद्ध्रुवम् ॥ १९ ॥ बालःकेशइतिप्रोक्तःकशब्देनप्रजापतिः ॥ बालेबालेककारस्तुजायतेतस्यनित्यशः ॥ २० ॥ इति
बालकशब्देनपरब्रह्माभिधीयते ॥ बालकस्यास्यचार्थोयंमयाज्ञातःसुनिश्चितम् ॥ २१॥ परंत्वर्थोनवक्तव्योमनसैवस्मराम्यहम् ॥ कर्णौ
प्रचालयन्दीर्घौपक्षाविवचपक्षिराट् ॥ २२ ॥ शुंडांप्रसारयामासरामस्योपरिवेगतः ॥ भ्रामयामासपरितोरक्षार्थंरामवर्ष्मणः ॥ २३ ॥
ततोरामोमहातेजाबालरूपीतुकौतुकी ॥ चकारवदनेकिंचिदोष्ठसंकोचनादिकम् ॥ २४॥ रोदनार्थंगणेशात्तुभयादिवभयंनहि ॥ गजतुं
डोपिसंकुच्यसंजहारनिजंकरम् ॥ २५ ॥ धातापिपुनरुत्थायरक्षार्थंबालकस्यच ॥ चतुर्भिर्वदनैस्तत्रताततातेत्युवाचह ॥ २६ ॥ ब्रह्मणो
मुखपंक्तिंचनजहासरघूत्तमः ॥ पाणिनाकुशदीर्घेणचक्रेरक्षांपितामहः ॥ २७ ॥ रक्षांकृत्वानिजस्थानेविवेशकमलासनः ॥ कपर्दीपुनरु
त्थायपंचभिर्वदनैर्ब्रुवन् ॥ २८ ॥ अनेनबालरूपेणरक्षितोनिजसेवकैः ॥ सदामेहृदयेतिष्ठयत्रकालभयंनहि ॥ १९ ॥
तदारामोनकिंचिच्चहास्यंचक्रेचबालकः ॥ महादेवेनिजस्थानेआसीनेशिखिवाहनः ॥ ३० ॥ षड्भिःस्ववदनैर्वाक्यमवदद्रघुनंदनम् ॥
अहोराममहाबाहोकिंरोदिषिगजाननात् ॥ ३१ ॥ स्वैःषड्भिर्वदनैर्युक्तंमांत्वंपश्यस्वबालक ॥ मत्तःकिन्नबिभेषित्वंत्रियुगंवदनं

मम ॥ ३२ ॥ अर्धासनगतादेवीशिवस्यगिरिजासती ॥ अब्रवीत्परयावाचाकार्त्तिकेयंनिजात्मजम् ॥ ३३ ॥ देव्युवाच ॥
दशाननादयंवालोनबिभेष्यतिशत्रुहा ॥ त्वत्तःषडाननात्पुत्रकथंविभ्यतिबालकः ॥ ३४ ॥ वचोदेव्यानिशम्यैवंजहसुःस्तेसभासदाः ॥
रामोपिकिलकिलांकृत्वापितुरंकेजहासह ॥ ३५ ॥ नृपादयस्तुजहसुःपश्यंतःकुतुकंतदा ॥ राज्ञासभाजिताःसर्वेदेवगंधर्वकिन्नराः ॥ ३६ ॥
रामरक्षांपठित्वातुगंतुंचक्रुर्मतिंनिजाम् ॥ देवाब्रह्मादयःसर्वेस्वंस्वंवाहमवस्थिताः ॥३७॥जग्मुःसर्वेस्वकंस्थानंरामेनिःक्षिप्यमानसम्॥ इतः
परंचवक्ष्येहंयज्जातंनृपतेर्गृहे ॥३८॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेत्रयोविंशोध्यायः ॥२३॥ ॥ सूतउवाच ॥ राजादशरथोद्द
ष्टःप्रेषयामासवालकम् ॥ अंतःपुरेमहादीर्घेकौशल्यायत्रतिष्ठति ॥ १ ॥ कौशल्यापिनिजांकेचरामंश्यामंनिवेश्यच ॥ प्रश्नुतौपाययामास
स्तनौप्रेमभराप्लुतौ ॥ २ ॥ तस्मिन्नवसरेसर्वाराजदाराःसमाययुः ॥ कौशल्यामब्रुवन्शीघ्रंमंत्ररक्षांविधीयाताम् ॥३॥ रामस्यभयभीत
स्यगणनाथस्यशुंडतः ॥ सूतउवाच ॥ कौशल्याद्यास्तदासर्वाऊचूरक्षांहितादृशीम् ॥४॥ कौशल्योवाच ॥ पादौरक्षतुतेविष्णुःशंखचक्र
गदाधरः ॥ प्रजापतिस्तुतेमेढ्रंगुदंनिर्ऋतिरेवच ॥ ५ ॥ नाभिंपातुसमानस्तुतथापानःसदागतिः ॥ अजचंद्रौमनोबुद्धीपातुचित्तंहरिःस्व
यम् ॥ ६ ॥ अहंकारंमहादेवःशूलहस्तोदिगंबरः ॥ वरुणोरक्षतुतेजिह्वांयादसांपतिरप्पतिः ॥७॥ मुखंपातुसदावन्हिर्नासांचवडवासुतौ ॥
नेत्रेरक्षतुमार्तंडस्तथाकर्णौदिशस्तव ॥ ८ ॥ वाहूरक्षतुवृत्रघ्नोदेवराजःशचीपतिः ॥ सर्वांगेषुमहाविष्णुःवातोरोमानिसर्वदा ॥ ९ ॥ अग्रेर
क्षतुचक्रंत्वांपश्चात्कौमोदकीगदा ॥ डाकिनीभूतप्रेतेभ्योनंदकोवतुसर्वदा॥१०॥सर्वापद्भ्योनृसिंहस्तुक्रमेणतुत्रिविक्रमः ॥ कालाद्रक्षतुकोदं
डःव्याधिभ्यस्तुशिलीमुखाः ॥ ११ ॥ शयानंपातुश्रीरंगःजागरूपंश्रियःपतिः ॥ गरुडोरक्षतुसर्पेभ्योशेषोरक्षतुक्रोधतः ॥ १२ ॥ धन्वंत

रिःकुपथ्यात्तुलक्ष्मीरक्षतुभोजनात् ॥ नंदादयोहरेःपालाःपांतुत्वांसर्वदैवहि ॥ १३ ॥ डाकिनीभूतप्रेतेभ्योदेवीत्वामभिरक्षतु ॥ पृथिवीप
र्वतानद्योवनानिसिंधवःकुशाः ॥ १४ ॥ मशकादंशकारोगाःक्षुद्रागोमहिषादयः ॥ दिनानिरात्रयोयामाःघट्यः संवत्सरास्तथा ॥ १५ ॥
अश्वागजानराःसर्वेद्विपदाबहुपदाश्चते ॥ अजडाश्चजडाश्चैवपक्षिणःकुक्कुरास्तथा ॥ १६ ॥ गंधर्वाप्सरसोयक्षाःपितरोमातृकादयः ॥
सिद्धावैतालिकारक्षोदेवर्षयःप्रजापतिः ॥ १७ ॥ सर्वेप्येतेतथात्वन्येत्वांरक्षन्तुसदैवहि॥पेठुरेवंसपत्न्यःस्ताःकौशल्याद्याःपुनःपुनः॥१८॥
रामरक्षांचविधिवत्पश्चाद्दानंददुर्बहु ॥ आजगामवसिष्ठस्तुचाहूतोराममातृभिः ॥१९॥ विधिवद्रक्षणंचक्रेरामस्यपरमात्मनः॥ गवांसहस्रं
कौशल्यारामहस्तेनदापयत् ॥ २० ॥ ब्राह्मणेभ्योमहाभागारामस्याभ्युदयायच ॥ सहस्रैकंसुवर्णस्यरामक्षेमायकैकयी ॥ २१ ॥ ददौ
दानंद्विजातिभ्योलक्ष्मणंवातथाकरोत् ॥ वसिष्ठोविपुलांगृत्व्यदक्षिणांप्रययौगृहम् ॥ २२ ॥ एवंहिरक्षणेजातेरामःस्तन्यंपपौमुदा ॥ चक्रे
किलकिलाशब्दंमातुःप्रम्णापितुस्तथा॥२३॥जनन्योरामचंद्रस्यदास्योदासाश्चहर्षिताः॥नटानांनर्तकीनांचसमाजोबहुशोप्यभूत् ॥२४॥
ददौदानंचसर्वेभ्योहर्षितोनृपसत्तमः ॥ रक्षास्तोत्रंचरामस्यमातृभिःपठितंतुयत् ॥ २५ ॥ अनेनरक्षामंत्रेणबालान्रक्षंतुपंडिताः ॥ सूतउ
वाच ॥ रामस्यरक्षाव्याजेनबालानांरक्षणायच ॥ २६ ॥ निबंधचवाल्मीकीरामजन्मन्युदाहृतम् ॥ बालकान्भयभीतांश्वरोगादिभिरु
पद्रुतान् ॥ २७ ॥ डाकिनीभूतप्रेतैश्चकुदृष्ट्याचाविलोकितान् ॥ बुधोरक्षत्यनेनैवरामरक्षाकरेणच ॥ २८॥ अल्पायुर्नभवेत्तस्यनाकालम
रणंभवेत् । हस्तौपादौचप्रक्षाल्यरामरक्षांपठेत्तुयः ॥२९॥ दानस्याभयसंज्ञस्यसपुण्यंलभतेध्रुवम् ॥ सर्वान्कामानवाप्नोतिचात्मार्थंपठते
तुयः ॥ ३० ॥ इमंहिचरितंपुण्यंबालरामस्यभाषितम् ॥ शृणुतेश्रावयेच्चापिसपुमान्लभतेगतिम् ॥ ३१॥ इदंहिचरितंपुण्यममंगलनिवा

रणम् ॥ धन्यंयशस्यमायुष्यंशीघ्रंकालिमलापहम् ॥३२॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेचतुर्विंशोध्यायः ॥ २४ ॥ शौन
कउवाच ॥ ॥ षट्श्रीयुक्तमहाबुद्धेलोमहर्षणबुद्धिमन् ॥ रामस्यचरितंपुण्यंमांत्वंश्रावयतत्वतः ॥ १ ॥ रामेणशिशुरूपेणकथंदशरथा
जिरे ॥ क्रीडाकृतापुनर्दिव्याभ्रातृभिःसाहितेनच ॥ २ ॥ कर्णपूरंसतांनित्यंरामचारित्रमुत्तमम् ॥ तस्मात्कथयमत्द्यंत्वंकथनेनिपुणो
त्द्यसि ॥ ३॥ सूतउवाच । कथयामिमहापुण्यांशिशुरामस्यसुंदराम् ॥ कथाममृततोमिष्टांवेदसारांसुगोपिताम् ॥४॥ मार्कंडेयोमुनिःपूर्वं
चित्रकूटगिरौमुदा ॥ समपृच्छत्तुवाल्मीकिंयत्त्वयापृच्छयतेधुना ॥५॥ श्रीरामोबालरूपीचभ्रातृभिःसहसुंदरः ॥जानुभ्यांसहपाणिभ्यांप्रां
गणेविचचारह ॥६॥ क्वचिच्चवेगतोयातिक्वचिद्यातिशनैःशनैः॥क्वचिच्चभरतोरिंगन्शीघ्रतोजानुपाणिभिः ॥७॥ क्वचिच्चलक्ष्मणोयातिशत्रु
घ्नेनस्वबंधुना॥ बालाःक्रीडंतितेसर्वेमातृभिरक्षिताःसदा॥८॥एहिचैहिमदीयांकंश्रीरामकरुणानिधे॥एवंपश्यंतिभाग्येनमातरौनिजबालका
न्॥९॥बालकास्तुयथान्योन्यंक्रीडंतिबाललीलया॥तथाक्रीडंतिरामाद्याबुद्ध्याप्राकृतयागृहे १० पादयोर्नूपुरारावंशृण्वन्यातिशनैःशनैः।
कुत्रापिजायतेशब्दइतिसंदिग्धमानसः। ११॥कदाचित्किंकिणीरावंकटौश्रुत्वापलायते॥स्थित्वास्थित्वापुनःस्थित्वामातुरंकंपलायते १२॥
पुनरुत्तीर्यचांकात्तुरामःक्रीडतिबालवत् ॥ तथातेभ्रातरःसर्वेरामस्येच्छानुसारतः॥१३॥क्रीडंतिसततंबालाजनानांसुखकारकाः॥ आदर्शे
क्वचिदात्मानंपश्यंतश्चात्मनोमुखम् ॥ १४ ॥ बालकंचद्वितीयंहिमत्वास्पृशतिपाणिना ॥ अलब्ध्वातस्यचांगानिरोदनंकुरुतेपुनः॥१५॥
क्वचिच्चवदनंरम्यंस्तंभेषुप्रतिबिंबितम् ॥ सुभगैरत्नयुक्तेषुचालकैरावृतंमुखम् ॥ १६ ॥ द्वितीयंबालकंमत्वाहास्यंचकुरुतेप्रभुः ॥ शत्रुघ्नो
जानुपाणिभ्यांरिंगन्भूमौनिजंमुखम् ॥१७॥ प्रतिबिंबितमालोक्यमत्वाबालंद्वितीयकम् ॥ तस्याननेस्वंसंयोज्यचोच्चैःकूजतितत्रह॥ १८॥

मातुरंकसमायातिप्रहसन्लक्ष्मणानुजः ॥ लक्ष्मणोपिनिजंबिंबंदृष्ट्वाहुंकुरुतेमुहुः॥१९॥भरतोपिनिजंबिंबंरत्नपृथ्व्यांहिभाषितम्॥ हास्यंच
कुरुतेमंदंमंदंमंदंपुनःपुनः ॥२०॥ जलपात्रेचरामेणचंद्रबिंबंविलोकितम् ॥ ग्रहणेतस्यहस्तंतुजलेतुकुरुतेप्रभुः ॥२१॥ नचायातियदाहस्ते
मातरंयाचतेतुतत् ॥ चषकंस्वल्पकंमातारौप्यंरत्नैश्चसंयुतम् ॥ २२ ॥ नीरेनिधायरामस्यपरोक्षेणसकौतुका ॥ रामायब्रुवतिक्षिप्रंगृह्यतां
चंद्रमंडलम् ॥२३॥ इमाश्चतारकाःपुत्ररत्नरूपानसंशयः ॥ सर्वंगृहाणभोरामभ्रातृभिःक्रीडनंकुरु॥२४॥एवंक्रीडंतिबालास्तेऽवताराश्चहरेः
खलु ॥ पंजरस्थंशुकंदृष्ट्वाकुरुतेतत्रतर्जनीम् ॥२५॥ सारिकायत्रपठतिकर्णंदत्वाशृणोतिसः ॥ वाजपालाःकरेवाजंरामचंद्रस्यसन्मुखे२६॥
श्येनपालोपिरामायश्येनंदर्शयतेनिजम् ॥ विलोक्यहसतेरामस्तत्तत्पक्षिगणंमुहुः ॥ २७ ॥ कदाचित्पद्भ्यामुत्थायपुनःपततिभूतले ॥
पुनरुत्थायपादौचक्षिपतेचशनैःशनैः ॥ २८ ॥ एवंभरतशत्रुघ्नौलक्ष्मणोपिमहामुने ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेपंचविंश
तितमोऽध्यायः ॥ २५ ॥ ॥ सूतउवाच ॥ ॥ काकोनाम्नाभुशुंडस्तुकदाचिदाजगामह ॥ स्वस्थानाच्चहरेर्भक्तोरामदर्शनलालसः
॥ १ ॥ रामंशष्कुलिहस्तंचखादंतंचपुनःपुनः ॥ तंदृष्ट्वाबालकंकाकइतिसंदिग्धमानसः ॥ २ ॥ कथमेषपरब्रह्मवेदेनपरिगीयते ॥
यदाविश्वंभरोरामःशक्तिमेंदर्शयिष्यति ॥ ३ ॥ इतिनिश्चित्यमनसारामहस्ताच्चशष्कुलीम् ॥ आकृष्यरभसोड्डीनोरामोमेकिंक
रिष्यति ॥ ४ ॥ सर्वात्मारामचंद्रोपितस्यविज्ञायमानसम् ॥ जहासैवैकरूपेणतंद्वितीयेनदुद्रुवे ॥ ५ ॥ यत्रयत्रभुशुंडोपितत्रत
त्ररघूद्वहः ॥ सप्तभूविवरान्काकःगतोरामभयाद्द्रुतम् ॥ ६ ॥ पृष्ठभागेनिरीक्षन्सधावमानोरघूत्तमम् ॥ योजनानांसहस्राणि
त्रिंशत्परिमितानिच ॥ ७ ॥ अधोभागेहिपातालाच्छेषनागश्चविद्यते ॥ तस्यचांकेहिक्रीडंतंशिशुरूपंरघूत्तमम् ॥ ८ ॥ तदाकाको

विलोक्याग्रेपृष्ठभागेपुनःशिशुम् ॥ अग्रेपश्चाद्गतिर्नास्तिमयाकिंक्रियतेझटित् ॥ ९ ॥ बलाद्दक्षिणतोशीघ्रंपलायेनिजरक्षया ॥ विचार्य्यै
वंभुशुंडोपिचोड्डीनोह्यपसव्यतः ॥ १० ॥ भूलोकंचपुनःप्रापतत्रमाघवतींपुरीम् ॥ शक्रेणवीज्यमानंचनिजसिंहासनेपरे ॥ ११ ॥ प
श्चादग्रेचरामंहिवीक्ष्यकाकोतिविस्मितः॥ उड्डीतोवामतस्तस्मादिंद्रस्यपुटभेदनात् ॥ १२ ॥ नगरंवीतिहोत्रस्यसजगामातिवेगतः॥ ददृ
शेतत्ररामंचवन्हिनापरिसेवितम् ॥ १३ ॥ रामंनिशाम्यकाकोपिशमनस्यगृहंगतः ॥ अंतकोरामचंद्रस्यपुरतोभातिदंडधृक् ॥ १४ ॥
एवंवीक्ष्यतदाकाकोजगामनिर्ऋतेःक्षयम् ॥ सेव्यमानंतदातेननिर्ऋतिनारामबालकम् ॥१५॥ तत्रापिनस्थितिंचक्रेपाशिनस्तुगृहंगतः॥ छ
त्रहस्तेनतेनापिसेव्यमानंचबालकम् ॥ १६ ॥ तदाश्चर्य्यंविलोक्याशुजग्मेप्राभंजनंपुरम् ॥ रत्नदंडप्रकीर्णेनसेव्यमानंतुतेनतम् ॥ १७ ॥
क्षपाकरस्यनगरंवायसःप्रापवेगतः ॥ भोज्यमानंतुचंद्रेणरामंदृष्ट्वापलायितः॥१८॥शूलिनोनगरंगत्वारामंदृष्ट्वातिवेगतः ॥ उत्पपातततश्चो
र्ध्वंस्वर्गलोकायवायसः॥ १९ ॥ तत्रचाग्रेहिगच्छंतंबालकंददृशेखगः ॥ सत्यलोकंमनश्चक्रेगंतुंपक्षीविशेषतः॥ २० ॥ तत्रगत्वाशिशुंराम
मजस्थनिजसद्मनि॥अजाद्यैश्चैवमुनिभिःपादयोःपरिशीलितम् ॥२१॥ एवंनिरीक्ष्यरामंतुनकुताश्चिद्गतिःखगः॥भूलोकंपुनराविश्यचात्मानं
ददृशेखगः॥२२॥ रामंचपृष्ठसंलग्नंबालरूपंचसुंदरम् ॥ मतिंचकाररामस्यभयंयेनैवजायते ॥२३॥ इतिज्ञात्वानिजंरूपंवर्द्धयामासवायसः
स्वयंतुपर्वताकारोदीर्घतुंडोभयानकः ॥ २४ ॥ पक्षौचाथमहादीर्घौपर्वतस्येवछादकौ ॥ पादावपिमहादीर्घौतालवृक्षोपमौचद्धौ ॥ २५ ॥
तयोर्मध्येनखादीर्घाअंकुशाइवदंतिनाम्॥ तदारामोमहातेजास्तार्क्ष्यंसस्मारवाहनम् ॥ २६॥ स्मरणाद्रामदेवस्यसंप्राप्तोविनतासुतः ॥
खगाधिपंसमारुह्यरामोधावतिवायसम् ॥ २७ ॥ खगेश्वरोपिपक्षाभ्यांरामाज्ञप्तोजघानतम् ॥ भुशुंडश्चसपक्षाभ्यांतताडविनतासुतम् ॥

॥ २८ ॥ गरुडेनपुनःकाकःपातितःपृथिवीतले ॥ पीडांप्रापतदाकाकोजगदाधारवाहनात् ॥ २९ ॥ वक्षस्थलेतुकाकस्यगरुत्मानारुरो
हच ॥ तस्यचोपरिरामोवैविश्वाश्रेयोहिपीडाति ॥ ३० ॥ तमुवाचाथरामोवैकिंकर्त्तव्यंत्वयाखग ॥ सूतउवाच ॥ शुभुंडोपिभयाविष्ट
स्तोतुंरामंप्रचक्रमे ॥ ३१ ॥ गद्गदस्वरयावाचारामेसंन्यस्यमानसम् ॥ भुशुंडउवाच ॥ नमोरामायमहतेबालरूपायतेनमः ॥ ३२ ॥ अ
जस्यजनयित्रेचशिवतातायतेनमः ॥ जाग्रत्स्वप्नसुषुप्तिभ्यःसदाभिन्नायतेनमः ॥ ३३ ॥ सर्वाध्यक्षायरामायक्षेत्रज्ञायनमोनमः ॥ योगिध्ये
याययोगाययोगलभ्यायतेनमः ॥ ३४ ॥ नमआद्यायबीजायशुद्धायपुरुषायते ॥ नमोविश्वंभरायेतिविश्वरूपायतेनमः ॥ ३५ ॥
केचिद्ध्यायंतित्वांरामजगद्रूपिणमीश्वरम् ॥ अपरेपंचविंशंचषड्विंशमुतचापरे ॥ ३६ ॥ ज्योतिरूपमरूपंचकेचिद्ध्यायंतिव्यापकम् ॥ अप
रेपरमेशंचनित्यलीलादिभिर्युतम् ॥ ३७ ॥ अपरेतेऽवतारांश्चसदाध्यायंतिचेतसा ॥ केचिद्विरागिणोलोकागृहंत्यक्त्वावनंगताः ॥ ३८ ॥
तत्रत्वामभिपश्यंतिघनरूपंहिसर्वथा ॥ ज्ञानिनश्चापिज्ञानेनव्यापकंत्वांस्मरंत्युत ॥ ३९ ॥ भक्ताभागवताभक्त्याभिन्नाभिन्नंहिचांडतः ॥
अपरेनियताहाराःस्वनाभिकमलेचत्वाम् ॥ ४० ॥ लोकपालैर्युतंरामंवायुंजित्वारहःप्रभो ॥ येयथात्वांप्रपद्यंतेतांस्तथैवभजस्यहो ॥ ४१ ॥
मायातेप्रबलारामययाजातमिदंजगत् ॥ तयासंमोहितोजीवोममाहमितिमन्यते ॥ ४२ ॥ यत्रतेतुनिजंस्थानंदिव्यधामइतिश्रुतम् ॥ तत्रत्वं
रमसेनित्यंदिव्यधामनिभोहरे ॥ ४३ ॥ अजायास्तुत्रयःपादाःध्वंसाभावेनवर्जिताः ॥ संकोचोनविकासश्चक्कचित्तेषांनजायते ॥ ४४ ॥
तस्माद्दिव्यविभूतिःसागीयतेपरमर्षिभिः ॥ विष्वक्सेनादयोदेवानित्यास्तेपार्षदाविभो ॥ ४५ ॥ नवैस्पृशंतिसंसारंतवचेच्छानुसारतः ॥
अजायाश्चैकपादेनजायतेचइदंजगत् ॥ ४६ ॥ येभजंतिसदात्वांचजगत्तेषांहिदूरगम् ॥ भोरामतवमंत्रंचयेजपंतिसदाक्षितौ ॥ ४७ ॥

जीवन्मुक्तास्तुतेचांतेलभंतेपरमंपदम्॥ध्यानेचापिपदांभोजंहृदिचारोपयंतिये ॥ ४८ ॥ तेतरंतिमहात्मानःसंसारंदुःखसागरम् ॥अहंतुत
वपादाभ्यांपीडितोहृदयेहरेः ॥ ४९ ॥ कथंमुंचेनदुःखाच्चतेपदाक्रमितोपिसन् ॥ दर्शनार्थंमहिम्नस्तेशष्कुल्याकर्षणंकृतम् ॥ ५० ॥
स्वशक्तिर्दर्शितारामत्वयापूर्णेनमेप्रभो ॥ मुच्यतांमुच्यतांरामदीनोहंकरुणानिधे ॥ ५१ ॥ अहोभाग्यंहिमेभूरिपादस्पर्शोहितेकिल ॥
॥ सूतउवाच ॥ इतिविज्ञापितोरामःकाकेनहतपाप्मना ॥ ५२ ॥ तदारामःप्रसन्नात्माभुशुंडंमुमुचेप्रभुः ॥ भुशुंडःपुनरुत्थायजग्राहचर
णौहरेः ॥ ५३ ॥ मस्तकेतुकरंतस्यरामोदध्रेदयान्वितः ॥ पुनःपुनस्तुचोत्थायरामस्यचरणेपतत् ॥ ५४ ॥ पुनःपपाततार्क्ष्यस्यपादयोः
शिरसाखगः ॥ गरुडोपिदयायुक्तोभुशुंडंवाक्यमब्रवीत् ॥ ५५ ॥ उत्तिष्ठोत्तिष्ठभोकाकरामस्यचरणार्चक ॥ त्वयासंप्रीणितोरामोअहंचा
पिविशेषतः ॥ ५६ ॥ यशसेतवभोकाकह्यागमिष्यामितेंतिकम् ॥ रामतत्वविवित्सार्थंप्रष्टुंत्वांचमहाखग ॥ ५७ ॥ दिव्यज्ञानावयंसर्वे
विष्वक्सेनादयोद्विज ॥ हरेरामस्यकृपयामायास्पर्शोनविद्यते ॥ ५८॥ अज्ञानीवत्वहंकाकविपृच्छेहंकदापित्वाम् ॥ रामतत्वंमहाबुद्धेज
गत्सुयशसेतव॥५९॥इतिलोकावदिष्यंतिकाकोज्ञानीमहामतिः ॥ अज्ञानंगरुडस्यैवकृतंयेनैवदूरगम् ॥ ६० ॥ यशस्तुतवभोःकाकलो
केषुप्रचरिष्यति ॥ गरुडेनभुशुंडाद्धिज्ञानंप्राप्तंसुदुर्लभम् ॥ ६१ ॥ भुशुंडउवाच ॥ यूयंतुहरिभक्ताश्चरामस्यचरणार्चकाः॥ भविष्यतिच
मेभाग्यंयदात्वंह्यागमिष्यसि ॥ ६२ ॥ कृतार्थोहंकृतार्थोहंपादस्पर्शात्तुकाश्यप ॥ अस्मिन्क्षणेमयादेवज्ञानंप्राप्तंचसुंदरम् ॥ ६३ ॥ राम
स्यचरणांभोजस्पर्शात्तवमहामते ॥ सूतउवाच ॥ विज्ञाप्यैवंसकाकस्तुरामंवचनमब्रवीत् ॥ ६४ ॥ भुशुंडउवाच ॥ भोःश्रीराममहाभा
गभक्तिंमेदेहिनिश्चलाम् ॥ अनेनवान्यरूपेणसदामेहृदयेवस ॥ ६५ ॥ मायातेप्रबलारामययामोहवशोभवम्॥यथानमोहयेद्देवतथामांत्वं

विधेहिभो ॥ ६६ ॥ सदाचतवभक्तानांसंगमोमेभवेद्यथा ॥ तथाकुरुष्वदेवेशनाथस्त्वंमेयतःप्रभो ॥ ६७ ॥ यत्सुखंसाधुसंगेषुतन्नस्वर्गे
नमानुषे ॥ सत्येपुनर्भवेनैवतस्मात्संगश्चप्रार्थ्यते ॥६८॥सूतउवाच॥काकेनप्रार्थितोरामस्तमूचेमंदयागिरा ॥ भक्तस्यमोहनोभक्त्यातथा
दीनंविलोक्यच ॥ ६९ ॥ श्रीरामउवाच ॥ यथावदसिभोकाकतत्तथैवभविष्यति ॥ उपदेक्ष्यसित्वंज्ञानंगरुडायमहात्मने ॥ ७० ॥ मा
ययातवबंधोनभविष्यतिकदाचन ॥ आश्रमेतवमायानप्रभावंस्वंकरिष्यति ॥ ७१ ॥ हृदयेममरूपंचनिवसिष्यतितेसदा ॥ भक्तानां
ममसंगस्तुभविष्यतिनसंशयः ॥ ७२ ॥ कृतंस्तोत्रंपठिष्यंतिमानवास्तेविचक्षणाः ॥ तेषांवैसकलान्कामान्प्रददामिनसंशयः
॥ ७३ ॥ धनकामोपठेद्यस्तुषण्मासंकृतनिश्चयः ॥ विधिनाब्रह्मचर्येणलभतेधनमेवहि ॥ ७४ ॥ पुत्रार्थंपठतेयस्तुवर्षमेकम
नन्यधीः ॥ अवश्यंलभतेपुत्रमन्यच्चापिमहामते ॥ ७५ ॥ सूतउवाच ॥ वरंदत्वातदारामस्तत्रैवांतर्दधेस्वयम् ॥ विसर्जितस्तुरा
मेणपक्षिराडपिनिर्ययौ ॥ ७६ ॥ भुशुंडोपिनिजंस्थानंप्रापद्यतप्रहर्षितः ॥ ध्यायमानःसदारामंबालरूपिणमीश्वरम् ॥ ७७ ॥
भुशुंडश्चाशिवश्चापिरामदर्शनलालसौ ॥ अपश्यतांतदारामंब्रह्मवेषधरौचतौ ॥ ७८ ॥ बालक्रीडामयातुभ्यंवर्णितामुनिसत्तम ॥ अन्या
मपिप्रवक्ष्यामिबालक्रीडांमनोहराम् ॥ ७९ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेषड्विंशतितमोऽध्यायः ॥ २६ ॥ सूतउवाच ॥
कदाचिद्रामचंद्रस्तुबालरूपीतुकौतुकी ॥ चकारविविधांक्रीडांमातॄणांमोहनायच ॥ १ ॥ जानुभ्यांसहपाणिभ्यांरिंगमाणइतस्ततः ॥
मातरःपृष्ठसंलग्नाःप्रस्नुवंत्यःस्तनात्पयः ॥२॥ धावमानास्तुप्रेम्णावैबालरक्षैकहेतवे ॥ तांबूलभक्षणंत्यक्त्वातथाशय्यांहिरणमयीम् ॥३॥
बालक्रीडाचमत्कारंपश्यंत्योइपितस्ततः ॥ लेभिरेपरमानंदंपूर्वैःसुकृतकोटिभिः ॥४॥ चेटिकास्तुसदाबालान्मातृभिःसाहितामुहुः॥ररक्षुः

शस्त्रजातिभ्यःपतनाच्चैववेगतः ॥ ५ ॥ रामचंद्रंतुकौशल्याचालनंशिक्ष्यतेमुहुः ॥ रामस्यदक्षिणंबाहुंपाणिनागृह्यभामिनी ॥ ६ ॥ मातृ
पाणिंसमालंब्यमंदंमंदंचचालसः ॥ कारयन्नूपुरारावंकिंकिणीनांपदेपदे ॥७॥ एवंभरतशत्रुघ्नौलक्ष्मणादींश्चमातरः ॥ लालयंतिस्मप्रेम्णा
वैकौशल्याद्यास्तुमातरः ॥ ८ ॥ कौशल्यापिमहाराज्ञीरामंचांकेनिवेश्यच ॥ मुखंसंवीक्ष्यरामस्यमुदमापपरांसती ॥ ९ ॥ दंतपंक्तिंमुखे
वीक्ष्यकुंदमुक्तासमप्रभाम् ॥ बंधूकसदृशींजिव्हामोष्ठंसिंदूरसन्निभम् ॥१०॥कपोलौचमहादिव्यौचंद्रनीलसमप्रभौ ॥ चिबुकंबालकस्याथ
नासिकांशुकनासिकाम् ॥ ११ ॥ तिलकंमृगनाभस्यवीक्ष्यमातामुदान्विता ॥ चापंपंचशरस्येवतादृशंभृकुटीद्वयम् ॥१२ ॥ आवृतंचा
लकैरास्यंग्रथितैर्मणिमौक्तिकैः ॥ रामस्यतुंडंजननीनिरीक्ष्यचचुचुंबच ॥ १३ ॥ प्रेम्णाक्षियुग्मंचपुनर्वदनंहिविलोक्यच ॥ कंठेस्वकी
ये सामाताबालकंमिलितिस्मह ॥ १४ ॥ श्रीरामचंद्रस्यनिरीक्ष्यशोभांतथातृणंत्रोटयातिस्ममाता ॥ मादृष्टिदोषोममबालकेभूदेवं
विचारंमनसाचकार ॥ १५ ॥ कौशल्याभवनेराजास्थितोभूत्किलचैकदा ॥ रामंस्वांकेनिधायाथलालयामासप्रेमतः ॥ १६ ॥ भरतं
वातुतत्राथभरतेनाजगामह ॥ सुमित्रातत्रपुत्राभ्यांप्राविशद्गजगामिनी ॥ १७ ॥ अन्याश्चतत्रशतशोराजदाराःसमाजगुः ॥ अन्याश्चज्ञा
तयःसर्वादास्योदासाअनेकशः ॥ १८ ॥ नरेश्वरोमहाभागःकौशल्याभवनेशुभे ॥ क्रीडयामासबालान्वैपरब्रह्मस्वरूपिणः ॥ १९ ॥ रामं
कदाचिदुत्थायभरतंलक्ष्मणंक्वचित् ॥ शत्रुघ्नंचतथाराजालालयामासक्रोडके ॥ २० ॥ तस्मिन्कालेतुगंधर्वोविश्वावसुरितिश्रुतः ॥
आजगामनिजस्त्रीभिरंतःसद्मचभूपतेः ॥ २१ ॥ भूपेनाकारितस्तत्रनान्यथागमनंगृहे ॥ राजानंवर्द्धयित्वातुतथाराज्ञीरनेकशः ॥ २२ ॥
राज्ञासभाजितःसोथतेनाज्ञप्तःस्थितोहिसः ॥ विश्वावसुरुवाच ॥ सृणुष्वराजशार्दूलवाक्यंनोगुणगौरवात् ॥ २३ ॥ विश्वएवधनंयस्यत

स्माद्विश्वावसुस्त्वहम् ॥ अहंगुणैःस्वकीयैस्तुससुतंतोषयेचत्वाम् ॥ २३ ॥ इत्युक्त्वावादयामासमृदंगान्मुरजादिकान् ॥ वंशादिकांश्चसु
षिरान्वीणादींश्चैवतांत्रिकान् ॥ २४ ॥ तालादिकान्घनांश्चैवतथावाद्याननेकशः ॥ स्वयंतुवादयामाससुस्वरांपरिवादिनीम् ॥ २५ ॥
अप्सरसस्तुननृतुःसंगेतस्यसमागताः ॥ नाटकान्तत्रगायंतिरघ्वादीनांचभूभुजाम् ॥ २६ ॥ मोहितास्तुतदासर्वेतासांगानेनतेजनाः ॥
राजादशरथोराज्ञ्योदासादास्यश्चबालकाः॥२७॥अन्याश्चज्ञातयःसर्वाःपक्षिणःपशवस्तथा ॥ जंगमाजंगमाजाताजंगमाजंगमास्तदा॥२८॥
कर्णपात्रैस्त्रियःपीत्वातेषांगीतामृतंतुताः ॥ नाशकन्स्मरवेगेनचात्मानंप्रतिगूहितम् ॥ २९ ॥ बालारामादयोप्येवंमोहितागानपानतः ॥
मातुरंकात्समुत्थायगंधर्वांकेसमारुहन्॥३०॥गानंत्यक्त्वातुगंधर्वोविश्वावसुर्महातपाः ॥ लालयामासबालांश्चभाग्यंमत्वाधिकंस्वकम्॥३१॥
नृपादयस्तुतेसर्वेबालान्वीक्ष्यमुदंययुः ॥ ऊचुःपरस्परंलोकागीतमाहात्म्यमीदृशम् ॥ ३२ ॥ बालानामपिमोहोभूदन्येषामपिकाकथा ॥
मातरस्तुतथासर्वाहस्तान्प्रासार्यचाब्रुवन् ॥ ३३ ॥ अत्रागच्छंतुहेपुत्राःगंधर्वांकाच्चवेगतः ॥ स्तन्यंधयंतुभोबालाविश्वावसुस्तुगच्छतु ॥
॥ ३४ ॥ एवमाकारिताश्चापिनचाजग्मुश्चमातरम् ॥ पुनःपुनस्तुतस्यैवचांकेलीनास्तुचार्भकाः ॥ ३५ ॥ तदातुमातरश्चापिविस्मयं
जग्मुरुत्सुकाः ॥ राजादशरथश्चापिनराःसर्वेतुभूरिशः ॥ ३६ ॥ सूतउवाच ॥ कौशल्यारामजननीसुमित्रालक्ष्मणप्रसूः ॥ गंधर्वमूचतुः
प्रेम्णाबालकानांसुखायच ॥ ३७ ॥ कौशल्यासुमित्रेऊचतुः ॥ अत्रैवातिष्ठगंधर्वबालकानांसुखायच ॥ मानितःप्रीतियुक्तैश्चह्यस्माभिर्नृ
पवेश्मनि ॥ ३८ ॥ विश्वावसुरुवाच ॥ देवराजस्यचाग्रेवैवयंगानेसुयोजिताः ॥ आज्ञांविनानतस्यैवतवगेहेवसेमहि ॥ ३९ ॥ तमामंत्र्य
पुनर्देविह्यागमिष्यामहेध्रुवम् ॥ कौशल्योवाच ॥ इदानींगम्यतांदेवतंपृष्ट्वापुनराव्रज ॥ ४० ॥ बालकानांसुखार्थंनःशक्रस्त्वांननिषि

ध्याति ॥ कैकयीचतदाश्रुत्वागंधर्वगमनंदिवि ॥ ४१ ॥ चुकोपचसदोमध्येविश्वावसुंजगादच ॥ बालकान्मोहयित्वानःकुत्रयास्यसिकै
तव ॥ ४२ ॥ इंद्रोस्माकंगृहेगातुंत्वांनिषिध्यतिनोकदा ॥ कदाचिच्चमदाविष्टःनिषेधंकुरुतेतव ॥ ४३ ॥ तदाराज्ञोहिबाणौघैःपीडितो
धःपतिष्याति ॥ वाक्यमुक्तातुसाबालाजगादनृपतिंप्रति ॥ ४४ ॥ धनुर्बाणंसमानीयप्रक्षिप्यनृपतेःपुरः ॥ कैकय्युवाच ॥ बाणेपत्रंसमावे
ष्ट्यचेंद्रलोकंचप्रेषय ॥ ४५ ॥ गंधर्वोत्रयथातिष्ठेत्तथाकुर्याच्चवृत्रहा ॥ वाक्यंराज्ञाःसमाश्रुत्यतथाचक्रेचतद्वशः ॥४६॥ इषौपत्रंसमाबध्य
उपस्पृश्यजलंशुचिः ॥ चापेबाणंसमाधत्तपठित्वामंत्रमुत्तमम् ॥ ४७ ॥ मुमोचबाणंसहसास्वर्गलोकायभूमिपः ॥ प्रभावात्तस्यमंत्रस्यक्ष
णात्स्वर्गंजगामसः ॥४८॥ शक्रस्यचपपाताग्रेसुराणांपश्यतांसताम् ॥ बाणाक्षरंविलोक्याशुविज्ञायनृपतेरिषुम् ॥४९॥ वाचयामासपत्रंतु
बाणादुत्धृत्यवेगतः ॥ अत्रत्यंकिलवृत्तांतंगंधर्वार्थंतुदेवराट् ॥ ५० ॥ ज्ञात्वानिवेदयामासकैकेय्याःकोपकारणम् ॥ देवेभ्योपिजहासाशु
वाक्यमूचेत्विदंसुधीः ॥ ५१ ॥ कदामयानिषेधस्तुगंधर्वस्यकृतःसुराः ॥ वयंचतस्यचाज्ञायांसदावर्तामहेविभो ॥ ५२ ॥ राज्ञोहिभुज
वीर्येणदैत्येभ्योनोभयंनहि ॥ तस्यचाज्ञांकथंहन्मःप्राणेभ्योपिगरीयसीम् ॥ ५३ ॥ परंतुकैकयीरुष्टाप्रीतिंनोजानतीतुसा ॥ अपराधंविना
राज्ञीपरुषंमाब्रवीद्वचः ॥५४ ॥ परुषस्यफलंदास्येरामराज्येनसंशयः ॥ यदारामस्यराज्यंतुप्रारभिष्यतिभूपतिः ॥५५॥ वधार्थंरावणस्या
हंयौवराज्यमहोत्सवे ॥ राज्यभंगंकरिष्यामिरामस्यपरमात्मनः ॥५६॥ तस्मिन्नवसरेवाणींकैकेय्याःकंठकूपके ॥ अवस्थाप्यतदावाण्या
ह्यंजसायोजयामिताम् ॥५७॥ कथयित्वातुसर्वेभ्योदेवेभ्यःपाकशासनः ॥ दूतंवैप्रेषयामासह्ययोध्यांराजसन्निधौ ॥५८॥ दूतोराजानमभ्येत्यसं
देशंनमुचिद्विषः ॥ नृपायकथयामासगंधर्वार्थंमहामतिः ॥५९॥ दूतउवाच ॥ श्रूयतांराजशार्दूलवाक्यंनोवशवर्तिनाम् ॥ इदंवाक्यंब्रवीमित्वांयेन

प्रीतिर्भवेत्तव ॥६०॥ इंद्रउवाच॥वयंदेवाश्चगंधर्वास्तथाह्यप्सरसोमुदा ॥ तवचाज्ञांप्रतीक्षामोदिवारात्रौनराधिप ॥६१॥ सर्वैंत्वदीयागंधर्वा
आज्ञांकस्यप्रतीच्छथ ॥ मंजुघोषादयःसर्वावयंतुतववेश्मनि ॥६२॥ यदिचाज्ञाभवेद्राजन्द्वारपालाभवेमहि॥सूतउवाच॥वदंतमेवंदूतंतुम
घोनोवाक्यमुत्तमम् ॥६३॥ राजादशरथःप्रेम्णादूतमाहहसन्निव॥दशरथउवाच॥भोदूतवदतांश्रेष्ठवचसातोषितोत्यहम् ॥६४॥ इंद्रायप्रण
तिंब्रूहिगच्छत्वंहिममाज्ञया॥एतेबालास्त्वदीयाश्चप्रेष्यारक्ष्यास्त्वयाचवै ॥६५॥ आवयोर्वस्तुजातंतुनाहिभेदस्तुचावयोः ॥ येवरास्तुवरा
स्तेषांबुद्धिर्नास्त्यत्रसंशयः ॥६६॥ इत्युक्तोतेनराज्ञावैगतोदूतस्तथावदत् ॥ इंद्रोपिमुमुदेविप्रह्यत्रत्याःश्रूयतांकथाः ॥६७॥ इतिज्ञात्वातु
गंधर्वोविश्वावसुरुदारधीः॥रामंसमर्पयद्राज्ञ्यैस्वकीयांकाश्चहर्षितः॥६८॥पुनर्गातुंसमारेभेबालकानांसुखायच ॥ गायंतिनृत्यंतिवदंतिकेचि
न्नंदंतिचान्येपुरतोर्भकानाम्॥गंधर्वराजेनगुणैःस्वकीयैःसंमोहितास्तत्रजनाश्चसर्वे॥६९॥एवंसदादाशरथिंचरामंगंधर्वराजोयुवतीभिरित्थम्
गानैश्चनृत्यैःपरितोष्यबालान्लेभेमुदंभूपतिनासनित्यम् ॥७०॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेसप्तविंशतितमोऽध्यायः ॥२७॥
॥ सूतउवाच ॥ एकदाचमहाराज्ञीकौशल्यारामसंयुता ॥ अट्टंसमारुहच्छीघ्रंदासीभिः परिवारिता ॥ १ ॥ तत्रारुह्यनिजांकेतुरामं
कृत्वातुभामिनी ॥ स्थितासासुमुदेतीवरामेसंन्यस्तमानसा॥२॥निधिलाभाद्दरिद्रस्यतस्यप्रेमतुतत्रवै॥ तथैवराममातुर्वैरामेस्नेहोह्यवर्धत॥
॥ ३ ॥ एतस्मिन्नंतरेराजासुमित्राभवनेविशत् ॥ तत्रपुत्रौसमालोक्यमुदमापसुखंवशी ॥ ४ ॥ सुमित्राराजराज्ञीतुराजानंप्रत्यपूजयत् ॥
पुष्पांजल्यामहाप्रेम्णातांबूलादिसमर्हणैः ॥ ५ ॥ राजादक्षिणजानौतुलक्ष्मणंसमरोहयत् ॥ तथावामेतुशत्रुघ्नंतयोर्वक्रंविलोकयत् ॥ ६ ॥
कौशल्याचेटिकाकाचिन्नाम्नाख्यातातुसुंदरी ॥ केनचित्कारणेनापिसुमित्राभवनंगता ॥ ७ ॥ तत्रराजानमासीनंलालयंन्तंसुतौनिजौ

सार्द्धंसुमित्रयातंतुहसंतंवीक्ष्यलज्जिता ॥ ८ ॥ परावृत्यसुमित्रायाःभवनाद्रामसन्निधौ ॥ आगत्यददृशेतौतुलक्ष्मणंशत्रुसूदनम् ॥ ९ ॥
संदेहंपरमंप्रापतत्रतत्रचबालकौ ॥ वीक्ष्यबालापुनस्तत्रजगामकिलव्रीडिता ॥ १० ॥ राज्ञोंकेबालकौवीक्ष्यकौशल्यांपुनरेत्यसा ॥ पुनः
साददृशेतस्यकौशल्यानिकटेतुतौ ॥ ११ ॥ पुनस्तत्रपुनस्तत्रभ्रममाणापुनःपुनः ॥ एवंविंशतिवारांश्चददृशेविस्मितातुतौ ॥ १२ ॥
आगच्छतींतुगच्छंतींददर्शनृपतिःस्वयं॥शीघ्रमायासियासित्वमितस्तत्रभ्रमस्यहो ॥ १३ ॥ मोहितांभ्रमचित्तांचत्वांविजानामिसुंदरि ॥
राज्ञापृष्टापिसाबालालज्जयाव्रीडिताभवत् ॥ १४ ॥ पुनःपुनश्चराज्ञावैपृष्टासाचाब्रवीद्वचः ॥ गुरुत्वाद्राजराजस्यवाक्यभंगभयात्पुनः
॥१५ ॥ सुंदर्य्युवाच॥ ॥ भयाच्चतवराजेंद्रकथितुंलज्जितास्मिवै॥ अभयंदीयतांराजन्तदावच्मितवाग्रतः ॥ १६ ॥ सूतउवाच ॥ आज्ञप्ता
राजराजेनप्राहवाक्यंचसुंदरी ॥ राजानंचसुमित्रांचबालकौवीक्षतीमुहुः॥१७॥सुंदर्य्युवाच॥ इमौचबालकौराजन्शत्रुसूदनलक्ष्मणौ ॥
कौशल्यांकेमयादृष्टौरामस्यनिकटेस्थितौ ॥ १८ ॥ अत्रैवतवचांकेवैववर्त्ततसुमनोहरौ ॥ तत्रगच्छामितत्रैवचात्रह्यायामिअत्रवै ॥ १९ ॥
॥ संदेहंपरमंप्राप्तापुत्रौवीक्ष्यतवाधुना ॥ वाक्यंनिशम्यसुंदर्य्या राजराजोमहामतिः ॥ २० ॥ सत्यसन्धोदशरथो ह्यलभद्विस्मयंपरम्
॥ ययौशीघ्रंतयासार्द्धंकौशल्याभवनंनृपः ॥ २१ ॥ किमेषाजल्पतीनूनंममविस्मापनंवचः ॥ तत्रगत्वानरेशोपिचात्मनोददृशेसुतौ
॥ २२ ॥ क्रीडंतौरामचंद्रेणसुमित्रातनयौतुतौ ॥ तस्मिन्कालेस्मितंचक्रेकौशल्यायत्रतिष्ठति ॥ २३ ॥ गवाक्षेचमुखंकृत्वासुमित्राभवने
नृपः ॥ विलोकयामाससुतौक्रीडंतौजननीयुतौ ॥ २४ ॥ भवनेराममातुश्चसुमित्राभवनेपुनः ॥ आश्चर्य्यंपरमंलेभेतथास्वांतःपुरेशुभे
॥ २५ ॥ विचारमकरोद्भूपश्चेतसासपुनःपुनः ॥ यदातुनिर्णयंकर्त्तुंनशशाकमहीपतिः ॥ २६ ॥ आकारयद्गुरुंराजावसिष्ठंजपतांवरम्

॥ आगतस्तुवसिष्ठश्चराज्ञासंपूजितोविशत् ॥ २७ ॥ पप्रच्छचगुरुंराजाप्रहसन्तपसांनिधिं ॥ कारणंबालकानांचतत्रतत्रविलोकनात् ॥
॥२८॥ सूतउवाच ॥ क्षणंध्यात्वावसिष्ठस्तुबालानांचरितंधिया ॥ स्वस्येच्छयाचक्रीडंतिबालाएतेमहेश्वराः॥२९॥एकधादशधाचैवसहस्रं
कोटिधातथा ॥ असंख्यातानिरूपाणिह्येतेषांनहिसंशयः ॥ ३० ॥ नृपायनहिवक्तव्यंशिशूनांचरितंमया ॥ विज्ञातेवैभवेन्नूनंतदानैतादृ
शंसुखम् ॥३१॥ चित्तेह्येवंविचार्याथप्रोवाचनृपतिंमुनिः ॥ वसिष्ठउवाच ॥ श्रूयतांवचनंमेद्यगंधर्वेणकृतंत्विदम् ॥ ३२॥ विस्मयंतेयथारा
जन्गांधर्वकर्मचेदृशम् ॥ बालकौचसुमित्रायाभवनेतिष्ठतःसदा ॥३३॥ परंतुतवमोहार्थंगंधर्वेणात्रदर्शितौ॥आकारयतुगंधर्वंपरिपृच्छमयो
चितम्॥३४॥ आज्ञप्तोमुनिनाराजागंधर्वंसमुपाव्हयत् ॥ स्कंधयोर्बालकौतस्यचागतस्यविलोकयत् ॥३५॥ तदातुजहसेराजाबालकोवी
क्ष्यसर्वतः॥गंधर्वोपिनजानातिरामस्यचरितंत्विदम्॥३६॥इत्येवंवदतस्तस्यमुनेराज्ञश्चसन्निधौ॥नृपस्यनिकटेबालावंतर्धानंगतौततः ३७॥
सुमित्राभवनेतौचयथार्थंतिष्ठतःपुनः ॥ वसिष्ठेनपुनःप्रोक्तंदृष्टामायात्वयानृप॥३८॥यथाब्रवीमिराजेंद्रतथाकुरुनरोत्तम ॥ रामस्तुलक्ष्मणे
नापिसदाक्रीडंतुमंदिरे ॥ ३९ ॥ भरतोरिपुहन्ताचवयसोंशानुसारतः ॥ नकदाचिद्भ्रमस्त्वेवंतत्रराजन्भविष्यति ॥ ४० ॥ सूतउवाच ॥
मुनेर्वचनमाकर्ण्यतथास्त्वितिनृपोब्रवीत् ॥ इदमुद्दिश्यराजानंजगाममुनिपुंगवः ॥ ४१ ॥ गतेमुनौतदाराजासुमित्रानिकटेपुनः ॥ आव्ह
यामाससातूर्णंकौशल्यायत्रतिष्ठति ॥ ४२ ॥ बद्धांजलिरुवाचाथराजानंसातुभामिनी ॥ सुमित्रोवाच ॥ आगतास्मिमहाराजसमाज्ञप्तुं
त्वमर्हसि ॥ ४३ ॥ पतिर्नारायणःसाक्षात्तवाज्ञामममूर्द्धनि ॥ राजोवाच ॥ कौशल्याप्रांगणेरामोलक्ष्मणेनैवक्रीडतु ॥ ४४ ॥ तथैवशत्रु
हंताचभरतस्तेनक्रीडतु ॥ यथानजायतेमोहोमेंधर्वेणकृतोमम ॥ ४५ ॥ सुमित्रोवाच ॥ एवंभवतुभूपालबालकौमेतयोर्नुगौ ॥ उक्त्वा

चवंसुमित्रातुप्रविवेशस्वकंगृहम् ॥ ४६ ॥ नित्यंनित्यंतुचोत्थायप्रातःकालेतुमागधी ॥ लक्ष्मणंरामसान्निध्यंशत्रुघ्नंभरतस्यतु ॥ ४७ ॥
प्रेषयंतीमहाभागासुमित्रापतिदेवता ॥ रामस्तुलक्ष्मणेनापिभरतःशत्रुघातिना ॥ ४८ ॥ विचिक्रीडेमुदायुक्तौजनतानंदकारकौ ॥
एवंयुग्मंतुतेषांवैबालकानांबभूवह ॥ ४९ ॥ इतःपरंचरामस्यबालचारित्रमद्भुतम् ॥ वर्णयामिमहापुण्यंश्रोतॄणामघमोचनम् ॥५० ॥ इति
श्रीसत्योपाख्यानेसूतशौनकसंवादेऽष्टाविंशोध्यायः ॥ २८ ॥ सूतउवाच ॥ राजादशरथोब्रह्मन्मंदिरात्द्वारिनिर्ययौ ॥ रामंचांकेनि
धायाथश्यामंसुंदरविग्रहम् ॥१॥ पादयोःपादकटकंदधानंमणिनूपुरम् ॥ स्वर्णसूत्रेणग्रथितांमध्यमेक्षुद्रघंटिकाम् ॥२॥ करयोर्वलयंदिव्यं
रत्नराजिविराजितम् ॥ अंगदेचभुजामध्येरक्तरत्नविनिर्मिते ॥३॥ कंठेचकंठिकांरम्यांनीलरत्नेनशीलिताम् ॥ तथाद्वीपिनखंवक्रंकांचनेन
परिष्कृतम् ॥ ४ ॥ गजमुक्तांचनासायांकर्णयोःकुंडलेशुभे ॥ अलकैरावृतंवक्रंबिंदुनाचांजनस्यच ॥ ५ ॥ ईदृशंबालकंचांकेकृत्वाराजा
चतस्थिवान् ॥ चामरैर्वीज्यमानश्चजनैः कतिपयैर्वृतः ॥ ६ ॥ रत्नालकावधूःकाचित्कस्यचिद्रघुवंशिनः ॥ अट्टेस्थितास्वकीयेचराज्ञों
केददृशेसुतम् ॥ ७ ॥ दृष्ट्वादृष्ट्वापुनर्दृष्ट्वामोहितासाबभूवह ॥ विसस्मारतदाबालादेहंगेहंचसुंदरी ॥ ८ ॥ पतितासापृथिव्यांतुसखी
भिःपरिवारिता ॥ मुहुर्हिक्कांचकाराशुनिमग्नारूपसागरे ॥ ९ ॥ व्यजनैर्वीज्यमानापितथालेभेनचेतनाम् ॥ यथाकथंचित्साबालाचोत्थि
ताव्रीडिताभवत् ॥ १० ॥ सखीभ्योवर्णनंनैवचक्रेरामस्यमूकवत् ॥ पर्यंकेशयनंचक्रेत्यक्तंचान्नंजलंतथा ॥ ११ ॥ ध्यायतीहृदयेचैवं
रामोंकेमेकदाविशेत् ॥ यदारामोममांकंतुस्वयमागत्यक्रीडति ॥ १२ ॥ अन्नंभुंजेतदानूनंकीलालंचतथैवहि ॥ हृदयेध्यायतीत्थ्येवंरामा
र्थंवरवर्णिनी ॥ १३ ॥ पर्यंकेपतितात्थ्येवंजनैर्ज्ञातासुदुःखिता ॥ तस्याःपतिस्तुनाम्नावैवीरसिंहोरघूत्तमः ॥ १४ ॥ चिकित्सांकारया

मासभार्यायाःपरमौषधैः ॥ दुःखितायांचतस्यांवैराजादशरथःसुतः ॥ १५ ॥ प्रासादेचपुनर्गत्वाकौशल्यायैसमर्पयत् ॥ कैके
य्याभवनंरम्यंसजगामनरोत्तमः ॥ १६ ॥ दुःखंरत्नालकायास्तुकौशल्यासुश्रुवेतदा ॥ गोत्रस्यगौरवाच्चैवतथासंबंधमात्मनः
॥ १७ ॥ दुःखितांदर्शितुंराज्ञीरामेणसहनिर्ययौ ॥ हर्म्यंचनिकटंतस्याःपद्मामेवविनिर्गता ॥ १८ ॥ ऐश्वर्यंचपरित्यज्य
वीरसिंहस्यगौरवात् ॥ राज्ञोबहुमतत्वाच्चभवनंप्रापतस्यवै ॥ १९ ॥ सखीगणेनविंशत्यायुक्तांराज्ञींददर्शसः ॥ वीरसिंहउवाच ॥
आगम्यतांमहाराज्ञिकिंकराणांगृहंत्विदम् ॥ २० ॥ यदाभाग्यंभवेद्भूरिनृपागच्छंतिवेश्मनि ॥ अंतःपुरेप्रवेशश्चाक्रियतांयत्रदुः
खिता ॥ २१ ॥ मानितावीरसिंहेनकौशल्यातांददर्शह ॥ दृष्ट्वारत्नालकाराज्ञींपर्यंकाच्छीघ्रमुत्थिता ॥ २२ ॥ निकटेस्थापयामासह्यासने
परमाद्भुते ॥ अतसीपुष्पसंकाशंरामंचांकेनिरीक्ष्यसा ॥ २३ ॥ दुःखंपलायितंतस्यारामचंद्रप्रसादतः ॥ ऊचेरत्नालकारामंकरौप्रसार्य्य
मोहिता ॥ २४ ॥ ममक्रोडंत्वमागच्छदुःखंशीघ्रमपाकुरु ॥ रामोनारायणःसाक्षात्तस्याःकामस्यपूर्त्तये ॥ २५ ॥ सस्मयित्वातदातूर्णं
तस्याः क्रोडंसमारुहत् ॥ पस्पर्शबालासाबालंबालंमत्वात्मनोनिजम् ॥२६॥ चुचुंबचाननंसातुकंठेकृत्वाचबालकम् ॥ घ्राणंचकारमूर्ध्नंश्च
रामस्यपरमात्मनः ॥ २७ ॥ रामस्पर्शेनयज्जातंतत्सुखंवचसांपरम् ॥ मनसाप्रार्थयामासवैकुंठचरणांबुजम् ॥२८॥ अहोदेवमहाविष्णो
पुत्रंदेहिममेदृशम् ॥ रामस्तुपुनरंबायाअंकंचारुरुहेहसन् ॥ २९ ॥ व्याधीरत्नालकायास्तुदूरेयातोचरामतः ॥ कौशल्यांपूजयामास
मालयाचंदनेनसा ॥ ३० ॥ रामहस्तेमहारत्नमर्पयामासभामिनी ॥ कौशल्यासुखिनींकृत्वावीरसिंहवधूंतदा ॥ ३१ ॥ जगामस्वगृहं
राज्ञीरामेणसहपूजिता ॥ नज्ञातंकेनचित्तस्याःकारणंसुखदुःखयोः ॥ ३२ ॥ रामंविनामहाचित्रंज्ञातुंशेकेनकश्चन ॥ वाल्मीकिश्चमुनिर्वै

दरामचंद्रस्यचेच्छया ॥ ३३ ॥ वक्ष्येरत्नालकायास्तुचरितंपरमाद्भुतम् ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेएकोनत्रिंशोऽध्यायः ॥२९॥ श्रीशौनकउवाच ॥ व्यासशिष्यमहाभागह्यमृतंवचनंतव ॥ मुहुःपिबामितेवक्त्रात्सुंदरैःकर्णसंपुटैः ॥१॥ वृत्तंरत्नालकायास्तुमह्यंकथयमाचिरम् ॥ रामार्थेकिंकृतंनूनंदंपतिभ्यांमहामुने ॥ २ ॥ स्वभावोरामचंद्रस्यकल्पवृक्षतरोर्यथा ॥ प्रार्थितःपुत्रभावेनतस्याःपुत्रत्वमागमत् ॥ ३ ॥ कस्मिन्जन्मनिरामस्तुतस्याःपुत्रोबभूवह ॥ मयापृष्टंत्वमाचक्ष्वचरितंतुहरेरिदम् ॥ ४ ॥ सूतउवाच ॥ शृणुशौनकवक्ष्येहंगुणातीतगुणानहम्॥ रत्नालकाविचार्य्यैदंपत्यासहमहामुने ॥ ५ ॥ कथंरामोभवेत्पुत्रआवयोर्धर्मनिष्ठयोः ॥ अनेनैवविचारेणव्यतीतानिदिनान्यहो ॥ ६ ॥ इच्छयारामचंद्रस्यहृदातेनैवप्रेरितौ ॥ जग्मतूराश्रमंतूर्णंवसिष्ठस्यरथाश्रितौ ॥ ७ ॥ आश्रमाच्चवसिष्ठस्यदूरेस्थाप्यरथंनिजम् ॥ वसिष्ठचरणौदृष्ट्वासमीपेजग्मतुस्तदा॥८॥वसिष्ठशिष्योनाम्नातुविष्णुमित्रोबहिःस्थितः॥आश्रमाच्चतदादृष्ट्वापादौजगृहतुर्मुनेः॥९॥दंपतीऊचतुः॥स्वामिन्वयंतुसंप्राप्तागुरोःसंदर्शनायवै॥आज्ञांतस्यप्रतीक्षामानौनिवेदयचागतौ।१०। विष्णुमित्रस्तयोर्वाक्यंश्रुत्वावस्थाप्यतत्रतौ ॥ कथनायप्रविष्टस्तुतयोरागमनंगुरौ ॥११॥ वसिष्ठस्तुकृपायुक्तोह्लादिरामेणप्रेरितः॥आहूयतांत्वयाशीघ्रंनिकटेचात्मनोध्रुवम् ॥ १२ ॥ विष्णुमित्रेणतौनीतौगुरुणाप्रेरितेनवै ॥ तौदंपतीमहाहृष्टौजग्मतुर्गुरुसन्निधौ ॥ १३ ॥ गुरुंदृष्ट्वाचतौप्रेम्णाववंदातेपदौमुनेः ॥ गुरुणाचशुभाह्याशीर्दत्तागृह्यनतौस्थितौ ॥ १४ ॥ अभ्यर्णेस्थापितौतेनवसिष्ठेनमहात्मना ॥ पप्रच्छकुशलंतौहिवचसामृतवर्षिणा॥ १५ ॥ वीरसिंहउवाच ॥ सदैवकुशलंनाथगुरुर्येषांभवादृशः ॥ कोटिजन्मसमुत्थेनधर्मेणैवतुलभ्यते ॥ १६ ॥ सूतउवाच ॥ शिष्यास्तुपरिचर्यायांगवांयातायतस्ततः ॥ वसिष्ठस्यमुनेःकालेवसिष्ठःप्राहतौपुनः ॥१७॥ वसिष्ठउवाच ॥ किमर्थमाश्रमेयात्रा

कृताचात्रममप्रियौ ॥ कथयिष्यामितत्सर्वंसंदेहेमामनःकृथाः ॥ १८ ॥ रत्नालकोवाच ॥ जानासित्वंचसर्वेषांसंकल्पंमानसोद्भवम् ॥
किमर्थंपृच्छसेस्वामिन्नशक्ताकथितुंत्वयि ॥ १९ ॥ सूतउवाच ॥ क्षणमात्रंमुनिस्तस्थौध्यानस्तिमितलोचनः ॥ बालरूपीतदारामोमन
स्याविर्बभूवह ॥ २० ॥ सएवकृष्णरूपेणमुनिनाददृशेपुनः ॥ सर्वंतेनैवविज्ञातंभविष्यंजन्मकर्मच ॥ २१ ॥ एतज्ज्ञात्वामुनिस्तूर्णमूचे
रत्नालकांप्रति ॥ वसिष्ठउवाच ॥ शृणुरत्नालकेवाक्यंसंकल्पस्तेमनोहरः ॥ २२ ॥ सतुकष्टवहुत्वाच्चसंसिद्धस्तुभविष्यति ॥ गच्छतंतुपुन
स्तत्रयत्रनारायणोमुनिः ॥ २३ ॥ लोकानांस्वस्तयेद्यापितपस्तपतिदारुणम् ॥ सेवतेनारदोयस्यपादपद्मंचनित्यशः ॥ २४ ॥ नाम्नाक
लापग्रामस्तुविख्यातोजगतीतले ॥ यत्रगत्वानजायंतेजनन्याजठरेजनाः ॥ २५ ॥ वसंतिमुनयोयत्रराजर्षीणांकदंबकम् ॥ तत्रगत्वाजग
न्नाथमाराधयजगद्गुरुम् ॥ २६ ॥ चैत्रेमासिसितेपक्षेनवमीपक्षवर्द्धनी ॥ पुनर्वसुयुताचैवयुवाभ्यांक्रियतामितिः ॥ २७ ॥ निराधारौचवर्षा
यांहेमंतेजलशायिनौ ॥ तापसौकिलचाग्नीनांपंचानांचैवग्रीष्मके ॥ २८ ॥ भवतांतुफलाहारौकायक्लेशरतौपुनः ॥ जिव्हयारामचंद्रस्य
नित्यंजपपरायणौ ॥ २९ ॥ अतसीपुष्पसंकाशंद्विभुजंरघुनंदनम् ॥ ध्यायंतौमनसाचैवलभतांपुत्रमीश्वरम् ॥ ३० ॥ व्रतेननवमीनांतुतप
सादुर्घटेनवै ॥ द्वापरांतेयुवांजन्मलभतांगोकुलेपुनः ॥ ३१ ॥ वीरसिंहस्तुनंदोवैयशोदाचभवत्वियम् ॥ रामोवांकृष्णरूपेणपुत्रत्वंचग
मिष्यति ॥ ३२ ॥ इत्युक्तौमुनिनातौतुप्रहृष्टौद्वौबभूवतुः ॥ तंप्रणम्ययथान्यायमाययुः स्वगृहंपुनः ॥ ३३ ॥ आहूयब्राह्मणान्सर्वा
स्तथामागधवंदिनः ॥ अश्वान्गजान्रथान्प्रादाद्वीरसिंहोविचक्षणः ॥ ३४ ॥ सर्वंदत्वातुविप्रेभ्योधरांवृत्तिकरीमपि ॥ गृहदानंचगो
दानमन्नाद्यैरितरैरपि ॥ ३५ ॥ संतर्प्यंचयथान्यायंप्रणाममकरोत्ततः ॥ अयोध्यावासिनःसर्वेदंपतीद्रष्टुमागताः ॥ ३६ ॥ साधुसाधुवदं

तस्तेपरिवव्रुःसमंततः ॥ ब्रह्मचर्यधरौतौचसूक्ष्मवस्त्रधरावुभौ ॥ ३७ ॥ हर्म्यंतुगुरवेदत्वाराजानंप्रापतुःपुनः ॥ राज्ञासभा
जितौतौचजगादवचनंनृपः ॥ ३८ ॥ राजोवाच ॥ धन्यौयुवांमहाभागौकुलरीतिकरौमम ॥ रघूणांचकुलेजातास्तेषांरीति
स्त्वचेदृशी ॥ ३९ ॥ जरयाग्रस्तमात्मानंदृष्ट्वाहित्वागृहंवनम् ॥ जग्मुःपूर्वंमहात्मानोयुवाभ्यांतुतथाकृतम् ॥ ४० ॥ ना
पूर्वाचकृतावृत्तिःपूर्वैराचरिताकृता ॥ गम्यतांगम्यतांतत्राविलंबाद्धियुवामितः ॥ ४१ ॥ तीर्थंजिगिमिषोर्यस्तुयात्राभंगकरोतिच ॥ रौरवे
पच्यतेमूढःसाकंपितृपितामहैः ॥ ४२ ॥ तत्रगत्वाजगन्नाथमाराधयमहामते ॥ नारायणस्तुविश्वात्मालिप्सांतेपूरयिष्यति ॥ ४३ ॥ दंप
तीऊचतुः ॥ एवंभवतुभोराजंस्तववाक्यंयथार्थतः ॥ चक्रतुर्गमनायैवराज्ञाचानुगतौपथि ॥ ४४ ॥ राजदारैस्तथाप्यन्यैःसंस्तुतौतौययुर्व
नम् ॥ विनिवार्यपुनःसर्वान्पूजितौतैश्चपूजितान् ॥ ४५ ॥ आश्रमंतुहरेःप्राप्यमुदितौतौबभूवतुः ॥ उषित्वातत्रतौवर्षान्नवमींव्रतपरायणौ
॥ ४६ ॥ तीर्थस्नानरतौतौचजपध्यानपरायणौ ॥ एवंचकुर्वतोःस्वैरमेकादशसमागताः ॥ ॥ ४७ ॥ कायक्लेशंचकुर्वाणौरामेसंन्यस्त
मानसौ ॥ तदारामःप्रसन्नात्मादर्शयामासस्वांतनुम् ॥ ४८ ॥ वरंब्रूहिवरंब्रूहितुष्टोहंतपसाचवाम् ॥ सूतउवाच ॥ वाक्यंनिशम्यरामस्य
त्वमृतेनैवसिंचितौ ॥ ४९ ॥ प्राहतूरामचंद्रंचगिरागद्गदयाचतौ ॥ तयोर्वाणीतुजिव्हायामुवासरामप्रेरिता ॥ ५० ॥ दंपतीऊचतुः ॥
एकादशसमास्तप्तंतपःपरमदुष्करम् ॥ तावत्परिमितंरामह्यावयोस्त्वंगृहेवस ॥ ५१ ॥ पुत्रोभूत्वानजानीवतत्वंतेभरताग्रज ॥ श्रीरामउ
वाच ॥ एवंभवतुवांपूर्णःकामःसंपद्यतांयुवाम् ॥ ५२ ॥ एकादशैववर्षाणिनिवसिष्यामितेगृहे ॥ द्वापरांतेतुवैकुंठंयास्यथःपरमाद्भुतम् ॥
॥ ५३ ॥ यंप्राप्यननिवर्ततेसंसारेमृत्युभक्षके ॥ इत्युक्त्वातुगतोरामआत्मनःपरमांदिशम् ॥ ५४ ॥ तौतुदेहंपरित्यज्यविष्णुलोकंचजग्मतुः

॥ द्रोणोधरेतिजज्ञातेदेवलोकेपुनस्तुतौ ॥ ५५ ॥ तत्रापिब्रह्मणाज्ञप्तौतेपातेपरमंतपः ॥ अजेनेतिवरोदत्तोहरिःपुत्रोभविष्यति ॥ ५६ ॥
इत्युक्तौचपुनः स्वर्गंभुक्त्वाभोगान्निजार्जितान् ॥ गोकुलेचतदोत्पन्नौयशोदानंदएवच ॥५७॥ द्वापरांतेमहात्मानौवसुदेवस्तुदेवकी ॥ मथुरा
यांतयोर्जातईश्वरोलक्ष्मणाग्रजः॥५८॥ आत्मनोवरदानाच्चवराच्चैवतथाविधेः ॥ पितरौचपरित्यज्यकृष्णरूपेणराघवः॥५९॥निवासमकरो
त्तत्रनंदवेश्मनिमाधवः ॥ वीर्याणितस्यभूरीणियथारामस्यसंतिहि ॥६०॥ रामस्तुकृष्णरूपेणरामरूपेणमाधवः ॥ तयोर्भेदोनकर्तव्यःकृ
त्वावैपापमाप्नुयात् ॥६१॥ अनेनकारणेनैवह्येकादशसमाहरिः ॥ उवासगोकुलेकृष्णोमथुरायांततोगतः ॥ ६२॥मयातेकथितंसर्वंरामवृत्तं
चशौनक ॥ शृणुयात्कीर्तयेद्वापिपापहानिस्तुतस्यवै ॥६३॥इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेत्रिंशत्तमोऽध्यायः ॥३०॥ शौनकउ
वाच॥यत्त्वयावर्णितंस्वामिन्नवमीव्रतमुत्तमम् ॥ माहात्म्यंत्वंतुमेब्रूहिनवम्याविधिपूर्वकम् ॥१॥ कस्यकस्यविशुद्धिश्चनवम्याश्चव्रतेनवै॥
मनोनतृप्यतेसूतमिष्टारामकथायतः ॥२॥सूतउवाच॥ श्रूयतांभोद्विजश्रेष्ठसेतिहासंकथानकम्॥यस्यश्रवणमात्रेणरामेप्रीतिश्चजायते॥३॥
पुरात्रेतायुगेब्रह्मन्महेंद्रागिरिसत्तमे ॥ अगस्त्यस्तुतपस्तेपेपर्वतेमुनिसेविते ॥ ४ ॥ यस्मिन्वृक्षामहादीर्घागगनस्पर्शिनोद्विज ॥ सालास्ता
लास्तमालाश्वत्थाम्रानीपाश्चखादिराः ॥ ५ ॥ धात्रीवृक्षामहादीर्घाश्चिंचिनीकाधवास्तथा ॥ कपित्थावंजुलाश्चैवजंबुवृक्षाःसतिंदुकाः ॥६॥
विल्वानिवास्तथाचोच्चैर्वदर्यक्षाभयामलाः ॥ खर्जूराम्रातकव्राताःपारिजातादयोद्रुमाः ॥ ७ ॥ पनसाःकोविदाराश्चसरलादेवदारवः ॥
पाटलाश्चंपकाश्चैवनागचंपादयोद्रुमाः ॥ ८ ॥ एतैर्दिव्यैश्चवृक्षैश्चशोभितेपर्वतोत्तमे ॥ महेंद्रेचतपस्तेपेत्वगस्त्योभगवानृषिः ॥ ९ ॥ महा
महाशिलायत्रलताभिःपरिगुंफिताः ॥ यस्यशृंगेघनावासंकुर्वन्तिसततंऋषे ॥ १० ॥ भानोर्मार्गंसमारोद्धुंपुनर्विंध्यइवोत्थितः ॥ प्रभाभि

श्वमणीनांतुसदादीप्तोबभूवयः ॥ ११ ॥ लतानांचप्रतानैश्चवेष्टितःपुष्पशालिभिः ॥ गगनंयस्तुशृंगैश्चभुवंपादैरभिश्रुतः ॥ १२ ॥ सर्वं
व्याप्ययथाविष्णुस्तथापर्वतसत्तमः ॥ पुष्पैश्चात्मतटोत्थैर्यःपक्षिणांमादकोनगः ॥ १३ ॥ बह्वचःश्चयत्रनद्यस्तुचावरोहंतिभूतले ॥ पितु
रंकाद्यथाकन्याःपतिंसिंधुमुपद्रुताः ॥ १४ ॥ सुमेरोर्यत्रचादायमहेंद्रस्याचलेसुराः ॥ रत्नानिविविधान्यत्रचक्रुस्तेचेंद्रप्रीतये ॥ १५ ॥
यस्माद्धनानिलोकाश्चधनदादिवलेभिरे ॥ यत्रारुत्यजनैः प्रेम्णासाक्षात्सूर्योविलोक्यते ॥ १६ ॥ क्षणंक्षणंमुनीनांतुत्यानन्दोयेनजायते
पौर्णमास्यामयंनूनंपूर्वस्यांतुहिमांशुकः ॥ १७ ॥ मार्तंडश्चप्रातीच्यांतुत्यस्तस्योपरिमस्तके ॥ बिभर्तिघंटकेद्वतुचंद्रसूर्य्यौयथा
त्विभः ॥ १८ ॥ सुवर्णानांशिलायत्ररौप्याणांतुविशेषतः ॥ यस्यशृंगेषुगीर्वाणाःस्थिताःपश्यंतिभास्करम् ॥ १९ ॥ दिवानक्तंतथाचं
द्रंयुवत्यालपनंयथा ॥ शृंगेभ्योयत्रधाराश्चपतंतिपृथिवीतले ॥ २० ॥ जलदास्तुनिजैर्गात्रैःसदैवाच्छादयंतियम् ॥ मानिन्योयत्रमानं
तुत्यक्त्वाक्रीडंतिस्वामिना ॥ २१ ॥ तटायस्यमहादीर्घाःप्राणिनांचैवदुर्गमाः ॥ तरवोयत्रपुष्पाणिबिभ्रंतिस्वाशिखोपरि ॥ २२ ॥
संचरंतिमृगायत्रचांगानीवमहीभृतः ॥ रटंतिकोकिलायत्रछायायांपथिकानिच ॥ २३ ॥ पस्पर्धंतेतुतंदृष्ट्वाप्रियायाश्चुंबनरेतम् ॥
नराननोपितंदृष्ट्वापिपासापरिरंभणे ॥ २४ ॥ किन्नरायत्रवर्तंतेयुक्तानानाविधैर्मुखैः ॥ नराननमयंदृष्ट्वातुरंगवदनश्चयः ॥ २५ ॥
पस्पर्शांतिसदाचोच्चैःपर्वतेमुनिसेविते ॥ वाप्योयत्रमहादीर्घामणिसोपानशोभिताः ॥ २६ ॥ नीलोत्पलैर्जलैर्यासांनीलेनैवतुमिश्रितम् ॥
वह्वीनांतुकुलंयत्रचमरीणांतुविद्यते ॥ २७ ॥ लज्जांवहंतितत्राथदेवानांवतयोषितः ॥ गुहायाःसंमुखेकुटच्यांतस्यामेवसुसंस्थिताः
॥ २८ ॥ सूर्य्यरश्मेस्तुसम्यक्कौमणिभित्तौयदाभवेत् ॥ भवन्तिब्रीडितानग्नादुकूलानांचधारणे ॥ २९ ॥ कलभैर्यत्रक्रीडन्तिपद्मानां

कुसुमैरिभाः ॥ रात्रावौषधयोयत्रप्रज्वलंतिसहस्रशः ॥ ३० ॥ मदोन्मत्तास्तुगंधर्वायत्रक्रीडंतिभूरिशः ॥ कामिनीभिर्दिवारात्रौ
देवताइवनंदने ॥ ३१ ॥ वार्षिकान्वैघनान्वीक्ष्यत्वधोभागेतुलंवितान् ॥ आरोहंतितदाशृंगमुच्चकैस्तान्निवासिनः ॥ ३२ ॥ एवं
भूतेत्वगेतत्रवसंतिऋषयस्सुराः ॥ आसनंतुमहेंद्रस्यतथावायोःशुभस्थलम् ॥ ३३ ॥ हिमांशोर्यत्रचास्थानंतथायमकपर्दिनोः ॥
सिंधुजागिरिजायत्रसावित्रीचसरस्वती ॥ ३४ ॥ अदितिश्चदितिश्चैवक्रीडंतिपतिभिःसह ॥ वलारातिरगेह्येवमुवासकुंभसंभवः
॥ ३५ ॥ नाम्नास्सुतीक्ष्णःशिष्योवैमुनिंपप्रच्छयत्तुमाम् ॥ यूयंपृच्छथरामस्यनवम्याव्रतमुत्तमम् ॥ ३६ ॥ सुतीक्ष्णउवाच ॥ भग
वन्योगिनांश्रेष्ठनवम्यास्त्वंफलंवद ॥ व्रतस्यकरणेवापिकोविधिस्तत्रकार्यते ॥ ३७ ॥ पापानांप्रलयंकस्यचकारनवमीव्रतम् ॥ सूतउ
वाच ॥ सुतीक्ष्णेनचपृष्टेवैप्रत्युवाचमुनीश्वरः ॥ ३८ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेनवमीमहात्म्येएकात्रिंशोऽध्यायः ॥३१॥
॥अगस्त्यउवाच ॥ तत्तेहंकथयिष्यामिनवमींपापनाशिनीम् ॥ यस्यांहिजन्मरामस्यपूर्णस्यपरमात्मनः ॥ १ ॥ चैत्रेमासिसितेपक्षेनव
म्यांतुपुनर्वसौ ॥ तत्रमध्यान्हवेलायांकौशल्यासुषुवेसुतम् ॥ २ ॥ ततोदेवाःसगंधर्वाःसिद्धचारणगुह्यकाः ॥ दिव्यतूर्याण्यवादंतमुदि
तास्तत्रतत्रह ॥३॥ चिंतामणिर्मणीनांतुवृक्षाणांकल्पवृक्षवत् ॥ व्रतानामपिसर्वेषांतथावैनवमीव्रतम् ॥४॥ येकुर्वंतिव्रतंविप्रनवमीमुक्तिदा
यिनी ॥ महोत्सवंतथापूजांतेपियांतिपरांगतिम् ॥५॥ देवानांकार्यसिद्ध्यर्थंसाधूनांरक्षणायच ॥ वधार्थंयातुधानानामवतीर्णःस्वयंहरिः॥
॥ ६ ॥ चैत्रेमासिनवम्यांतुजातोरामःस्वयंहरिः ॥ पुनर्वस्वर्क्षसंयुक्तासातिथिःसर्वकामदा ॥ ७ ॥ श्रीरामनवमीप्रोक्ताकोटियज्ञशता
धिका ॥ चैत्रशुक्लातुनवमीपुनर्वसुयुतायदि ॥ ८ ॥ तस्मिन्दिनेमहापुण्येराममुद्दिश्यभक्तितः ॥ यत्किंचित्क्रियतेकर्मतद्भवक्षयकार

कम् ॥ ९ ॥ उपोषणंजागरणंराममुद्दिश्यतर्पणम् ॥ तस्मिन्दिनेतुकर्त्तव्यंब्रह्मप्राप्तिमभीप्सुभिः ॥ १० ॥ रामएवपरंब्रह्मतद्दिनंरामतोष
कम् ॥ उपोषणंजागरणंतस्मात्कुर्याद्विशेषतः ॥ ११॥ यस्तुरामनवम्यांतुनियतस्तर्पयेत्पितॄन् ॥ तेसर्वेतत्क्षणादेवयांतिविष्णोःपरंपदम्
॥१२॥यस्तुरामनवम्यांहिदद्याद्वित्तानुसारतः ॥ यत्किंचिदपितत्सर्वंमहादानसमंभवेत् ॥ १३ ॥ धन्योलोकोव्रतपरोरामनामपरायणः ॥
तिथिर्धन्याचनवमीयस्यांजातोहरिःस्वयम् ॥१४॥ येनवमीव्रतपरामहोत्साहरताश्चये ॥ भगवद्रूपांगतिंयांतिचाक्षयांसुरसेविताम् ॥१५॥
यस्तुरामनवम्यांतुकुर्याद्रामव्रतंयदि ॥ तुलापुरुषदानादिफलंप्राप्नोतिमानवः ॥ १६ ॥ सूर्यग्रहेकुरुक्षेत्रेमहादानैःकृतैःशतैः ॥ यत्फ
लंतदवाप्नोतिश्रीरामनवमीव्रतात् ॥ १७ ॥ कुर्य्याद्रामनवम्यांतुचोपोषणमतंद्रितः ॥ मातुर्गर्भमवाप्नोतिनैवरामोभवेत्स्वयम् ॥ १८ ॥
नवमीचाष्टमीयुक्तावर्ज्याविष्णुपरायणैः ॥ उपोषणंनवम्यांवैदशम्यामेवपारणम् ॥१९॥ नीलोत्पलदलश्यामंपीतांबरधरंविभुम् ॥ द्विभु
जंकंजनयनंदिव्यसिंहासनेस्थितम् ॥ २० ॥ वसिष्ठाद्यैश्चपरितोवृतंरत्नकिरीटिनम् ॥ सीतासंलापचतुरंदिव्यगंधाधिवासितम् ॥२१॥चा
पद्वयंकरेचाग्रेसेवितंलक्ष्मणेनच ॥ शत्रुघ्नभरताभ्यांचपार्श्वयोरथसेवितम् ॥ २२ ॥ ध्यायन्ननन्यभावेनद्वादशाक्षरमन्वहम् ॥ पूजयेद्विधि
तोनित्यंश्रीरामंन्यासपूर्वकम् ॥ २३ ॥ मंत्रसंध्यांविधायैवंत्रिकालंपूजयेत्सदा ॥ नपुष्करसमंतीर्थंनव्रतंनवमीसमम् ॥ २४ ॥ नकेश
वात्परोदेवोननदीजान्हवीसमा ॥ किंवर्णयाम्यहंविप्ररामजन्मदिनंशुभम् ॥२५॥ स्वयंब्रह्मावतीर्णोहिलोकानांचसुखावहः ॥ सूतउवाच॥
सुतीक्ष्णोपिपुनःप्रश्नंचकारमुनिपुंगवम् ॥२६॥ माहात्म्यंरामचंद्रस्यनवम्यांपूजनेतथा ॥ सुतीक्ष्णउवाच ॥ भगवन्योगिनांश्रेष्ठसर्वशास्त्र
विशारद ॥ २७ ॥ किंतन्मंत्रंपरंजाप्यंकिंध्यानंमुक्तिसाधनम् ॥ ज्ञातुमिच्छामितत्सर्वंब्रूहिमेमुनिसत्तम ॥ २८ ॥ अगस्त्यउवाच ॥

सुतीक्ष्णतन्महाभागशृणुवक्ष्यामितत्वतः ॥ यत्परंयद्गुणातीतंयज्ज्योतिरमलंविभुम् ॥२९॥ तदेवपरमंतत्त्वंकैवल्यपदकारणम् ॥ श्रीरामेतिपरंजाप्यंतारकंब्रह्मसंज्ञकम् ॥ ३० ॥ ब्रह्महत्यादिपापघ्नमितिवेदविदोविदुः ॥ श्रीरामरामेतिजनायेवदंत्यपिसर्वदा ॥ ३१ ॥ तेषांभुक्तिश्चमुक्तिश्चभविष्यतिनसंशयः ॥नमस्कृत्यप्रवक्ष्यामिरामनाममनामयम् ॥ ३२ ॥ अयोध्यानगरेरम्येरत्नमंडपमध्यगे ॥ स्मरेत्कल्पतरोर्मूलेरत्नसिंहासनंशुभम् ॥ ३३ ॥ तन्मध्येऽष्टदलंपद्मंनानारत्नप्रवेष्टितम् ॥ सौवर्णंराजतंवापिकारयेद्रघुनंदनम् ॥ ३४ पार्श्वेभरतशत्रुघ्नौ धृतछत्रकरावुभौ ॥चापद्वयसमायुक्तंलक्ष्मणंकारयेत्सुधीः ॥ ३५ ॥ मातुरंकशयंराममिंद्रनीलसमप्रभम् ॥ कोमलांगंविशालाक्षंविद्युद्वर्णांबरावृतम् ॥ ३६ ॥ भानुकोटिप्रतीकाशंकिरीटेनविराजितम् ॥ रत्नग्रैवेयकेयूरंरत्नकुंडलशोभितम् ॥ ३७ ॥ रत्नकांचनमंजीरंकटिसूत्रैरलंकृतम् ॥ श्रीवत्संकौस्तुभोरस्कंमुक्ताहारोपशोभितम् ॥ ३८ ॥ सौवर्णेराजतेपात्रेषट्कोणंचैवसंलिखेत् ॥ अलाभे विल्वपीठेवास्थापयेद्रघुनंदनम् ॥ ३९ ॥ वस्त्रद्वयसमायुक्तंदिव्यरत्नविभूषितम् ॥ अस्त्रशक्तिसमायुक्तंदेवेशंपूजयेक्रमात् ॥ ४० ॥ प्रणवंपूर्वमुच्चार्यनमःशब्दंततोवदेत् ॥ भगवत्पदमाभाष्यवासुदेवायइत्यपि ॥ ४१ ॥ ततःसर्वात्मसंयोगयोगपीठात्मनेनमः ॥ इतिमंत्रेणतन्मध्येकुर्यात्पुष्पांजलिंपुनः ॥ ४२ ॥ एवंसंपूजयेत्पीठेदेवमावाह्यभक्तितः ॥ अर्घ्यादिधूपदीपांतानुपचारान्विधायच ॥ ॥ ४३ ॥ ततोनुज्ञाप्यदेवेशंपरिवारांश्चपूजयेत् ॥ पूर्वंषट्कोणमध्येतुहृदयादीनिषट्क्रमात् ॥ ४४ ॥ मूलमंत्रेणकर्त्तव्याउपचाराश्चषोडश ॥ इंद्रादिलोकपालांश्चवसिष्ठादिमुनीनापि ॥ ४५ ॥ सर्वदिक्पालमंत्रेणपूजयेद्भक्तिसंयुतः ॥ अशोककुसुमैर्युक्तंमध्येदेवस्यदापयेत् ॥ ४६ ॥ अथार्घ्यमंत्रः ॥ दशाननवधार्थायस्वधर्मस्थापनायच ॥ दानवानांविनाशायदैत्यानांनिधनायच ॥ ४७ ॥ परित्राणायसाधू

नांजातोरामःस्वयंहरिः ॥ गृहाणार्घ्यंमयादत्तंभ्रातृभिःसहितोनघः ॥ ४८ ॥ प्रतियामंविशेषेणह्यर्चयेद्रघुनंदनम् ॥ पुराणैस्तोत्रपाठैश्चवेद
पारायणेनच ॥ ४९ ॥ नृत्यैर्गीतैश्चवाद्यैश्चरात्रिशेषंव्यपोह्यच ॥ प्रातःस्नात्वाचसावित्रींजप्त्वासन्ध्यामुपासयेत् ॥५० ॥ दशाक्षरेणमंत्रेण
देवेशंमनसास्मरेत् ॥ देवदेवंप्रणम्याथपूर्ववत्पूजयेत्सुधीः ॥ ५१ ॥ नवम्यांपूजनंतुभ्यंश्रीरामस्यह्युदाहृतम् ॥ माहात्म्यंकथयिष्यामि
सेतिहासंपुरातनम् ॥ ५२ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेद्वात्रिंशोऽध्यायः ॥३२॥ अगस्त्यउवाच ॥ अत्रतेकथयिष्यामिकथां
परमसुंदराम् ॥ मरुकांतारदेशेचबभूवुःपंचपापिनः ॥ १ ॥ एकस्तुतैलकारोहिलुंपकेतिचकथ्यते ॥ तंतुकारोद्वितीयश्चनाम्नाशंकुरिति
श्रुतः ॥ २ ॥ तृतीयश्चनटाज्ञेयोह्याह्वातस्यतुलुंठकः ॥ चतुर्थोंधीवरोदुष्टोनाम्नालोकेचजंतुहा ॥ ३ ॥ पंचमःकुंभकारस्तुधर्महेतिप्रथा
मगात् ॥ पंचग्रामेषुपंचानामेकैकस्याभवत्स्थितिः ॥ ४ ॥ तैलकारस्यगोदोंषोबभूवतैलपीडने ॥ इतिदोषंनरैर्ज्ञात्वाराज्ञाग्रामाद्बहि
ष्कृताः ॥ ५ ॥ तंतुकारस्तुभार्यायामनुजस्यैवसंगकृत् ॥ नटश्चपथिकान्सर्वान्सदालुंठतिकानने ॥ ६ ॥ धनुर्बाणधरःपापीतंतुकारगृहे
स्थितः ॥ राजातौतुगृहीत्वाचयष्टिघातानकारयत् ॥ ७ ॥ धीवरःकुंभकारश्चसदाचौर्य्यपरायणौ ॥ राजलोकैर्गृहीतौचकदाचिच्चौरक
र्मणि ॥ ८ ॥ बध्वानीतौनृपस्याग्रेपापिनौपरतापिनौ । विमलात्मेतिराजर्षिर्देहभंगंनचाकरोत् ॥ ९ ॥ एषराज्ञांपरोधर्मश्चौराणांमारणं
तुयत् ॥ ज्ञानिनांतुमतंनैवतस्माद्राज्ञाविमोचितौ ॥ १० ॥ देहाभेदेनयोर्दंडःकर्त्तव्योविदुषानरैः ॥ वपनंद्रविणादानंदेशान्निर्य्यापणंतथा
॥ ११ ॥ एषवैसर्वदुष्टानांवधोनान्योस्तिदैहिकः ॥ इतिज्ञात्वांनरेशेनराज्यान्निर्य्यापितौचतौ ॥ १२ ॥ तैलकारोनटश्चैवकुंभकारः
कुविंदकः ॥ धीवरोपिमहापापीपंचानांमेलनंवने ॥ १३ ॥ बभूवपापिनांदैवाद्धिंस्रानांपरितापिनाम् ॥ ग्राममागत्यपंचैतेचौर्यंकुर्वंति

नित्यशः ॥ १४ ॥ मुषित्वाद्रव्यबहुलंपलायंतिवनंपुनः ॥ ग्रामांतरंपुनर्गत्वातत्रचौर्यंचचक्रिरे ॥ १५ ॥ तस्मिन्देशेमुहुर्ग्रामालुंठि
तास्तैश्चपापिभिः ॥ मुषित्वातत्रबहुलंवेश्याभोगपरायणाः ॥ १६ ॥ मद्यपानरताश्चैवमांसाहारोपजीविनः ॥ गोविप्रसुरसाधूनांसदानिं
दापरायणाः ॥ १७ ॥ एवंतेपापिनोराज्ञास्वदेशाच्चनिराकृताः ॥ राज्ञानिराकृताःसर्वेदुःखितास्तेसदाभवन् ॥ १८ ॥ देशाद्देशांतरंग
त्वानपुनःशर्मलेभिरे ॥ किंकुर्मोहिवयंचेतिब्रुवंतोह्यनिशंमुहुः ॥ १९ ॥ भ्रमंतएवतेसर्वेनानादेशेषुपामराः ॥ चक्रुरेनांसितेसर्वेलोकेनाना
विधानिच ॥ २० ॥ पापेनदुःखिताःसर्वेमुहुर्ग्लानिंचलेभिरे ॥ मधुमासेमहादिव्येनवम्यांरामजन्मनि ॥ २१ ॥ स्नानार्थंहिजनाःसर्वेचें
द्रप्रस्थात्प्रचेलिरे ॥ तेषांसंगस्तुतेषांवैचोराणामभिलुंपताम्॥२२॥एवंविचार्यतेचोराःकरिष्यामोत्रचौर्यंताम् ॥ पृष्टास्तुपथिकैःपंचह्यात्मा
नंतुब्रुवंतुनः ॥ २३ ॥ ॥ चोराऊचुः ॥ ॥ वयंवैयात्रिणःसर्वेमरुकांतारवासिनः ॥ तीर्थयात्रांकरिष्यामःश्रीमतांसंगमेनच ॥ २४ ॥
तेषामितीरितंश्रुत्वाकिंचिन्नोचुश्चतेजनाः ॥ अयोध्यांचागतास्तेतुनराःसुकृतिनोद्विज ॥२५॥ चौर्यस्यावसरस्तेषुनाभवत्पापकर्मणाम् ॥
उपशल्यमयोध्यायाःपुर्याद्वारेसमाययुः ॥ २६ ॥ अयोध्यायांतुयेविघ्नामूर्तिमंतस्तुतेसदा ॥ कामःक्रोधश्चलोभश्चदंभस्तंभोथमत्सरः
॥ २७ ॥ निद्रातंद्रातथालस्यंपैशून्यमितितेदश ॥ हस्तेदंडंगृहीत्वातान्मूर्तिमंतोविदुद्रुवुः ॥ २८ ॥ वध्यमानांश्चतान्दृष्ट्वादयायुक्तो
ब्रवीन्मुनिः ॥ असितोनाममेधावीनिसिषेधथचागतान् ॥ २९ ॥ भविष्यतिमहापुण्यंयुष्माकंपापतारणे ॥ इतिश्रुत्वामुनेर्वाक्यंनोविघ्नं
तेचचक्रिरे ॥ ३० ॥ तस्मिन्नवसरेचोरा असितंवाक्यमब्रुवन् ॥ ॥ चोराऊचुः ॥ ॥ भगवन्केनिषिद्धास्तेयेस्माकंरोधनेरताः ॥३१॥
॥ संशयंछिंधिनोब्रह्मन्तुभ्यंविप्रनमोनमः ॥ ॥ असितउवाच ॥ ॥ सभाग्याश्चभवंतोहियेषामागमनंत्विह ॥ ३२ ॥ एतेविघ्नाअयोध्या

यांबाधंतेहिनराधमान् ॥ मयानिवारिताःसर्वेंत्यक्त्वायुष्मान्पुनर्गताः ॥ ३३ ॥ विधिपूर्वमयोध्यायां यात्रांकुरुतसत्तमाः ॥ तीर्थयात्राप्र
भावेणपापराशिर्विनश्यति ॥ ३४ ॥ ॥ चोराऊचुः ॥ ॥ केनवैविधिनाब्रह्मंस्तीर्थयात्रांचरेमहि ॥ येनपापावयंसर्वेंव्रजिष्यामोऽमरावतीम्
॥ ३५ ॥ असितउवाच ॥ ॥ यस्यहस्तौचपादौचमनश्चैवसुसंयतम् ॥ विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुते ॥ ३६ ॥ पापंनकुरुतेयस्तु
वाङ्मनोभ्यांशरीरतः ॥ यथाशक्त्याचदानेनसतीर्थफलमश्नुते ॥ ३७ ॥ स्वर्गद्वारंसमासाद्यवपनंकारयेद्व्रती ॥ स्नात्वाव्रजेत्तुरामस्य
जन्मस्थानंविशेषतः ॥ ३८ ॥ गोहत्याब्रह्महत्याचगुरुस्त्रीगमनंतथा ॥ दोषैरेतैस्तथाप्यन्यैर्निर्मुक्तोजायतेक्षणात् ॥ ३९ ॥
मधुमासेसितेपक्षेनवम्यांरामजन्मच ॥ समागतानराःसर्वेदेवगंधर्वकिन्नराः॥४०॥जन्मस्थानंहिपश्यंतिस्नात्वाश्रीसरयूजले॥भवद्भिःक्रियतां
यात्रापापानिर्नाशहेतवे ॥ ४१ ॥ अग्रेगच्छंतुपश्यंतुत्वाश्चर्यंपरमाद्भुतम् ॥ सूतउवाच ॥ इत्युक्त्वांतर्दधेयोगीत्वासितोवैमहामुनिः
॥ ४२ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ सूतउवाच ॥ नगरंविविशुस्तेचपंचचोराश्चमोदतः
अयोध्याचतदामूर्तादृष्टातैश्चाग्रतस्तदा ॥ १ ॥ शुक्लांबरधरादेवीदिव्यचंदनभूषिता ॥ दिव्यमालांचसाकंठेविभ्रतीवैमनोहरा ॥ २ ॥
शंखचक्रधरादेवीचक्रारूढाशुभानना ॥ मूर्तिमद्भिश्चतीर्थैश्चपरितःसेविताचसा ॥ ३ ॥ चामरैर्वीज्यमानासासखीभिःपरिवारिता ॥ रामप्रि
यापुरीचाद्याविबुधैःसेविताचसा ॥ ४ ॥ वसिष्ठवामदेवाद्यैर्मुनिवृंदैरुपासिता ॥ ईदृशीविमलादृष्टापुरीचाद्यामहामते ॥ ५ ॥ यथापापैः
पुरीदृष्टातथानान्यैश्चपापिभिः ॥ असितस्यमुनेःसंगात्तथातस्यवरेणच ॥ ६ ॥ अयोध्यादर्शनंचक्रुर्लेभिरेपरमांमुदम् ॥ पापैर्नयोध्य
तेयस्यास्तेनायोध्येतिकथ्यते ॥७॥यथार्थंतस्यशब्दस्यकथयिष्यामिशौनक ॥ दृष्ट्वापापानिचोराणांगदामुद्यम्यसापुरी ॥८॥दुद्रावपश्य

तांतेषांचोराणांसम्मुखेतदा ॥ भयंतुलेभिरेचोराः किमस्माकंहनिष्याति ॥ ९ ॥ इतिमीमांसमानानांदेहेभ्यःपापराशयः ॥ निर्गतामूर्त्ति
मंतश्चयुद्धायसमुपास्थिताः ॥ १० ॥ नीलवस्त्राः करालास्यास्तथावैनिम्ननाभिकाः ॥ लोहभूषणसर्वांगास्तथारक्ताशिरोरुहाः ॥ ११ ॥
हस्तेनरहिताःकेचित्पद्भ्यांकेचनवर्जिताः ॥ नेत्रहीनास्तथाकेचित्कुब्जाःकाणास्तथापरे ॥ १२ ॥ भयंकरास्तथाचान्येकुष्ठिनोत्यपरेतथा
नानावेषधराश्चान्येपापानांपापविग्रहाः ॥ १३ ॥ उद्यतायुधदोर्दंडाः सत्यायाः सम्मुखंगताः ॥ अयोध्यापिमहाश्चर्यायथानामातथागुणा
॥१४॥ अयोध्ययाताडितास्तेगदयाभीमवेगया ॥ पलायनपराःसर्वेपुरस्तस्यानतस्थिरे ॥१५॥ तस्थुर्बहिश्चसत्यायाः समेत्याश्वत्थवृक्ष
के ॥ रुदंतोभैरवंनादंयेनलोकाविसिस्मिरे ॥ १६ ॥ पुर्याचाकारिताश्चोराः स्वर्गद्वारंसमाययुः ॥ यस्यांतिथौगताश्चोरानवमीमधुमासिकी
॥ १७ ॥ स्नात्वाचशरयूंदिव्यांजन्मस्थानंततोगताः ॥ व्रतिनोरामचंद्रस्यजन्मभूमेःप्रदर्शनात् ॥ १८॥ पापमुक्ताश्चतेसर्वेबभूवुःपंचपापि
नः ॥ तस्मिन्कालेतुचाहूयचित्रगुप्तंयमोथवै ॥ १९ ॥ कर्णेप्रोवाचगुह्यंचचोराणांसुखहेतवे ॥ यमउवाच ॥ क्षम्यतामपराधस्तुयन्म
याप्रोच्यतेधुना ॥ २० ॥ क्रियतांभवताचाद्यचोराणांपापमार्जनम् ॥ लेखनंपापपंक्तेस्तुसत्ययातच्चमार्जितम् ॥ २१॥ विष्णोरद्यापुरीस
त्यातस्यामाहात्म्यमीदृशम् ॥ पापमुक्तास्तुतेसर्वेपंचचोरास्तथापरे ॥ २२ ॥ मुमुक्षवस्तुयेकेचिदयोध्यांसमुपासते ॥ कृतांतस्यवचः
श्रुत्वामलिनौद्वौबभूवतुः ॥२३॥ गतःपरिश्रमोत्द्यावांबहुकालकृतोलिपौ ॥चित्रगुप्तावूचतुः ॥ एवंभवतुभोकाललेखनोपरतावयम्॥२४॥
जन्मभूमेस्तुरामस्ययदिपापानियांतिवै ॥ पापिनस्तुगमिष्यंतिसाकेतेरामजन्मनि ॥ २५ ॥ गतपापाभविष्यंतिकलिकालेतुपामराः ॥

॥ सूतउवाच ॥ एवंविश्राव्यतस्याग्रेविवर्णवदनौतुतौ ॥ ममार्जतुर्लिपिंशीघ्रंचोराणांपापसंभवाम् ॥ २६ ॥ इतिश्रीसत्योपाख्यानेसूत
शौनकसंवादेचतुस्त्रिंशोध्यायः ॥ ३४ ॥ सूतउवाच ॥ यमेनप्रेषितादूताःपर्यटंतिसदाक्षितौ ॥ पुर्याःपरिसरेतेतुददृशुःपापविग्रहान् ॥१॥
यमदूताऊचुः ॥ केयूयंपिप्पलेस्थित्वादुःखशोकपरायणाः ॥ किंकर्तुमाश्रितायूयंपिप्पलेकुत्रवासिनः ॥ २ ॥ पापविग्रहाऊचुः ॥ मरुकां
तारकोत्पन्नाः पापिभिःप्रतिपालिताः ॥ मातरंपितरंत्यक्तामर्यादांवेदसंभवाम् ॥ ३ ॥ अस्मासुप्रीतिसंयुक्तैस्तैरेवप्रतिपालिताः ॥
तेवयंयात्रिसंगेनसाकेतंप्रतिचागताः ॥ ४ ॥ ताडिताश्चवयंसर्वेपुर्याविमलयानया ॥ ५ ॥ देहंत्यक्त्वाचतेषांतुदुःखितात्रवसेमहि ॥ नव
मीचैत्रमासस्यशुक्लाचाद्यप्रवर्तते ॥ ६ ॥ तस्याव्रतप्रभावेनसरयूस्नानतःपुनः ॥ दर्शनाद्रामदेवस्यजन्मभूमेर्विलोकनात् ॥ ७ ॥
नाम्नासांतानकोलोकोविमानैस्तत्रतेगताः ॥ तेषांवियोगदुःखेनमित्राणांगमनेनच ॥ ८ ॥ तैर्वयंपालितामित्रैर्धर्मैस्त्यक्तामहात्मभिः ॥
तेपरित्यज्यचास्माकंलोकंसांतानकंगताः ॥ ९ ॥ मित्रसंगवियोगेनदुःखिताश्चात्रसंस्थिताः ॥ सूतउवाच ॥ ॥ मनोवैकरुणायांतुदूता
नांसंबभूवह ॥ १० ॥ अब्रुवन्वचनंक्रूरंपापरूपांश्चसांत्वयन् ॥ यमदूताऊचुः ॥ सहायंतुकरिष्यामोयुष्माकंमित्रमेलने ॥ ११ ॥ कार्यं
तुविद्यतेस्माकंहताचाज्ञायमस्यनो ॥ ईदृशीविमलाश्रेष्ठापापिनांचगतिप्रदा ॥ १२ ॥ भवद्भिःस्थीयतांचात्रयावद्भूमोयमंप्रति ॥ सूतउवा
च ॥ इत्युक्तातेततोजग्मुर्यमदूतास्त्वरान्विताः ॥ १३ ॥ यमंनिवेदयामासुःपापानांदुःखमेवच ॥ यमउवाच ॥ विमलायाश्चमाहात्म्यं
नवम्याश्चासितेमधौ ॥ १४ ॥ एतैर्नज्ञायतेदूतैर्महिमाचक्रपाणिनः ॥ जन्मभूमेस्तुमाहात्म्यंवक्तुंशक्तोनपद्मजः ॥ १५ ॥ पापकोटिसमायु
क्तश्चैत्रेनवमिकेतिथौ ॥ पापकोटिंनरस्त्यक्ताजन्मभूमेःप्रदर्शनात् ॥ १६ ॥ प्राप्नोतिपरमंलोकंयत्रगत्वानशोचति ॥ प्रसन्नायस्य

सत्याचतस्यकिंकुरुतेयमः ॥ १७ ॥ भवतांदुष्टबुद्धिस्तुयातावैविमलांप्रति ॥ क्षालनार्थंवयंतस्यागमिष्यामोद्यमाचिरम् ॥ १८ ॥
॥ सूतउवाच ॥ इत्युक्त्वायमराजोपिभूतप्रेतगणैर्वृतः ॥ आरुह्यमहिषंवेगात्सत्यांप्रतिजगामह ॥ १९ ॥ साकेतनगरेदृष्टोविश्वकर्मा
चशिल्पिराट् ॥ यमराजेनसंपृष्टःक्वत्वयागम्यतेधुना ॥ २० ॥ नवमीविद्यतेचाद्यतांत्यक्त्वाकुत्रयास्यसि ॥ विश्वकर्मोवाच ॥ आग
तोहंचसाकेतात्स्नात्वाश्रीसरयूजले ॥ २१ ॥ दर्शनंजन्मभूमेस्तुदेवैःसार्द्धंकृतंमया ॥ ब्रह्मणातत्रचाज्ञप्तोगमिष्येतत्पदंध्रुवम् ॥ २२ ॥
तत्रगत्वाचवेश्मानिकरिष्येयात्रिणामपि ॥ नवमीव्रतिनांतत्रसरयूस्नायिनांपुनः ॥ २३ ॥ जगामचातिवेगेनयमंविश्राव्यकारणम् ॥
निशम्यतन्मुखाद्गीतंयमभृत्याविसिस्मिरे ॥ २४ ॥ जगामयमराजोपिसाकेतनगरोद्भवम् ॥ माहात्म्यंश्रावयन्भृत्यान्तमसांतुददर्शह
॥ २५ ॥महिषंचपरित्यज्यननामविधृतांजलिः ॥ आदौप्रणवमुच्चार्यविमलायैतुमध्यतः ॥ २६ ॥ नमश्चांतेतुसंयोज्यमंत्रोयंसमुदाहृतः॥
सोन्वधावतवेगेनयत्रपुण्यांसुखांस्थितम् ॥ २७ ॥ गोप्रतारंशिरस्तस्यास्ततःपूर्वंतुकंटकम् ॥ तटेस्थित्वासरय्वावैसत्यायाश्चस्तुतिंमुहुः
॥ २८ ॥ अब्रवीत्परयावाण्यामेघनादगभीरया ॥ यमराजउवाच ॥ अयोध्यायैनमस्तेस्तुराममूर्त्यैनमोनमः ॥ २९ ॥ आद्यायैतुनम
स्तुभ्यंसत्यायैतुनमोनमः ॥ सरय्वावेष्टितायैचनमोमातस्तुभोसदा ॥ ब्रह्मादिवंदितेमातर्ऋषिभिःपर्युपासिते ॥ ३० ॥ रामभक्तप्रिये
देविसर्वदातेनमोनमः ॥ येध्यायंतिमहात्मानोमनसात्वांहिपूजताम् ॥ ३१ ॥ तेषांनश्यंतिपापानित्वाजन्मोपार्जितानिच ॥ अकारोवासु
देवस्याद्यकारस्तुप्रजापतिः ॥ ३२ ॥ उकारोरुद्ररूपस्तुतान्ध्यायंतिमुनीश्वराः ॥ सूर्यवंशोद्भवानांतुराज्ञांपरमधार्मिणाम् ॥ ३३ ॥ ते
षांसामान्यधातृत्वंतथासुकृतिनामपि ॥ नजानंतिमहिम्नोन्तंतवदेविमुनीश्वराः ॥ ३४॥ कथंतुज्ञायतेदूतैर्मदीयैर्बुद्धिवर्जितैः ॥ नक्षस्तेस्तु

सदादेविसदादेविनमोनमः ॥ ३५ ॥ नमोयोध्येनमोयोध्येपापंनस्त्वमपाकुरु ॥ सूतउवाच ॥ स्तुत्वैवंविररामाथसूर्यपुत्रोमहामनाः ३६
अयोध्यादर्शयामासतनुंस्वांतस्यप्रीतये ॥ वंदितायमराजेनसत्याप्राहयमंत्विदम् ॥३७॥ सत्योवाच ॥ वरंब्रूहिमहाबुद्धेप्रीताहंतेनसंशयः
यदर्थंचागतोसित्वंतन्ममाग्रेचभण्यताम् ३८ ॥ यमराजउवाच ॥ प्रसन्नामयिमातश्चेद्देहिस्थानंविकुंठके ॥ चोरेभ्यस्तुगतायेतुपापरूपाश्च
पिप्पले ॥ ३९ ॥ तेषांमोक्षविधानंचकथ्यतांदेविमेपुरः ॥ ममदूतापराधश्चक्षम्यतांहरिपूजिते ॥ ४० ॥ अयोध्योवाच ॥ यमस्थलेति
विख्यातंस्थानंतेसरयूतटे ॥ ऊर्जमासिसितेपक्षेद्वितीयायांतुयेयम ॥ ४१ ॥ स्नास्यंतिचनराःसर्वेतेषांतवभयंनहि ॥ यानितिष्ठंतिपापा
निचौराणांचैवपिप्पले ॥ ४२ ॥ विलयंयांतुभोदेवममवाक्यात्तवापिच ॥ ममेदमष्टकंस्तोत्रंत्वयाभक्त्याचयत्कृतम् ॥ ४३ ॥
यःपठेत्प्रातरुत्थायपापंतस्यप्रणश्यति ॥ प्राप्नोतिसकलानर्थान्मयादत्तान्नरःशुभान् ॥ ४४ ॥ सूतउवाच ॥ विश्राव्य
वचनंसत्यंयमायांतर्दधेस्वयम् ॥ तेनस्थितिंतदाचक्रेसरय्वाः पुलिनेशुचौ ॥ ४५ ॥ चित्रगुप्तौचतेदूतालज्जिताश्चाभव
न्मुहुः ॥ विग्रहास्तुगतानाशंपापानांतुक्षणात्तदा ॥ ४६ ॥ भ्रातापियमुनायास्तुस्थानंकृत्वापुरंगतः ॥ माहात्म्यंविमलायास्तुदू
तेभ्यःश्रावयन्बहु ॥ ४७ ॥ ॥ अगस्त्यउवाच ॥ ॥ माहात्म्यमीदृशंतुभ्यंमयातेबहुवर्णितम् ॥ जन्मभूमेरयोऽध्यायानवम्या
श्चमुनीश्वर ॥ ४८ ॥ यइदंशृणुयान्नित्यंयश्चापिपरिकीर्तयेत् ॥ भुक्त्वाचविपुलान्भोगानंतेचापिगतिंलभेत् ॥ ४९ ॥ सूत
उवाच ॥ ॥ अगस्तेनपुराप्रोक्तंसुतीक्ष्णायचशौनक ॥ अहंश्रुत्वासुतीक्ष्णाच्चरामभक्तायचाब्रुवम् ॥ ५० ॥ नशठायप्रदातव्यंनातपस्का
यपापिने ॥ निंदकायगुरूणांचवेदानांचतथैवहि ॥ ५१॥ निंदकायचपुण्यानांतेषांनकथयेत्क्वचित् ॥ ब्रूयाच्छ्रद्धावतेचैवभक्तिश्चेच्छूद्रयो

षिताम् ॥ ९२ ॥ विष्णुभक्तायप्रेम्णावैस्वयंब्रूयाद्विचक्षणः ॥ पठनंश्रवणंचास्यपापपर्वतदारणम् ॥ ९३ ॥ ॥ इतिश्रीसत्योपाख्याने
सूतशौनकसंवादसुतीक्ष्णअगस्त्यसंवादेश्रीरामनवमीमाहात्म्येपंचत्रिंशोध्यायः ॥ ३५ ॥ ॥ शौनकउवाच ॥ ॥ भोभोःसूतमहाबु
द्धेस्मृतिमन्मतिमन्विभो ॥ रहस्यंरामचंद्रस्यभक्तानांभक्तिवर्द्धनम् ॥ १ ॥ कृपांकृत्वातदाचक्ष्वगोप्यंकर्णरसायनम् ॥ श्रोतुंधर्त्तुंस्थिर
स्नेहंमादृशंयदिमन्यसे ॥ २ ॥ अविंच्छिन्नंभवेत्तन्मेश्रोतुंसंरमतेमनः ॥ श्रुतंरामायणंभूरिसीतायाश्चरितंमुहुः ॥ ३ ॥ तृप्तिनैतिमनोमे
वैपिवन्नामामृतंमुहुः ॥ विहारोरामचंद्रस्यनव्यासेनमयाश्रुतः ॥४॥ विद्याचाभ्यस्यतावाल्येदुःखंतेनाभवत्ततः ॥ पित्रोःशूश्रूषणाक्रांतिलौं
काल्हादकृतक्लमः ॥ ५ ॥ वंधुस्नेहभवोवंधोह्यंधकूपइवाक्षयः ॥ अन्वभूयंततेनामीकौमार्येमृदुलात्मना ॥ ६ ॥ यौवनेवनवासेनकालः
क्षितौःक्षतात्मना ॥ प्रजापालनजांपीडांबुभुजेराघवस्ततः ॥ ७ ॥ रामोनारायणःसाक्षादैश्वर्यंतस्यविस्तृतम् ॥ वहुधातत्पुराणेषुश्रुतंसी
तापतेर्मया ॥ ८ ॥ माधुर्यंनहिरामस्यमयाक्वापिश्रुतंद्विज ॥ कृपांकृत्वात्वमाचक्ष्वमाधुर्य्यंखेटकादिकम् ॥ ९ ॥ सूतउवाच ॥ ॥ भवा
दृशायदिकृपांमयिकुर्य्युःसुपेशलाम् ॥ यस्तुप्रश्नस्त्वयापृष्टस्समयाकथ्यतेधुना ॥ १० ॥ जिव्हांलब्ध्वापियोविष्णुंकीर्त्तनीयंनकीर्तयेत् ॥
लब्ध्वापिमोक्षानिःश्रेणिंसनारोहतिदुर्मतिः ॥ ११ ॥ तेनाहंवर्णयिष्यामिचारित्रंपरमात्मनः ॥ आत्मारामोपिश्रीरामःसुखायजगतां
प्रभुः ॥ १२ ॥ वर्द्धयामासस्वंरूपंपित्रोरानंदकारकम् ॥ पित्रोःप्रेमह्रदाचैवजनानंदांकुरैस्तथा ॥ १३ ॥ इच्छयाचह्यनूढानां
चरितंचरघोःपतिम् ॥ अनुभूत्यासतांचैवह्यात्मनःप्रभुतातया ॥ १४ ॥ नेत्रोत्सवैश्चनारीणामाशीर्भिश्चद्विजन्मनाम् ॥ उत्तमेनैवगाने
नमुदारामोहिववृधे ॥ १५ ॥ सखायोरामचंद्रस्यतथाववृधिरेसमम् ॥ रामस्तुवालकैःसार्द्धंचिक्रीडेचमहाजिरे ॥ १६ ॥ वृष

स्कंधःसखाकश्चित्तस्यस्कंधेरुरोहच ॥ तथाभरतशत्रुघ्नौलक्ष्मणश्चनिजान्सखीन् ॥ १७ ॥ चामरैर्वीज्यमानश्चतथावालैः समंततः ॥
अलकैःकंपमानैश्चमुखेनपरिशोभितः ॥ १८ ॥ यंत्रैर्मंत्रैस्तथामात्रारक्षितःप्रभुरीश्वरः ॥ अंगेह्यंगेतथादिव्यंभूषणंविदधत्प्रभुः ॥ १९ ॥
दिव्यगंधानुलिप्तश्चस्वमातुःकरभोजनी॥अन्नंचतुर्विधंशुभ्रंभ्रातृभिःसखिभिस्तथा॥२०॥भुक्त्वाचयज्ञभुक्स्वामीरामोनामरमापतिः ॥ सखा
स्कंधगतोरामोभ्रातृभिर्द्वारिनिर्ययौ ॥ शिरसाधारयन्रामःस्वर्णसूत्रस्यपट्टकम् ॥ २१ ॥ कंचुकंचमहादिव्यंस्वर्णसूत्रेणशीलितम् ॥ द्वारदे
शेविनिर्गत्यरामोराजीवलोचनः ॥ २२ ॥ तथाभरतशत्रुघ्नौलक्ष्मणश्चमहामतिः ॥ तथावेषेणतेवालाःक्रीडांचक्रुर्मनोरमाम् ॥ २३ ॥ शत
शोनागरास्तत्ररामंदृष्ट्वामुदंययुः ॥ वालवृद्धाःपुरंध्र्यश्चलेभिरेपरमांमुदम् ॥२४॥शुक्रमासस्यपूर्णायांराजादशरथोनदीम् ॥ रामनिर्गमना
त्पूर्वंसरयूंस्नातुमागतः ॥ २५ ॥ रघुनाथःसखीनाहतातःक्वास्तिममाधुना ॥ तत्रसर्वेव्रजिष्यामोयत्रास्तेसोद्यमाचिरम् ॥ २६ ॥ वेत्र
धाराऊचुः ॥स्नानार्थंचगतोराजाह्यधुनासरयूंनदीम् ॥ श्रीमद्भिस्तत्रगंतव्यंनिकटेवर्ततेसनः ॥२७॥ इतिवाक्यंतुतेषांवैरामःश्रुत्वाचवाल
वत् ॥ हास्यंकृत्वामुहुश्चोच्चैर्गच्छगच्छेतिचब्रुवन् ॥ २८ ॥ ताडयामासतंपद्भ्यांयस्यस्कंधेचतस्थिवान् ॥ अथवत्सोपिवेगेनवालैःसार्द्धं
महावली ॥ २९ ॥ सरयूंप्रतितेसर्वेवालास्तूर्णंप्रतस्थिरे ॥ मार्गेतत्रनरानार्यौरामंदृष्ट्वामुदंययुः ॥ ३० ॥ राजापिसरयूतीरेकृत्वासंध्या
जपादिकम् ॥ गंतुंचक्रेमनस्तावद्वसिष्ठादिभिरन्वितः ॥३१॥चाराआगत्यवेगेनरामागमनमब्रुवन्॥क्षणंतस्थौतदाराजाकुमारागमहर्षितः॥
॥ ३२ ॥ वालाःसर्वेसमाजग्मुःशतशोथसहस्रशः ॥ चतुराणांचतुर्णांतुचत्वारश्चतुरैःसह ॥ ३३ ॥ वालकैस्तेकुमाराहिभूपतेर्निकटंययुः ॥
प्रोत्तीर्यचवयस्यानांस्कंधेभ्योवालकास्तथा ॥ ३४ ॥ नृपस्यनिकटेतस्थुरामोंकंचसमारुहत् ॥ कुथेपरमविस्तीर्णेस्वर्णसूत्रेणरंजिते

निवेश्यबालकान्सर्वान्रामंप्राहनृपोत्तमः ॥ दंडवक्रियतांवत्सवासिष्ठ्यैचपुनःपुनः ॥३५॥ नरेशस्यवचःश्रुत्वाबालाःसर्वेनदींप्रति ॥ साष्टां
गंप्रणतिंचक्रुःप्रेम्णारामादयोर्भकाः ॥३६॥ पुनर्निवेश्यतानग्रेकृत्वाचकरकुड्मलम् ॥जगदेसरयूंराजासर्वेषांचैवशृण्वताम् ॥३७॥ इतिश्री
सत्योपाख्यानेसूतशौनकसंवादेषट्त्रिंशोऽध्यायः ॥३६॥ दशरथउवाच ॥ नमस्तेसरयूदेविवासिष्ठतनयेशुभे॥ब्रह्माद्यैःसकलैर्देवैर्ऋषिभिर्ना
रदादिभिः ॥१॥ सदात्वंसेवितोदेवितथासुकृतिभिर्नरैः॥ मानसाच्चसमायातेजगतांपापहारिणि॥२॥स्मरतांपश्यतांदेविपापनाशेपटीयसि॥
येपिवंतिजलंदेवित्वदीयंगतमत्सराः ॥ ३ ॥ तेनमातुस्तनेपानंकरिष्यंतिकदाचन ॥ मनुप्रभृतिमान्यैस्त्वंमानितासिसदाशुभे ॥४॥त्वत्ती
रस्मरणेनैवत्वन्नामरटनेनवै ॥ येत्यजंतितनुंदेवितेकृतार्थानसंशयः ॥ ५ ॥ त्वंतुनेत्रोद्भवादेविहरेर्नारायणस्यहि ॥ महिमातववेदैश्चगीयते
चमुहुर्मुहुः ॥ ६ ॥ तत्रकाममशक्तिर्हिस्तववनेमानुषस्यच॥त्वत्तीरेसर्वतीर्थानिनिवसंतिचतुर्युगे ॥ ७॥ नमोदेविनमोदेविपुनरेवनमोनमः॥
हेवासिष्ठिमहाभागेप्रणतंरक्षवंधनात् ॥ ८ ॥ इमेबालास्त्वदीयाश्चवर्तंतेशरणंतव ॥ एतेरक्ष्याश्चपोष्याश्चतटेदेविसदापुनः ॥ ९ ॥
नद्यष्टकंविधायाथपुत्राणामुदयायच ॥ स्वर्णलक्षंचविप्रेभ्यःपुत्रहस्तेनदापयन् ॥ १० ॥ राज्ञःस्तवंसमाकर्ण्यसरयूःकामरूपिणी ॥
दर्शनार्थंकुमाराणामाजगामतटंनिजम् ॥ ११ ॥ सर्वांगेषुदधानासाभूषणानिमनोहरा ॥ आगत्यनिकटेतस्थौबालानांसंमुखेसरित् ॥
॥ १२ ॥ जग्राहचरणौतस्याबालैःसहनरेश्वरः ॥ आशिषःसरयूर्दत्वाराममंकेन्यवेशयत् ॥ १३ ॥ मुक्तामालांतुरामस्यद
दौकंठेस्वयंमुदा ॥ घ्राणंचकारमूर्ध्नस्तुप्रेम्णासासरयूर्नदी ॥ १४ ॥ भूपतिंजगदेसातुशृणुराजन्वचोमम ॥ इमेचबालकाइष्टाःसर्वेषामंडगो
लके ॥ १५ ॥ वसंतिममकुक्षौहिपश्यतांज्ञानचक्षुषा ॥ त्वयाकृतमिदंयस्तुचाष्टकंपठतेमम ॥ १६ ॥ स्नानस्यसर्वतीर्थानांफलमाप्नोति

मानवः ॥ उक्तैवंदर्शयामासरामादीन्निजकुक्षिके ॥ १७ ॥ दृष्ट्वादशरथोराजाविस्मयंपरमंगतः ॥ पप्रच्छतांप्रणम्यादौ कदोतत्रासरिद्ध
रे ॥१८ ॥ वसिष्ठेनसमानीतामनौस्वायंभुवेसति ॥ वासिष्ठीतिसमाख्यातापुत्रामेह्युदरेधृताः ॥ १९ ॥ कथ्यतामितिमेपृष्टंस्वमुखेनैवहेन
दि ॥ ॥ सूतउवाच ॥ ॥ उवाचसरयूर्भूपंवाचागंभीरयानदी ॥ २० ॥ श्रूयतान्नृपशार्दूलचोत्पत्तिकथयामिते ॥ ॥ श्रीसरयूरुवाच ॥
सृष्ट्यादौचयदाब्रह्मापद्मनाभस्यनाभितः ॥ २१॥ जज्ञेथविष्णुनाज्ञप्तस्तपसाराधयेतिमाम् ॥ तदाधातातपःकर्त्तुंमनश्चक्रेनिजासने॥२२
दिव्याब्दानांसहस्रंचकुंभकेनव्यवस्थितः ॥ ध्यायन्भगवतोरूपंयदाहिध्यानगोचरम् ॥ २३ ॥ निदेशेवर्तमानंतंविज्ञायकमलापतिः ॥
आरुह्यगरुडंवेगान्निजलोकात्समागतः ॥ २४ ॥ तंतदाताहशंदृष्ट्वानिजभक्तिपरायणम् ॥ कृपयासंपरीतस्तुनेत्राज्जलंमुमोचह ॥२५॥
पस्पर्शपाणिपद्मेनपद्मनाभोहिपद्मजम् ॥ स्पर्शनात्पद्मनाभस्यसुखंप्रापपितामहः ॥ २६॥ सुशीतेनैवस्पर्शेनतत्यजेकुंभकंविधिः ॥ उन्मी
ल्यनयनेपश्यँल्लोकनाथंजगत्पतिम् ॥ २७ ॥ प्रणम्यदंडवद्ब्रह्मातस्यपश्यंश्चमाधुरीम् ॥ पतितंविष्णुनेत्राच्चजलंजग्राहपाणिना ॥२८॥
कमंडलौस्थापयामासप्रेम्णातत्रपितामहः ॥ चतुर्भिर्वदनैर्ब्रह्मातुष्टावजगतांपतिम् ॥ २९ ॥ स्तोत्रेणसप्रसन्नोभूद्वरंदत्वाजगामसः ॥
ब्रह्मापितज्जलंज्ञात्वाब्रह्मद्रावमिदंशुभम् ॥ ३० ॥ मनसारचयामास मानसंसरएवसः ॥ जलेतुसरसस्तस्मिंश्चक्रेन्यासंचपद्मजः ॥ ३१ ॥
जलस्यद्रुहिणोज्ञात्वामाहात्म्यंपरमाद्भुतम् ॥ स्वयंतुजगतांसर्गेसंबभूवपितामहः ॥ ३२ ॥ बहुकालेगतेह्येवमिक्ष्वाकुःपूर्वजस्तव ॥ अभव
त्पृथिवीपालस्तेनाज्ञप्तस्त्वयंमुनिः ॥ ३३ ॥ वसिष्ठोमानसंगत्वानद्यर्थंमुंजकेशिनम् ॥ तुष्टावसुप्रसन्नोभूद्वरंब्रूहिद्विजोत्तम ॥ ३४॥ वव्रेमु
निर्नदींतस्मात्तेनदत्तंचनेत्रजम् ॥ जलंयन्मानसेन्यस्तंब्रह्मणाब्रह्मयोनिना ॥३५॥ नदीरूपेणसाहंवैसरसस्तुविनिर्गता ॥ प्रापायोध्यांवसि

ष्टस्तुपश्चादहंतुतस्यवै ॥ ३६ ॥ विष्णुनेत्रसमुत्पन्नाविष्णुंकुक्षौविभर्म्यहम् ॥ येध्यायंतिसदारामंममकुक्षिगतंनराः ॥ ३७ ॥ तेषांभक्ति
श्चमुक्तिश्चभविष्यतिनसंशयः ॥ रामंविद्धिपरंब्रह्मसच्चिदानंदमद्वयम् ॥ ३८ ॥ भक्तानांरक्षणार्थायदुष्टानांहिवधायच ॥ जातस्त
वगृहेराजन्तपसातोषितस्त्वया ॥ ३९ ॥ विश्राव्यचात्मनोत्पत्तिमंतर्धानंचसागता ॥ अयोध्यावासिनःसर्वेविस्मयंलेभिरेपरम् ॥ ४० ॥
धन्योदशरथोराजाधन्येयंसरयूर्नदी ॥ इतिशुश्रावधर्मात्माधार्मिकाणांशिरोमणिः ॥ ४१ ॥ ततोदशरथोराजाविज्ञाप्यचात्मनोगुरुम् ॥
आजगामगृहंतूर्णंबालैःसहमहामतिः ॥ ४२ ॥ एवंविधानिरम्याणिरामचंद्रस्यसंतिवै ॥ चरितानिचामिष्टानिपापनाशकराणिच ॥ ४३ ॥
सुखदानिचश्रोतॄणांकथितानिमयात्वयि ॥ अतःपरंमहारम्यंचरितंतेवदाम्यहम् ॥ ४४ ॥ रामचंद्रोरमानाथोजिह्वायांवक्तिमेस्वयम् ॥
नवक्ताचेत्स्वयंरामोरहस्यंतुकथंगृणे ॥४५॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेसप्तत्रिंशोऽध्यायः ॥३७॥ सूतउवाच ॥ सखायोराम
चंद्रस्यबहवःसंतिशौनक ॥ शत्रुघ्नोभरतश्चैवलक्ष्मणःपरवीरहा ॥ १ ॥ प्रतापीशत्रुनाशश्चप्रतापाढ्योयुधिष्ठिरः ॥ सुकर्मासुष्ठुरूपश्चजय
श्चविजयस्तथा ॥ २ ॥ सुकंठोदीर्घबाहुश्चसुशिराश्चातिविक्रमी ॥ चारुचंद्रश्चभानुश्चरिपुवारस्तथारिजित् ॥ ३ ॥ तथाशीलःसुशीलश्चग
जगामीमनोहरः ॥ सबलाइवोहरिदश्चोतथान्येचसहस्रशः ॥४॥सखायोरामचंद्रस्यक्रीडनार्थंसदैवहि॥वर्ततेनिकटेतस्यराज्ञाचैवाभिनंदिताः
॥५॥ सदाचागत्यरामस्यविविशुःपरितोर्भकाः ॥ कौशल्यायागृहेसूदानियुक्ताःपाककर्मणि ॥ ६ ॥ अहंपूर्वमहंपूर्वंरामार्थेपाचयाम्य
हम् ॥ इतिप्रीतेनमनसारामपाकेसदारताः ॥ ७ ॥ पीवराःसर्वभूषाढ्यामणिकुंडलधारिणः ॥ पाकंकृत्वाभोजनेतुसहरामेणचाहृताः ॥
॥ ८ ॥ बहिर्गत्यगृहात्तूर्णंचक्रुःक्रीडांमनोहराम् ॥ चत्वारश्चतुराबालाःपीतकंचुकभूषिताः ॥ ९ ॥ पट्टिकांस्वर्णसूत्रस्यदधानाःशिरसा

पुनः ॥ उपानत्स्वर्णसूत्रेणग्राथितामणिभिःसह ॥ १० ॥ दधानाबालकाःपद्यांमणिभूषणभूषिताः ॥ शिरसाधारयन्सर्वेंमणिमौक्तिक
मञ्जरीः ॥ ११ ॥ यैर्हितेबालकादृष्टापुण्यैःपूर्वकृतैर्नरैः ॥ उर्ध्वंतुनाकलोकंवैगंतुंतैर्नैष्यतेत्वितः ॥ १२ ॥ इंद्रनीलनिभोरामाश्चि
क्रीडेनगराजिरे ॥ कंदुकंचकरेगृह्यबालकैःसहक्रीडति ॥ १३ ॥ तथाक्रीडंतिबालाश्चयथारामोहिक्रीडति ॥ वीथींवीथींजगामाथक्रीडा
र्थंरघुसत्तमः ॥१४॥ अजडाश्चजडाश्चैवसप्राणाइवतेभवन् ॥ प्रदुद्रावक्षणंतस्थौकंदुकान्नुतदाप्रभुः ॥१५॥ उच्चाल्यकंदुकंप्रोच्चैर्बिभर्तिपा
णिनापुनः॥दूरेनिक्षिप्यवेगेनपतंतंधावतिद्रुतम्॥१६॥तथैवबालकाःसर्वेंकंदुकंप्रातिविह्वलाः॥कंदुकंतुगृहीत्वाग्रेरामाधार्थयतेपुनः ॥१७॥
पुनर्निक्षिप्यवेगेनरामोधावतिवेगतः ॥ शत्रुघ्नोभरतश्चैवलक्ष्मणश्चमहाबलः ॥ १८ ॥ गृहीत्वाकंदुकंवेगाच्छीघ्रंरामायचार्पयन् ॥ कोला
हलोपिबालानांशृण्वंतिजनतास्तदा ॥ १९ ॥ नरानार्योमरप्रख्याःपश्यंतिसततंशिशून् ॥ महापुण्यसमूहेननानाजन्मोद्भवेनच ॥२०॥
विथींत्यक्त्वापरेषांचपदायातिहरिःस्वयम् ॥ जनानांपश्यतांचैवप्राणाइवप्रयांतिहि ॥२१॥ कार्यंत्यक्त्वातुनारीभिर्वीक्षितास्तेरघूद्वहाः ॥
हेतवोदुस्थतायास्तुनारीणातेतदाभवन्॥२२॥गुरुह्रियंपरित्यज्यनानाभावैर्विलोक्यच ॥ मोहितारामरूपेणनात्मानंविविदुःस्त्रियः ॥२३॥
मंदंमंदंहसन्रामोहासयंश्चनिजान्सखीन् ॥ अयोध्यानगरेरम्येचिक्रीडेभरताग्रजः ॥ २४ ॥ दूरेयातियदारामःकंदुकार्थंरमापतिः ॥ अहंपू
र्वमहंपूर्वंरामंबालाश्चरेमिरे ॥ २५ ॥ कंदुकेनक्षितिंरामःस्पृशन्गच्छतिवर्त्मनि ॥ तथैवबालकाःसर्वेंनानावेषधरावराः ॥ २६ ॥ क्रीडि
त्वानगरेवीथ्यांपुनरायान्तिबालकाः ॥ यत्रराजादशरथस्तत्ररामादयोगमन् ॥ २७ ॥ तदारामंनिजांकेतुस्थापयित्वासभूपतिः ॥ मूर्ध्नि
घ्राणंचकराशुमातुरंतःपुरंययौ ॥ २८ ॥ उत्थायभ्रातृभिःसार्द्धंसखिभिःपरिरक्षितः ॥ मातृभिर्लालिताबालाःकृत्वाक्षीरोपसेवनम् ॥

॥ २९ ॥ यस्मिन्यामेचयालीलास्तस्मिन्यामेकृताहितैः ॥ क्रीडित्वासुचिरंकालंमातुरंतःपुराजिरे ॥ ३० ॥ कदाचिद्भूपतेरग्रेकदाचि
ज्जनवर्जिते ॥ दिनानिक्षणवत्तेतुकुर्वाणाबालकाःसदा ॥ ३१ ॥ रात्रौस्वपंतितेगेहेभ्रातृभिःसहितास्तुते ॥ पयःफेननिभाशय्यादांतारु
क्मपरिग्रहा ॥ ३२ ॥ आसनानिचहैमानिमृदूपस्तरणानिच ॥ पर्य्यंकेशोभनेरामोनिन्येवैशर्वरीमथ ॥ ३३ ॥ तथाबालाश्चतेसर्वेप्रात
रुत्थायवैपुनः ॥ रामस्यनिकटेजग्मुःक्रीडनार्थंतुहर्षिताः ॥ ३४ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेऽष्टत्रिंशोऽध्यायः ॥ ३८ ॥
॥सूतउवाच॥ एकदाप्रातरुत्थायस्वल्पंधनुरुपाददे ॥ तथैवचेषुधिंस्वल्पंदधाररघुनायकः॥१॥तथाभरतशत्रुघ्नलक्ष्मणाद्याश्चबालकाः ॥
क्रीडनार्थंसरय्वास्तुतीरेचातिमनोहरे ॥२॥बालकैःसहरामोपिक्रीडांचक्रेमनोरमाम् ॥ लक्ष्यंकृत्वातदाबालास्तस्मैबाणानमूमुचन् ॥३॥
नमोघोजायतेबाणोबालानांलक्ष्यपातने ॥ नाशयामोवयंलक्ष्यंयुष्माभिःप्रेक्ष्यतांत्विदम् ॥ ४ ॥ प्रेक्ष्यतांरामरामाशुनोविवादोयथाभवे
त् ॥ तथाकुर्मोवयंरामयथादेशोभवेत्तव ॥ ५ ॥ पर्य्यायेणविपातव्यंलक्ष्यंयूयंपरस्परम् ॥ इतिश्रुत्वातदाबालाःपर्यायैर्विविधुश्चतत्
॥ ६ ॥ क्रीडंतेस्वैरमेवंचरामाद्याबालकास्तदा ॥ एवंविहरतांतेषांभोजनंचैवविस्मृतम् ॥ ७ ॥ मध्यान्होवैबभूवाथनगृहान्वैसमाययुः॥
राजादशरथोनूनंभोजनायगृहंययौ ॥८॥ पाकशालांसमाविश्यभोजनायोपचक्रमे ॥ अन्नंचाग्रेसमायातंशालग्रामसमर्पितम् ॥ ९ ॥ बुभु
जेनतदाराजापुत्रामेकुत्रसंस्थिताः ॥ तैर्विनानहिभोक्तव्यंभुंजेहंतुसुतैःसह ॥ १० ॥ सूतउवाच ॥ नृपस्यवचनंश्रुत्वासौविदल्लाःप्रदुद्रुवुः
॥ कौशल्यांकैकयींजग्मुः सुमित्रांचतथाद्विज ॥ ११ ॥ कुत्रसंतिकुमारास्तेनभुनक्तिक्षितीश्वरः ॥ वाक्यंश्रुत्वातुषंढानांराजदा
रास्तदाब्रुवन् ॥ १२ ॥ राजदाराऊचुः ॥ क्रीडंतेसरयूतीरेधनुर्बाणधरास्तुते ॥ शिबिकास्तत्रगच्छंतुवाहिभिर्वाहितास्त्वरम्

॥ १३ ॥ आनयंतुनृपस्याग्रेभुनक्तुनृपतिस्तुतैः ॥ महीपस्यतुपत्नीनामाज्ञयाशिविकागताः ॥ १४ ॥ शिविकावाहिकाऊचुः ॥
आरुह्यशिविकायूयंगच्छंतुपितुराज्ञया ॥ भुनक्तिनृपतिर्नैवत्यक्त्वायुष्मान्प्रियार्भकाः ॥ १५ ॥ अन्येवालाऊचुः ॥ गमिष्याम
शनैस्तत्रनतुक्रीडांत्यजेमाहि ॥ शत्रुघ्नवचनंप्राहरामस्यह्यनुगावयम् ॥१६॥ एवंब्रुवत्सुवालेषुरामोराजीवलोचनः ॥ पितुराज्ञांसमाकर्ण्यध
नुर्वाणंतुचिक्षिपे ॥ १७ ॥ शिवकांतुपरित्यज्यवाहुस्फोटंचकारवै ॥ गम्यतेतुमयावालाइतिदुद्राववेगतः ॥१८॥ तथैववालकाःसर्वेरामंप
श्चात्प्रदुद्रुवुः ॥ धनुर्वाणंतुरामस्यकिंकराजगृहुस्तदा ॥ १९ ॥ चत्वारोभ्रातरश्चाग्रेपश्चाद्वालाअनेकशः ॥ दुद्रुवुःसर्वतोवेगा
च्छिविकायागतिर्नहि ॥ २० ॥ अयोध्यानगरेरम्येवीथ्यांतुददृशुस्त्रियः ॥ रामादीन्वालकान्सर्वान्किमिदंचेतिदुद्रुवुः ॥ २१ ॥
नरानार्यस्तदासर्वेवीक्ष्यरामंमुदंययुः ॥ पृष्ट्वाचशिविकावाहान्निस्संदेहास्तदाभवन् ॥ २२ ॥ रामोपिचातिवेगेनपाकशालांययौ
पितुः ॥ हस्तौपादौचसंक्षाल्यभ्रातृभिःसखिभिःसह ॥ २३ ॥ मेध्यभूमौसमाविश्यबुभुजेभ्रातृभिःसह ॥ क्षितीशोपितदाचक्रेभो
जनंवालकैःसह ॥ २४ ॥ भुंजन्नेवचपप्रच्छरामंराजाप्रहर्षयन् ॥ तातपुत्रेतिहर्षेणलक्ष्यपातःकृतोनवा ॥ २५ ॥ मोघोनजायते
वाणस्तथाभ्यासंकुरुष्वाहि ॥ चललक्ष्यनिपातेचशब्दोत्थानेतथैवच ॥ २६ ॥ श्रीरामउवाच ॥ ईषच्चकंपतेवाणोमयामुक्तोनरेश्वर ॥
लक्ष्यंचपातयाम्यद्यतथाशिक्षयमांपितः ॥ २७ ॥ राजोवाच ॥ शिक्षयामिमहादिव्यांविद्यांशस्त्रास्त्रधारिणीम् ॥ तथाभरतशत्रुघ्नल
क्ष्मणेभ्योददाम्यहम् ॥ २८ ॥ नरेशस्यतदावाक्यंश्रुत्वावालाश्चहर्षिताः ॥ एवंचनृपतिर्भुक्त्वाह्याचम्योत्थायचार्भकैः ॥ २९ ॥
तांवूलभक्षणंचक्रेलवंगैःसहराजराट् ॥ अंतःपुरंजगामाथवालकाश्चस्वमातरम् ॥ ३०॥ तथाचान्यैर्विहारैश्चयामान्निन्युश्चवालकाः ॥३१॥
इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेएकोनचत्वारिंशोध्यायः ॥ ३९ ॥ श्रीशौनकउवाच ॥ बुद्धिमन्मतिमन्सूतरामपादाब्जषट्पद ॥

क्रीडामन्यांचरामस्यमह्यंब्रूहिप्रसादतः ॥ १ ॥ सूतउवाच ॥ श्रूयतांचमुनिश्रेष्ठकथांरामस्यपावनीम् ॥ यांश्रुत्वासर्वपापेभ्योमुच्यतेनात्र संशयः ॥ २ ॥ चेटिकाराजपत्नीनांकौशल्यानांशुभाननाः ॥ श्यामाःकमलपत्राक्ष्यऊचुर्वाक्यंपरस्परम् ॥ ३ ॥ रामादयःकुमारास्तु तिष्ठंतिनोगृहेदिवा ॥ धनुर्बाणंगृहीत्वातुक्रीडंतिसरयूतटे ॥ ४ ॥ माधुर्यंचनपश्यामोबालकानांगृहेवयम् ॥ तस्माद्वयंमुषित्वाचधनुर्बाणं तथाह्यसिम् ॥ ५ ॥ धनुर्बाणंविनाह्येषांकथंक्रीडाचजायते ॥ एवंताःसंविदंकृत्वाकिशोर्य्यश्चकुतूहलात् ॥ ६ ॥ धनुर्बाणंमुषित्वातुग्रहकोणेन्यवेशयन् ॥ कौशल्याद्यानजानंतिहास्यंतेषांननिश्चयम् ॥७ ॥ एवंजातेहिचौर्येतुव्यतीतारजनीद्विज ॥ राज्ञःपुत्राहिरामाद्याजहुर्निद्रांचशीघ्रतः ॥ ८ ॥ शौचंविधायतेसर्वेबुभुजुर्मातृपाणिना ॥ एतस्मिन्नंतरेबालाःसमाजग्मुःसहस्रशः ॥ ९ ॥ धनुर्बाणंतथाखड्गंगृहीत्वा निजवेश्मतः ॥ कौसल्याप्रांगणेऽतिष्ठन्रामार्थंसर्वबालकाः ॥१०॥ बालान्वीक्ष्यतदारामःक्रीडार्थंतुमनोदधे ॥ उवाचलक्ष्मणंरामोधनुर्मेदीयतामिति ॥ ११ ॥ सतूणंचापिखड्गंमेसखेटकमथानय ॥ ॥ सूतउवाच ॥ ॥ लक्ष्मणोगृहकोणेषुह्यायुधार्थंजगामह ॥ १२ ॥ नददर्श धनुर्बाणंखड्गंचापिचुकोपच ॥ आजगामतुरामस्यसन्निधौलक्ष्मणोबली ॥ १३ ॥ नास्तितत्रधनुर्बाणःखड्गोपिकनकत्सरुः ॥ ॥ सूतउवाच ॥ तच्छ्रुत्वारामदेवश्चज्ञात्वातासांचमानसम् ॥१४॥ आनंदार्थंतुतासांवैचकारनरनाटकम् ॥ चत्वाराभ्रातरस्तेचकौसल्यांप्रष्टुमुत्सुकाः ॥१५॥ धनुर्बाणस्तथाखड्गः क्वास्तिमातःप्रदीयतां ॥ माताप्रोवाचरामंचनाहंजानामिपुत्रकाः ॥ १६ ॥ धात्रींपृच्छस्वधन्यांचसुमित्रांवाचकैकयीम् ॥इतिप्रोक्तोजनन्यातुरामःपप्रच्छमातरौ ॥१७॥ मातरावूचतुः ॥ नजानीवोधनुर्बाणंतववत्सतथाह्यसिम् ॥ नवीनंगृह्यतांवत्समाचशोकेमनःकृथाः ॥१८॥ सूतउवाच ॥ रसज्ञोरामचंद्रोपिमोदंदास्यतियोषिताम् ॥ प्रत्युवाचप्रसन्नात्माधनुरर्थंसखीजनान् ॥१९॥

धनुर्मेदीयतांसख्योबाणंचापितथाह्यसिम् ॥ जग्राहप्रहसन्कांचिद्भुजाभ्यांरघुनंदनः॥२०॥कंठेपलायमानांचबादयंतीञ्चनूपुरम् ॥ स्थित्वा
ह्युवाचरामंसानाहंजानामितेधनुः ॥ २१ ॥ पुनरन्यांचजग्राहप्रहसन्राघवोमुदा ॥ कुत्रचास्तिधनुर्बाणोदीयतांप्रमदोत्तमे ॥ २२ ॥
प्रत्युवाचतदारामंसासखीचातिपंडिता ॥ श्रूयतांचवचस्तथ्यंभोकुमारकक्रीडिता ॥ २३ ॥ धनुर्मेभ्रुकुटीप्रोक्तंबाणौतीक्ष्णौहिचक्षुषी ॥
इत्येवंज्ञायतेरामनान्यज्जानामितेप्रियम् ॥ २४ तांचत्यक्त्वापरांरामोजग्राहश्रीफलस्तनीम् ॥ कचस्तोमेधनुर्बाणौदीयतामुषितौत्वया ॥
॥ २५ ॥ साप्रोवाचतदारामंप्रहसंतीवरानना ॥ कंदुकौस्तश्चतेरामकंचुकयंतेकुमारक ॥ २६ ॥ नजानामिधनुर्बाणंकंदुकौगृह्यतामिति ॥
रामोदुद्राववेगेनत्वन्यांजग्राहकामिनीम् ॥२७॥ धनुर्मेदीयतांभद्रेबाणंचापिप्रदीयताम् ॥ सातुहास्यप्रवीणाचरामंप्रोवाचकामिनी ॥२८॥
किंमयागोपितौरामबाणस्तेतुह्यधोंशुके ॥ तांचत्यक्त्वामहाबाहुरन्यांजग्राहपाणिना ॥ २९ ॥ धनुर्मेदीयतांचोक्तासाप्रोवाचचतंप्रति ॥
कोष्ठागारेमयासार्द्धंगम्यतांतत्रमाचिरम् ॥ ३० ॥ एवमुक्तस्तयासार्द्धंकोष्ठागारेजगामच ॥ नास्तितत्रधनुर्बाणौराममालिंग्यकामिनी ॥
॥ ३१ ॥ चुचुंबेवदनंतस्यपुनःप्रोवाचराघवम् ॥ नोस्तश्चात्रधनुर्बाणावन्यत्रानिश्चयंकुरु ॥३२॥ तयासार्द्धंबहिर्गत्वारामःपप्रच्छमंथराम् ॥
कुत्रचास्तिधनुर्बाणौमंथरेकथ्यतांत्वया ॥ ३२ ॥ साप्रोवाचतदारामंपूर्ववैरंचचिंतती ॥ चुल्यांतेरामवर्तैतेधनुर्बाणौविनिश्चितम् ॥३४॥
वाक्यंतस्यास्तुसौमित्रिःश्रुत्वाकोपंचकारह ॥ मुखंरूक्षंहिकृत्वातुह्यनयाभाषितंरुषा ॥ ३५ ॥ ताडनायकशांतस्याजग्राहदक्षिणेकरे ॥
अनयाहिधनुर्बाणौगृहीतौनात्रसंशयः ॥ ३६ ॥ अस्माकंतुसुखंद्रष्टुंनक्षमापापकारिणी ॥ कशयाताडयिष्यामिनह्येवंकुरुतेपुनः ॥ ३७ ॥
शत्रुघ्नताडिताकुब्जाकंदुकेनपलायिता ॥ लक्ष्मणोभर्त्सयामासतांचदुद्राववेगतः ॥ ३८ ॥ हसिताबालकैःसापिपाणिवादनकारिभिः ॥

तदानींलज्जितापापाजगामकैकयीगृहम् ॥ ३९ ॥ मामेतिवचनंचोक्त्वाभ्रात्राभ्रातानिवारितः ॥ हास्यंह्येवंप्रजातेतुधनुर्बाणस्तथाह्यसिम्
॥ ४० ॥ रामायप्रददुःसर्वाःसख्यःप्रहसिताननाः॥श्रीरामोपिधनुर्बाणौखड्गंचकनकत्सरुम् ॥ ४१ ॥ प्रगृह्यबालकैःसार्द्धमगमत्सरयूतटे ॥
चकारविविधांक्रीडांभ्रातृभिःसहराघवः ॥ इतःपरमिष्टतमंश्रूयतांभोद्विजोत्तमाः ॥ ४२ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेचत्वा
रिंशोऽध्यायः ॥ ४० ॥ सूतउवाच ॥ क्रीडांकुर्वंस्तदारामोजगामशरयूतटे ॥ नाविकोधीवरःकाश्चित्प्रणम्यचाहराघवम् ॥१॥ श्रूयतांमेव
चस्तथ्यंराजपुत्रह्यरिंदम ॥ महिषोवर्ततेरामप्रचरंश्चातिवीर्यवान् ॥ २ ॥ कुशकाशस्थितिस्तस्यजनान्धावतिमार्गगान् ॥ तत्रमाग
च्छभोवीरबालकैर्महिषस्थले ३ धीवरस्यवचःश्रुत्वाबालकास्तेचसस्मिताः ॥ सौमित्रिंप्रेरयामासुः कटाक्षैर्गम्यतामिति ॥ ४ ॥ रामसामं
त्र्यसौमित्रिर्बालकान्प्रत्युवाचच ॥ गम्यतांतत्रभोबालायत्रवैमहिषस्थलम् ॥ ५ ॥ लक्ष्मणस्यवचःश्रुत्वारामेणलक्ष्मणेनच ॥ प्रजग्मु
स्तत्रतेसर्वेमहिषोयत्रवर्तते ॥६॥धनुषांस्फोटनंचक्रुःकुमाराश्चातिचंचलाः॥श्रुत्वास्फोटंचधनुषांमहिषोप्याजगामह ॥७॥विदारणंभुवःकुर्व
न्पद्भ्यांचस्तब्धलोचनः॥उद्यम्यपुच्छवप्राणिशृगाभ्यांन्यखनन्महीम् ॥८॥ बालाऊचुर्यदास्माकंसंमुखेमहिषःपतेत् ॥ बाणैःखड्गैश्चाछित्वै
नंगच्छामोनिजमंदिरम् ॥९॥ बालेष्वेवंब्रुवाणेषुमहिषोरामसंमुखम् ॥ दुद्रावचातिवेगेनतदामूर्द्धनिताडितः॥१०॥ अशल्येनैवबाणेनममा
रमहिषोद्विज ॥ मुक्तातुमाहिषंरूपंदिव्यदेहोभवत्तदा ॥ ११ ॥ कंदर्पसदृशाकारोयोषितांहृदयंगमः ॥ किशोरःश्यामलःस्रग्वीसुकुटीकुं
डलान्वितः ॥१२॥ कटिसूत्रेणहारेणअंगदेनविभूषितः ॥ यथारूपंहिभक्तानांरामस्यपरमात्मनः ॥ १३ ॥ तथारूपोहिगंधर्वोबिल्वनामाभ
वत्तदा ॥ प्रणनामहरेःपादौनामस्वंश्रावयन्मुदा ॥ १४ ॥ तेनस्तोत्रंसमारब्धंबालास्तेशुश्रुवुस्तदा ॥ बिल्वउवाच ॥ नमोरामायमहते

नमस्तेलक्ष्मणाग्रज ॥१५॥ कौशल्यासुप्रजारामनमस्तेपंकजेक्षण ॥ राजराजेंद्रपुत्रायनमस्तेराघवायच ॥ १६ ॥ नमोस्तुसरयूतीरनित्य
क्रीडाकरायच ॥ नमोब्रह्मण्यदेवायरावणांतकरायच ॥१७॥ नमोवाचांविदूरायरामभद्रायतेनमः॥नरनाट्यप्रवीणायनमस्तेधर्मरक्षक ॥
॥ १८ ॥ नमस्तेरुद्रसेव्यायधनुर्वाणधरायच ॥ पुंसांमोहनरूपायनमोस्तुवालकैः सह ॥ १९ ॥ नमोरामायभद्रायभक्ताभीष्टप्रदायच ॥
भोःश्रीराममहावाहोपुनरेवनमोनमः ॥ २० ॥ सूतउवाच ॥ स्तुत्वैवंसुप्रन्नात्माविरराममहामतिः ॥ जगतांचस्वयंसाक्षीप्रत्युवाचतदाच
तम् ॥ २१ ॥ श्रीरामउवाच ॥ विल्वविल्वमहाबुद्धेकेनत्वंकर्मणाभव ॥ महिषोदीर्घशृंगश्चमहावीर्यसरित्तटे ॥ २२ ॥ कस्मात्त्वं
दिव्यरूपश्चदिव्यस्त्रीगणमंडितः ॥ संदेहंसंदिहानाश्चदूरीकर्तुंत्वमर्हसि ॥ २३ ॥ सूतउवाच ॥ पृष्टःप्रोवाचरामेणसर्वेषांशृण्वता
मिदम् ॥ वालकानांचसर्वेषांरामंप्रतिमहामतिः ॥ २४ ॥ विल्वउवाच ॥ हेश्रीराममहावाहोमाहिषेकारणंमम ॥ श्रोतुमर्हसिधर्म
ज्ञकृपयापरमेश्वर ॥ २५ ॥ पुराकृतयुगेस्वामिन्गंधर्वोविल्वनामधृक् ॥ गानविद्याप्रभावेणरूपयौवनदर्पितः ॥ २६ ॥ नास्तिम
त्सदृशःकोपिगानेरूपेवलेतथा ॥ एवंगानाभिमानेनप्राचरंपृथिवींतदा ॥ २७ ॥ निर्जितावहुगंधर्वायज्ञेयज्ञेचभूतले ॥ स्वर्गेचापि
तथाभूम्यांह्यधोभागेनसंशयः ॥ २८ ॥ मन्मूर्ध्निहृदयेगर्वोव्याप्तश्चपरमेश्वर ॥ एकदाचकुरुक्षेत्रेराजावैवस्वतोमनुः ॥ २९ ॥
चकारयज्ञंधर्मात्मासंभारैर्वहुभिर्नृपः ॥ तस्मिन्यज्ञेसुराःसर्वेमुनिगंधर्वदानवाः ॥ ३० ॥ समाजग्मुर्दर्शनार्थमहंतत्रागमंमुदा ॥
गंधर्वास्तत्रगायंतियथाज्ञानंहिरागिणः ॥ ३१ ॥ मयाजितास्तुगंधर्वास्तदाहंचातिगर्वितः ॥ नास्तिमत्सदृशःकोपिदेवादैत्यानमानवाः
॥ ३२ ॥ तदातुनारदोयोगीवीणावादनतत्परः ॥ मांनिर्जेतुंमनश्चक्रेक्षेमायममचानघ ॥ ३३ ॥ मयागीतंतुयद्गानंतेनज्ञातंमहात्मना ॥

पश्चात्तेनसामारब्धंगीतंदिव्यंमहर्षिणा ॥ ३४ ॥ नचज्ञानंमयातस्यगीतंरागविचित्रितम् ॥ श्लाघातस्यकृतानैवनमयास्तवनंकृतम् ॥ ३५ ॥
॥ तदामांनारदोयोगीप्रहसन्वाक्यमब्रवीत् ॥ ॥ नारदउवाच ॥ ॥ रेरेविल्वमयागीतंत्वयाज्ञातंचवानवा ॥ ३६ ॥ हास्यंचक्रुस्तदासर्वेज
नायज्ञास्थिताश्चते ॥ पुनःप्रोवाचहेदेवनारदोमुनिसत्तमः ॥ ३७ ॥ अपगच्छतुतेगर्वोरूपगानसमुद्भवः ॥ महिषोपिनजानातिवस्तुज्ञानं
यथार्थतः ॥ ३८ ॥ तथात्वयानज्ञातंमेतस्मात्त्वंमहिषोभव ॥ मयाविज्ञापितःसोपिकदामुक्तोभवाम्यहम् ॥ ३९ ॥ ॥ नारदउवाच ॥
राजादशरथोनामरथकुंजरवाजिवान् ॥ भविष्यतिमहाप्राज्ञस्त्रेतायांमतिमान्बली ॥ ४० ॥ तस्यपुत्रोतितेजस्वीरामोनारायणःस्वयम् ॥
विहरन्बालकैःसार्द्धंदर्शनंतेकरिष्यति ॥ ४१ ॥ इषुणातेचमूर्द्धानंताडनंसकरिष्यति ॥ माहिषंरूपमुत्सृज्यगंधर्वस्त्वंभविष्यसि ॥ ४२ ॥
तावत्तिष्ठशरय्वाश्चपुलिनेतृणसंकुले ॥ सत्यंजातंवचस्तस्यदर्शनंतेभवन्मम ॥ ४३ ॥ अनुग्रहायशापोमेमुनिनातेनकल्पितः ॥ त्वदीये
पादपद्मेमेभक्तिरस्तुसदाप्रभो ॥ ४४ ॥ श्रीरामउवाच ॥ वरंब्रूहिमहाभागयत्तेमनसिवर्त्तते ॥ मदीयंदर्शनंकृत्वाननरोयाचतेपरम् ॥ ४५ ॥
विल्वउवाच ॥ मन्नामपूर्विकामूर्तिःसदातिष्ठतुतेहरे ॥ हरस्यापिमहाराजनाम्नाविल्वहरिःसदा ॥ ४६ ॥ श्रीरामउवाच ॥ एवमस्तुमहाबु
द्धेगम्यतांस्वपदंह्यतः ॥ भोगंकृत्वातुभोगानामंतेमोक्षमवाप्स्यसि ॥ ४७ ॥ सूतउवाच ॥ गंधर्वोपिनिजंस्थानंबालकानांचपश्यताम् ॥
जगामव्योमयानेनस्वालयंस्वर्गिणांपदम् ॥ ४८ ॥ गंधर्वस्यचतत्स्थानंनाम्नाविल्वहरिःस्मृतम् ॥ वैशाखेमासियात्रास्यात्सर्वपातकना
शिनी ॥ ४९ ॥ अमायांतुमहापुण्यापितृणांमोक्षदासदा ॥ रामोपिभ्रातृभिःसार्द्धंजगामशरयूतटे ॥ ५० ॥ पीत्वाजलंनिषण्णस्तुबालकैः
सहसुंदरः ॥ क्रीडित्वासुचिरंतत्रपुनर्जग्मुर्गृहंप्रति ॥ ५१ ॥ जनयन्नयनानंदमयोध्यापुरवासिनाम् ॥ मातृभिर्लालिताःसर्वेभुक्त्वाचान्नंच

विंधम् ॥ ५२ पितुस्समीपेगत्वातुपितरंतोषयन्मुहुः ॥ भेजिरेशयनंबालामातृभिश्चोपलालिताः ॥ ५३ ॥ इतिश्रीसत्योपाख्यानेसूतशौ
नकसंवादेबिल्वकोपाख्यानेएकचत्वारिंशोध्यायः ॥ ४१ ॥ सूतउवाच ॥ प्रातरुत्थायतेबालाःक्रियाःकृत्वायथाविधि ॥ अन्नंचतुर्विधं
भुक्त्वाखेटकायययुःपुनः ॥ १ ॥ शशान्वराहान्महिषान्मृगान्वध्यन्मुहुर्मुहुः ॥ एवंक्रीडंस्तदारामोवल्मीकंचनराकृतिम् ॥ २ ॥ कुशैःप
रिवृतंतंचसर्पाणांकंचुकैस्तथा ॥ ३ ॥ लूतानांतंतुभिस्तन्तुतथागुल्मैः समावृतम् ॥ तंचदृष्ट्वातदारामोबालकानिदमब्रवीत् ॥ ४ ॥
॥रामउवाच ॥ किमिदंबालकाब्रूत वाल्मीकश्चनराकृतिम् ॥ इत्युक्त्वाबालकैः सार्द्धंजगामनिकटेप्रभुः ॥ ५ ॥ करेणस्पर्शनश्चक्रे
बालकानांचपश्यताम् ॥ रामस्पर्शनमात्रेणादिव्यदेहोबभूवसः ॥ ६ ॥ पीतांबरधरःस्रग्वीमुकुटीकुंडलान्वितः ॥ दधाद्विशेषकम्भालेतुल
सीदाममंडितः ॥ ७ ॥ अंगदीचतथाहारीवलयाभ्यांविराजितः ॥ पादौपपातरामस्यस्पृशन्मूर्द्धात्युपानहौ ॥ ८ ॥ ॥श्रीरामउवाच॥
॥ ब्रूहिब्रूहिमहाबुद्धेकारणांह्यात्मनोमम ॥ कस्त्वंवल्मीकरूपेणवनेतिष्ठसिनिर्जने ॥ ९ ॥ अस्माकंश्रवणायालंवक्तव्यंयदिमन्य
से ॥ ॥ पुरुषउवाच ॥ किरातोडिंडिरोहंवैवासोममहिमाचले ॥ १० ॥ धनुर्बाणकरोबिभ्रन्नाचरंमृगयांसदा ॥ एकदामृग
यूथानांपश्चाद्धागेचप्राद्रवम् ॥ ११ ॥ पलायमानास्तेयूथाअरण्यम्विविशुर्भयात् ॥ योजनानांत्रयोविंशद्धावमानोहिमन्दधीः ॥ १२ ॥
परिश्रमयुतोहश्चदिनांतेपततःपथि ॥ आजग्मुश्चतदातत्रसाधवः पंचविंशतिः ॥ १३ ॥ कृपयामांब्रुवन्सर्वेगम्यतांसंगमेननः ॥ ग्रामं
गतस्ततसङ्गेनसतांरात्रिरुपोषिताः ॥ १४ ॥ प्रातःकालेकृतंतैश्चशालग्रामस्यपूजनम् ॥ पाकंकृत्वापुनःसर्वेनैवेद्यंहरयेददुः ॥ १५ ॥
मांप्रसादंददुस्तेचकृपयासाधवःपुनः ॥ स्वयंबुभुजिरेतेचयज्ञोच्छिष्टंदयालवः ॥ १६ ॥ तेषांदर्शनमात्रेणशिलायादर्शनेनच ॥ शालि

ग्रामाशिलातोयञ्जहारममपातकम् ॥ १७ ॥ नैवेद्येनमनःशुद्धम्बभूवरघुनंदन ॥ मांविलोक्यपुनस्तेचप्रोचुर्वाक्यम्परस्परम् ॥ १८ ॥
येमृगावनमध्यस्थातृणाहारानसंशयः ॥ तेषांवधेजनाः सर्वेगच्छन्तिमृगयांवत ॥ १९ ॥ परमांसेनयेपुष्टास्तेषांपीडायमालये ॥ भवि
ष्यतिनसन्देहोपापिनांनरकगामिनाम् ॥ २० ॥ ॥ डिंडिरउवाच ॥ ॥ तेषांवाक्यमिदंश्रुत्वाज्ञानन्तुहृदयेमम ॥ एधांबभूवभो
रामविष्णोर्नैवेद्यभक्षणात् ॥ २१ ॥ अहमुत्थायतेषांतुकृत्वाह्यग्रेपुटांजलिम् ॥ प्रोवाचभवतांसंगेतीर्थयात्रांकरोम्यहम् ॥ २२ ॥ गम्यता
मितितैःप्रोक्तस्तेषांसंगेत्वहंययौ ॥ तीर्थात्तीर्थान्तरङ्गच्छनयोध्यामाययुःपुनः ॥ २३ ॥ संगमेगोप्रतारेचस्वर्गद्वारेचतेपुनः ॥ प्रेम्णा
सस्नुर्महाभागामयासहनरोत्तमाः॥२४॥त्रिरात्रंचह्युषित्वातुगमनायमनोदधुः ॥ प्रस्थिताःसरयूतीरमार्गेणैवान्यतीर्थकम्॥२५॥अत्रागत्यम
हात्मानोदृष्ट्वापुलिनमुत्तमम् ॥ वनैश्चशतपत्राणांपद्मानांहितथैवच ॥ २६ ॥ पुंडरीकवनैश्चित्रैस्तथागुल्मशतैर्वृतम् ॥ ईदृशंपुलिनंदृष्ट्वा
तपस्यायांमनोदधुः ॥ २७ ॥ तप्त्वातपांसितेचात्रगताःस्वर्गतुभिक्षवः ॥ अहंचात्रसमाधिस्थोहरेर्नारायणस्यहि ॥ २८ ॥ ध्यायमानोवि
सस्मारशरीरंबहुवार्षिकम् ॥ वल्मीकंमेशरीरेतुबभूवरघुनंदन ॥ २९ ॥ तवस्पर्शात्पुनःप्राप्तंशरीरंपरमाद्भुतम् ॥ त्वंब्रह्मपरमंसाक्षादाद्यो
नारायणोहरिः ॥ ३० ॥ मोहयन्माययालोकान्क्रीडन्बालैरनेकधा ॥ तवस्मरणमात्रेणपूताःपापाःसहस्रधा ॥ ३१ ॥ किंपुनर्दर्शनेनैव
स्पर्शनेनचकिंपुनः ॥ उद्धारार्थंतुजगतामाविर्भूतायतेनमः ॥ ३२ ॥ तवेयंप्रकृतिरामचेच्छारूपेणवर्ण्यते ॥ तवेच्छयापुनर्जातारजःसत्व
तमोगुणाः ॥ ३३ ॥ तमसापंचभूतानिसत्वादेवाःप्रजज्ञिरे ॥ रजसोपींद्रियाण्यासन्सुषुवुर्यत्रतत्रच ॥ ३४ ॥ अंडमुत्पादयामासुस्तंचे
च्छावेशतःपुनः ॥ षोडशांशेनप्रविष्टस्त्वंविराडितिपृथामगाः ॥ ३५ ॥ हितायजगतांनाथसर्वत्रैवाविराजसे ॥ मुखन्तेब्राह्मणाःसर्वेक्षत्रिया

वाहवस्तव ॥ ३६ ॥ ऊर्वोर्वैश्याःसमुद्भूताःपद्भ्यांशूद्राविनिर्गताः ॥ मूढोयंनाभिजानातिलोकस्त्वांहितकारकम् ॥ ३७ ॥ त्वदीयंदर्शनं
मह्यंसाधूनांकृपयाह्यभूत् ॥ कृपांकुरुसदारामयथातेचरणाब्जयोः ॥ ३८ ॥ मनोयातुयथागंगापूरःपूर्णेपयोनिधौ ॥ यत्सुखंतवभक्तानांसं
गमेनभवेत्क्षितौ ॥ ३९ ॥ नतेनतुलयेमोक्षंस्वर्गमैंद्रपदंतथा ॥ ब्रह्मादिप्रार्थितोनाथजातोदशरथालये ॥ ४० ॥ समुद्रबंधनादीनिकर्मा
णित्वंकरिष्यसि ॥ रावणादीनिरक्षांसिकोटिशोनिहनिष्यसि ॥ ४१ ॥ भूभारंचसमुत्तार्यब्रह्मलोकंगमिष्यसि ॥ इदंत्रैकालिकंज्ञानंजातंमे
दर्शनात्तव ॥४२॥ नमोरामायभद्रायमहाराजायतेनमः ॥ सर्वभूतनिवासायब्रह्मण्यायनमोनमः ॥ ४३॥ आज्ञाचदीयतांमह्यंगमिष्यामि
भवत्पदम् ॥ श्रीरामउवाच ॥ गम्यतांगम्यतांशीघ्रंयत्रतेतत्वरतेमनः ॥४४॥ स्वर्गेवासत्यलोकेवावैकुंठेवाहरेःपदम् ॥ सूतउवाच ॥ राघवेणह्य
नुज्ञातोजगामपरमंपदम् ॥४५॥ हंसयुक्तविमानेनकिंकिणीजालमालिना ॥ पुनर्नजायतेजंतुर्यत्रगत्वामहीतले ॥४६॥ रामोपिबालकैःसार्द्धं
क्रडिन्क्रीडाअनेकशः ॥ आजगामतदागेहंसायंकालेमहामनाः ॥४७ ॥ पौरैर्निरीक्षितोरामःपित्रामात्रातथैवच ॥ भुक्त्वाचतुर्विधंचान्नंनि
नायरजनींततः॥४८॥इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेद्विचत्वारिंशोध्यायः ॥४२॥ सूतउवाच॥एकदारामचंद्रोसौप्रातरुत्थायसत्व
रम्॥कृत्वाचावश्यकंसर्वंभ्रातृभिःसहवीर्यवान् ॥१॥ सखीनाकारयामासमृगयार्थंमहामनाः ॥ प्रतापाग्र्यंनीलरत्नंवीरभद्रंमहाबलम् ॥२॥
सबलाश्वंहरिदश्वशोणाश्वंहरिदश्वकम् ॥ चन्द्रभानुंचन्द्रचारुंरिपुवारंरिपुंजयम् ॥ ३ ॥ भद्राश्वंचजयंतंचसुबाहुंचमहामतिम् ॥ अन्यान
पिमहावीरान्मृगयासिद्धिकारकान् ॥ ४ ॥ कुक्करग्राहिणस्सर्वांस्तथावैजालधारकान् ॥ श्येनपालान्सिंहपालांस्तथातेरक्षुपालकान् ॥५॥
कुलिंगपालकानन्यान्मृगयार्थंसमाव्हयत् ॥ तेचागत्यनृपद्वारेरामार्थंचसमाश्रिताः ॥ ६ ॥ गजारोहास्तथाचान्येह्यश्वारोहाअनेकशः ॥

रथारोहास्तथाचान्येउष्ट्रारोहाअनेकशः ॥ ७ ॥ भुशुंडीभिःसमायुक्तातथापाशैर्भयानकैः ॥ पत्तयस्तुमहावीर्याधनुर्बाणधरावराः ॥ ८ ॥
शृंगारंकुरुतेरामस्तावत्तिष्ठंतिप्रांगणे ॥ एतस्मिन्नंतरेरामोमातुराज्ञामवाप्यच ॥ ९ ॥ राज्ञाचापिह्यनुज्ञातोभ्रातृभिःसहनिर्ययौ ॥
शोणाश्वंरामचंद्रस्तुचारुरोहवलाद्बली ॥ १० ॥ उच्चैश्श्रवःसमप्रख्यंभरतोपिनिजंहयम् ॥ आरक्तंचमहावेगाल्लक्ष्मणोरुरुहेमुदा ॥ ११ ॥
शत्रुहासैंधवंचैववंगकविकयासह ॥ गृहीत्वाचारुरुहच्छीघ्रंसर्वेषांपश्यतांसताम् ॥ १२ ॥ तथाचारुरुहुः सर्वेवाहान्स्वान्स्वानवस्थितान् ॥
तदावाद्यान्यवाद्यंतह्यानकाद्यान्यनेकशः ॥१३॥ चचालरघुनाथोपिभ्रातृभिःसखिभिस्तथा ॥ चामरैर्वीज्यमानश्चरोजेराजकुमारकः॥ १४॥
उष्णीषंहरितंचैवकंचुकंचतथाविधम् ॥ दधानोहरितानांचमणिनांवहुभूषणम् ॥ १५ ॥ त्रिणतंश्चधनुस्कंधेदधानंचेषुधिद्वयम् ॥ रत्न
मुद्राशोभितेनकरेणदक्षिणेनच ॥ १६ ॥ स्वर्णपुंखंतथावाणंभ्रामयंतंमुहुर्मुहुः ॥ कुंडलाभ्यांपरिष्वक्तमलकैश्चलसन्मुखम् ॥१७॥ तिल
केनमहारम्यंशोभितंरत्नमालया ॥ खड्गेनकटिवद्धेनराजमानंकुमारकम् ॥ १८ ॥ उपानहागूढपदंरामंवीक्ष्यजनामुहुः ॥ नागरानरना
र्यश्चनचक्रुर्नेत्रमीलनम् ॥ १९ ॥ एवंब्रुवंतितेसर्वेकरान्गृह्यपरस्परम् ॥ धन्याःसर्वामहिष्यश्चराज्ञोदशरथस्यवै ॥ २० ॥ राममाताच
तासांतुकौशल्याभानुमन्तजा॥ पुनर्धन्यावयंसर्वेरामदर्शनतत्पराः ॥२१॥ अस्यदर्शनमात्रेणवयंमुक्तानसंशयः॥असौनारायणः साक्षाद्भू
भारहरणायच ॥ २२ ॥ देवैश्चप्रार्थितोह्यत्रजातोदशरथात्स्वयम् ॥ एवंवदंतस्तेसर्वेह्यानंदंपरमंययुः ॥ २३ ॥ रामस्यध्वजिनीसातुराज
मार्गसमाययौ ॥ सेनामध्यगतोरामोमन्दंमन्दश्चचालच ॥२४॥ अयोध्यापुरवासिन्योरमण्यस्तुरमाइव ॥ रामदर्शनकांक्षिण्योहर्म्याण्यारुरु
हुर्मुदा ॥ २५ ॥ दृष्ट्वारामंरमानाथंमनसापरिषस्वजे ॥ काचिन्नेत्रपथेरामंकृत्वाध्यानेचतत्परा ॥ २६॥ कोटिकंदर्पलावण्यंदृष्ट्वादेहश्चवि

स्मृता ॥ काचिद्वक्षःस्थितंवस्त्रंकरेणाकृष्यचोत्थिता ॥ २७ ॥ कुचौनचांचलेनापिपिदधेनातिव्रीडिता ॥ मोहिताकामबाणेनलज्जांत्य
क्त्वाचकामिनी ॥ २८ ॥ यःशेतेप्रलयेरामोजगत्पीत्वाचसागरे ॥ एकेनाक्ष्णाययौतंचभावेनरसिकापरा ॥ २९ ॥ काचिद्रामंसमावीक्ष्य
बालकालिंगनेरता ॥ मुखंगवाक्षेकृत्वातुकाचिद्रामंनिरीक्षते ॥३० ॥ पुष्पांजलिंसर्षपांश्चलाजानन्याश्चचिक्षिपुः ॥ काश्चिच्चप्रांजलिंब
ध्वाप्रोचूरामंगवाक्षतः ॥ ३१ ॥ यथानज्ञायतेप्यन्यैस्तथाभावेनताजगुः ॥ कृत्वाचखेटकंशीघ्रमागंतव्यंगृहंद्रुतम् ॥ ३२ ॥ नोचेदागम
नंसायंप्राणायास्यंतिनोवनम् ॥ इतितासांप्रियंवाक्यंहर्म्यैरामोहिशुश्रुवे ॥ ३३ ॥ एतस्मिन्नंतरेराजानिषादाधिपतिर्गुरुः ॥ सर्वायुधधरः
श्रीमान्दासैश्चपरिवारितः ॥ ३४ ॥ रामचंद्रस्यशिक्षार्थंखेटकानांवनेवने ॥ समाहूतस्स्थितोनित्यंराज्ञादशरथेनच ॥ ३५ ॥ तस्मिन्न
वसरेरामंप्रणनामगुहोमुदा ॥ दासाःपंचसहस्राणितस्यसंगेमहाबलाः ॥ ३६ ॥ धनुर्बाणधराःसर्वेभुशुंडीपरिघायुधाः ॥ सर्वेरामस्यचाग
त्यप्रणेमुःपादपद्मयोः ॥ ३७ ॥ निषादाधिपतेरामःकरंजग्राहप्रेमतः ॥ गुहंप्रोवाचरामस्तुखेटकायमनोमम ॥ ३८ ॥ समीचीनतयामि
त्रमांशिक्षयवनेवने ॥ गुहउवाच ॥ काशिक्षात्वंयिकर्तव्यासर्वशिक्षाकरेपरे ॥ ३९ ॥ तथाप्येवंहिकर्तव्यंयथाज्ञापयतेभवान् ॥ सूतउ
वाच ॥ एवंब्रुवतिभूपेचनिषादाधिपतौजनाः ॥ ४० ॥ साधुसाध्वितितंप्रोचुर्मृगयायांकुतूहलात् ॥ रामाज्ञयातदाराजाघोटकंश्यामवर्ण
कम् ॥ ४१ रत्नग्रैवेयसंयुक्तंस्वर्णभांडपरिष्कृतम् ॥ आरुरोहतदावेगाच्छयामवस्त्रेणभूषितः ॥ ४२ ॥ सेनायाअग्रतोजग्मुर्जनास्तेध्वज
धारिणः॥ तत्पश्चाच्चनिषादास्तुबलिष्ठास्तीव्रमन्यवः ॥ ४३ ॥ तेषामपिततःपश्चाद्दुंदुभीनांचवादकाः ॥ तेषामपिततःपश्चात्पत्तयस्तु
भुशुंडिनः ॥ ४४ ॥ अश्वारोहास्ततोजग्मुस्तेषांपश्चाच्चस्यंदनाः ॥ तेषांपश्चाद्गजाजग्मुस्तेषांपश्चात्क्रमेलकाः ॥ ४५ ॥ चचालसामहा

सेनाप्रवाहैः सरितांयथा ॥ अश्वानांदशसाहस्रंहस्तिनांचशतंतथा ॥ ४६ ॥ रथानांचसहस्रंवाउष्ट्राःपंचशतानिच ॥ पदातीनांसहस्राणिसंख्ययापंचविंशतिः ॥ ४७ ॥ रामाज्ञयाचस्वल्पासाखेटकेकिंप्रयोजनम् ॥ जगामसेनानगरात्सरयूतीरमुत्तमम् ॥ ४८ ॥ अश्वारोहास्तुरंगास्तुनर्तयामासुःशिक्षया ॥ मतंगजान्मतंगेभ्योयोधयामासलीलया ॥ ४९ ॥ इत्येवंबहुधालीलाःसैन्येचक्रुःपरस्परम् ॥ ५० ॥

॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ ॥ ॥सूतउवाच ॥

॥ शनैःशौनैर्जगामाथखेटकायचवाहिनी ॥ अयोध्योपवनेवायुस्तांसिषेवेमनोनुगम् ॥ १ ॥ सासेनातमसातीरंजगामचगुहाज्ञया ॥ अग्रेगुहःप्रयातिस्मवननिर्णयकोविदः ॥ २ ॥ निवासोयत्रवन्यानांशोधयामासभूपतिः ॥ ज्ञात्वास्थानंचतेषांतुरामायाकथयत्स्वयम् ॥ ३ ॥ शृणुराजकुमारत्वंवनमत्रभयानकम् ॥ नानाजीवैःसमायुक्तंझिल्लिझंकारनादितम् ॥ ४ ॥ बहुव्यालसमाकीर्णंनानावृक्षैश्चशोभितम् ॥ एतद्वनंमहापुण्यंपावनंचापिपापिनाम् ॥ ५ ॥ उत्फुल्लैर्बहुगुल्मैश्चशोभितंलतयायुतम् ॥ लतानांचप्रतानानिप्रतानैश्चापिमंडितम् ॥ ६ ॥ पुष्पैश्चापिप्रियंगूनां पुष्पितैश्चापिकेतकैः ॥ तमालगुल्मैर्निचितंकर्णिकारैस्तथैवच ॥ ७ ॥ बकुलैःपुष्पितैर्व्याप्तंपुन्नागैश्चमनोरमम् ॥ द्विरेफानांचमालाभिः पुष्पैरतिनिवासिनाम् ॥ ८ ॥ शोभितानांप्रफुल्लानामंबुजानांचरेणुभिः ॥ विहंगानांचनिरुतैर्नादितंसारसैरपि ॥ ९ ॥ प्रमत्तदात्यूहरुतैः पथिकान्वशकारकैः ॥ क्वचिच्चचक्रवाकानांतेषांनादेन नादितम् ॥ १० ॥ क्वचिच्चकलहंसानांनादेनाविनिनादितम् ॥ कारंडवानांशब्देनभ्रमराणांतथैवच ॥ ११ ॥ पुष्पितैःसहकारैश्चतिलकैश्चद्रुमैश्चतम् ॥ प्रकृष्टैश्चविहंगैश्चपिकानांकूजितेनच ॥१२॥ भांडितंनीलकंठानांकेकाभिश्चमनोरमम् ॥ एवंभूतंवनंरामाविद्यतेतमसातटे ॥ १३ ॥ मृगयात्रत्वयाकार्याह्यात्मतोषणहेतवे ॥ सूतउवाच ॥

गुहस्यवचनंश्रुत्वारामोवाचमुवाचह ॥ १४ ॥ श्वगणास्तत्रगच्छंतुतथावैजालधारिणः ॥ वितत्यजालंगृह्णंतुवनजीवाननेकशः ॥ १५ ॥
रामाज्ञयातदासर्वेभटाजग्मुर्वनंवनम् ॥ प्रविष्टानांवनेतेषांतदाकोलाहलोह्यभूत् ॥ १६ ॥ श्रुत्वाकोलाहलंजीवादुंदुभेर्निनदंतथा ॥ पला
यनपराःसर्वेप्राणरक्षणहेतवे ॥ १७ ॥ शशकानांचयूथानिमृगाणांचकुलंतथा ॥ महिषाणांसमूहाश्चचमरीणांचयस्तथा ॥ १८ ॥ वानरा
णांचवृंदंचतथाजीवाह्यनेकशः ॥ स्वंस्वंस्थानंपरित्यज्यपरिपेतुर्मुनेः स्थलम् ॥ १९ ॥ मांडव्यस्यमहाबुद्धेर्दयायुक्तस्यप्राणिषु ॥ दृष्ट्वा
मुनिर्दयायुक्तोविज्ञायकारणंहृदि ॥ २० ॥ खेटकार्थंकुमाराश्चप्राप्ताश्चात्रनदीवने ॥ शिष्यैःपरिवृतोराममाजगामघृणार्दितः ॥ २१ ॥
सूतउवाच ॥ आयांतंचमुनिंदृष्ट्वारामोवतीर्यघोटकात् ॥ भरतादयस्तुतेसर्वेवाहनेभ्योमहींगताः ॥२२ ॥ ववंदिरेमुनेःपादौमांडव्यस्यम
हात्मनः ॥ आशीर्वादान्बहून्प्राहरामायाविदितात्मने ॥ २३ ॥ वनेजातानिपक्वानिफलानिविविधानिच ॥ रामायचार्पयामसमांडव्यो
निजपाणिना ॥ २४ ॥ प्रसादेतितदारामोजग्राहशिरसामुदा ॥ श्रीरामउवाच ॥ कुशलंवर्ततेनाथह्याश्रमेतेमहामुने ॥ २५ ॥ शिष्यावृ
क्षाश्चजीवाश्चक्षेमेणैववसंतिते ॥ मांडव्यउवाच ॥ कुशलंवर्ततेस्माकंकुमारेत्वयिरक्षके ॥ २६ ॥ मृगयार्थंचगच्छंतिजनाएतेममाश्रमे ॥
तान्निवारयश्रीरामकृपांकृत्वाममोपरि ॥ २७ ॥ आश्रमेचमुनीनांतुनकर्तव्यंचखेटकम्॥ आश्रमस्थान्मृगान्हंतितेषांदोषोमहान्भवेत्॥
॥ २८ ॥ इतोदक्षिणतोरम्यावालुकेतिनदीशुभा ॥ ततोग्रेगोमतीवातिलोकानांपापनाशिनी ॥ २९ ॥ तयोस्तीरेकुरुक्रीडांसैन्यैःसह
महामते ॥ ॥ सूतउवाच ॥ ॥ तथेत्युक्त्वामुनेर्वाक्यंरामोजग्राहविस्मितः ॥ ३० ॥ नमस्कृत्यमुनेः पादौरामाद्यारघुपुंगवाः ॥
जग्मुर्वनांतरंसर्वेगुहेनदर्शिताध्वना ॥ ३१ ॥ वनाद्वनांतरंजग्मुः क्रीडार्थंतेचराघवाः ॥ वृक्षान्नानाविधान्फुल्लान्सुंदरानथसर्वतः ॥

॥ ३२ ॥ ददर्शरामोभगवान्कुर्वन्क्रीडामनेकधा ॥ ३३ ॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसम्वादेचतुश्चत्वारिंशोध्यायः ॥
॥ ४४ ॥ ॥ सूतउवाच ॥ ॥ रामोदृष्ट्वावसन्तन्तुसमैक्षतविदूषकम् ॥ रामस्यचेंगितंज्ञात्वावर्णनंचैत्रराधयोः ॥ १ ॥ चकार
वर्णनंसोपितोषायसर्वदेहिनाम् ॥ ॥ विदूषकउवाच ॥ ॥ आजगामवसन्तस्तुकुसुमैस्त्वांनिषेवितुम् ॥ २ ॥ कामेनसदृशंज्ञा
त्वारूपेणविभवेनच ॥ मलयाद्रिंपरित्यज्यहिमवंतञ्चगच्छति ॥ ३ ॥ चक्रवाकेकृपांकुर्वन्दिननाथःशनैःशनैः ॥ प्रभातंचदिनानांतुनि
र्मलंहिमनिग्रहात् ॥ ४ ॥ कुर्वन्यातिदिशंसूर्य्यउत्तरांचहिमालयम् ॥ श्रूयतांचवसन्तस्यक्रमेणागमनंमम ॥ ५ ॥ आदौजन्मच
पुष्पाणांपल्लवानांतदाभवत् ॥ कूजितंकोकिलानांतुपादपानांतदाह्यभूत् ॥ ६ ॥ ऋतुराजःक्रमेणैवावततारवनस्थलीः ॥ कामस्या
पिचजेतृणांमनोवेपनहेतवे ॥ ७ ॥ सहकारलताचित्रेद्विरेफैःपरिसेविते ॥ कोकिलश्चापिनारीणांनायकान्वशमानयत् ॥ ८ ॥ यथादूती
युवानंचयुवत्यावशमानयेत् ॥ वासन्तिकायाःकुसुममशोकस्यचपल्लवम् ॥ ९ ॥ मादकंवर्ततेयूनांयुवत्याः श्रवणार्पितम् ॥ कासार
वशमायांतिपक्षिणोभ्रमरामधौ ॥ १० ॥ दुःखिताश्चयथाभूताह्यर्थिनोप्यर्थहेतुना ॥ शाखाःकुरवकाणांतुवसन्तेनचपुष्पिताः ॥ ११ ॥
ययुःकारणतांसर्वामधुपानांरवैर्मधौ ॥ चैत्रेकुसुमजालञ्चरोचतेकिंशुकेतरौ ॥ १२ ॥ प्रियवक्षस्थलेचिन्हंयुवत्येवनखैःकृतम् ॥ किंशु
कस्यचपुष्पन्तुवनराजिषुशोभते ॥ १३ ॥ युवत्याःकुचयोश्चिन्हंनायकेनकृतंयथा ॥ मालत्यपगमाद्रामभ्रमरःकिंशुकेपतत् ॥ १४ ॥
अङ्गयंगारकबुद्ध्यातुमरणार्थंकृतनिश्चयः ॥ तिलकस्यचपुष्पंतुषट्पदैरतिसेवितम् ॥ १५ ॥ वसंतस्यऋतोर्हास्यंसुगंधमिव
चेप्सुभिः ॥ सुगन्धंलेलिहानाश्चचंदनस्येवधारकाः ॥ १६ ॥ आकुलंवकुलंचक्रुर्मधुपा निज पंक्तिभिः ॥ रेणुश्चकुसुमानांतुचच्छाद

चवनस्थलीः ॥ १७ ॥ प्राकारंकामदेवस्यवातैः किन्तुप्रसारितम् ॥ वनराज्यांवसन्तेतुश्रूयतेकोकिलध्वनिः ॥ १८ ॥ नवोढायायथा
वाक्यं श्रूयतेविरलंजनैः ॥ भ्रमराभ्रमरीभिस्तुतिलकानांतुमस्तके ॥ १९ ॥ कलमानंप्रकुर्वंतिमंदिरेकामिनोयथा ॥ वसन्तेनायकैः
सार्द्धंदोलामारुरुहुःस्त्रियः ॥ २० ॥ प्रियकंठेनिधायाथभुजंरज्जुपरिग्रहे ॥ मानंत्यक्त्वारमध्वंभोवसंतेयुवतीजनाः ॥ २१ ॥
नागमिष्यतियातंचयोषितांचलयौवनम् ॥ इत्युत्प्रेक्ष्यगिरंकांताप्रियस्यनायकैःसह ॥ २२ ॥ रमतेनिर्जनेधाम्निप्रियंकृत्वास्ववक्ष
सि ॥ दययेवतुनारीणांपथिकानांचशर्वरी ॥ २३ ॥ आत्मनोलघुतांचक्रेकथमेतानयंतिमाम् ॥ अशोकस्यलताशोकंमानिनी
नांमनोजजम् ॥ २४ ॥ चकारमाधवेमासियासांभर्तागृहेनहि ॥ मंजरीसहकारस्यदूरेचक्रेचक्रोधताम् ॥ २५ ॥ नायकेषुसमुत्पन्नां
स्वयंयांतिप्रियाश्चतान् ॥ लतायावाटिकायास्तुभ्रमरैरुपनृत्यते ॥ २६ ॥ फाल्गुनेचयथावालैर्युवतीनांचसन्मुखे ॥ चंद्रमाश्चं
द्रिकाभिश्चकामराजमयोजयत् ॥ २७ ॥ समयेऋतुराजस्यचैत्रेवामाधवेपिवा ॥ स्वर्णाकारंतुयत्पुष्पंयुवत्यः कर्णयोर्दधुः ॥ २८ ॥
अलकेषुचतद्भास्तुराजतेह्यद्भुतोपमा॥वनस्थलींचतिलकःशोभयतेप्रियामिव ॥ २९ ॥ तिलकंमृगनाभीनांललाटेसखिभिः कृतम् ॥ पत
योयुवतीःसीधुंपाययंतिचमाधवे ॥ ३० ॥ मदनोद्दीपिनींतूर्णंषंढानामपिवांछिताम् ॥ तांपीत्वामदिरांमत्तावसंतेचऋतौस्त्रियः ॥ ३१ ॥
नगोपयंतिचांगानिपश्यंतिसुरतौपतीन् ॥ विलासिनांमनोनूनंमदयन्तीचमल्लिका ॥ ३२ ॥ भारेणस्तनयोर्यूनांमनांसियुवतीयथा ॥
॥ ३३ ॥ तनुतांचयथानीताखंडितानायकेनया ॥ तथेयंरजनीभातिमाधवेमधुनाकृता ॥ ३४ ॥ कर्णस्थैर्युवतीनांचमोहिताश्चयवांकुरैः॥
युवानोमाधवेमासिह्यवलैकरसाःकृताः ॥ ३५ ॥ मंजरीतिलकस्यापिभ्रमरैरुपरंजिता ॥ मुक्तायष्टिकपोलेचग्रथिताह्यलकैरिव ॥ ३६ ॥

वसंतेविशदंचंद्रकरंचसुखमारुतम् ॥ पिकानांचकदंवंतुद्रुमाणांविपिनंतथा ॥ ३७ ॥ शिशिरापगमात्सर्वेह्यमृतोपमतांययुः ॥ सूतउवाच हास्यायचकुमाराणांपुनरूचेविदूषकः ॥ ३८ ॥ ॥ शृणुरामरजस्संघाःसैन्यानांमस्तकेषुच ॥ पतिताःसहकारस्यकामाग्नेर्वर्द्धनायच ॥ ॥ ३९ ॥ अग्रेकिंशुकजालंतुफुल्लंवीक्ष्यचसैनिकाः ॥ मेनिरेसर्वतोदीप्तंवैश्वानरशिखामिव ॥ ४० ॥ पुष्पितांकुंदशाखांचदृष्ट्वाहास्यंपुनर्ययुः ॥ ऊचुस्तेसैनिकाःसर्वेसंवीक्ष्याम्रंचपुष्पितम् ॥ ४१ ॥ सैनिकाऊचुः ॥ इयंचसहकारस्यमादकाभ्रमरैर्युता ॥ शाखाकुसुमितानूनमस्माकंमोहनायच ॥ ४२ ॥ इतिश्रुत्वातदावीरः सैन्यानांहास्यकारकः ॥ दंडमुद्यम्यहस्तेनतताडसहकारकम् ॥ ४३ ॥ अयंमादकरोस्माकंसैन्यानांयुवतींविना ॥ जहसूराघवाःसर्वेहास्यकारस्यकर्मणा ॥ ४४ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेपंचचत्वारिंशोऽध्यायः ॥ ४५ ॥

सूतउवाच ॥ अथरामोपिधर्मात्मावसंतोत्सवमन्वभूत् ॥ मृगयायांरतिंचक्रेसखिभिःसहबुद्धिमान् ॥ १ ॥ श्वगणेनसमायुक्तंतथाचनाभिभिर्वृतम् ॥ वनंविवेशरामोहिगुहेनसखिभिस्तथा ॥२ ॥ मौलौनिबद्धचवेगेनवनमालांचपाणिना ॥ तुरंगंनर्तयामासरेजेचंचलकुंडलः ॥ ३ ॥ आविश्यतरुशाखांचषट्पदैर्नेत्रतांगतैः ॥ ददृशुर्वनदेवाश्चरामंकंदर्पसन्निभम् ॥४ ॥ इन्द्रचापसमंचापंसज्यंकृत्वाचलीलया ॥ रवेणक्षोभयामाससिंहान्वनगजान्प्रभुः॥५॥ गगनंछादयामासह्यश्वस्यखुररेणुभिः ॥ चललक्ष्यभिदास्त्रेणरामोभ्यासंचकारह ॥६॥अग्रेरामस्ययूथंचमृगाणामावभूवह ॥ शावैर्वैहन्यऽमानंचमृगीणांस्तनपायिभिः ॥७॥ तदग्रेकृष्णसारंचमत्तंदीर्घविषाणिनम् ॥हास्यार्थंसर्वसैन्यानांरामस्यापिविदूषकः॥८॥ द्रावयामासवेगेनमृगयूथंचवाजिना॥ययौतुमृगयूथंतुवनेषुबहुधातदा ॥९॥ जहसुःसैनिकाःसर्वेदृष्ट्वापंक्तिवनौकसाम् ॥ लक्ष्यंकृत्वामृगंरामःदृष्ट्वातस्याप्रियांमृगीम् ॥ १० ॥ ऽव्यवधायस्थितांदेहंनचक्रेबाणमोचनम् ॥ पुनरन्यंमृगंदृष्ट्वा

नसुमोचशरंहरिः ॥ ११ ॥ सुमोहतस्यनेत्राभ्यांगुणग्राहीरघूत्तमः ॥ एतस्मिन्नंतरेराजानिषादानांपतिर्गुहः ॥ १२ ॥ समीपेरामचंद्रस्य
ह्याजगामसुदासुधीः ॥ ॥ श्रीगुहउवाच ॥ ॥ भोःश्रीराममहाबाहोश्रूयतांवचनंमम ॥ १३ ॥ मृगयूथवधेनैवत्वस्माकंकिंभविष्यति ॥ सिं
हानांचगजानांचमृगयाक्रियतांवने ॥ १४ ॥ एतस्मिन्नंतरेचैवहासकोऽन्यःसमागतः ॥ अब्रवीद्रामचंद्रंचमृगयार्थंमहामनाः ॥१५॥ विदू-
षकउवाच ॥ इतोविदूरेभोरामपल्वलंवर्ततेवने ॥ कोलानांतत्रयूथानिवर्ततेबहुशःप्रभो॥ १६॥ तेषांमुखाद्विकीर्णानिगुंद्रारोहाणिपश्यभोः
॥गम्यतांतत्रभोवीरमृगयार्थंत्वयाद्रुतम् ॥१७॥ सूतउवाच ॥ ॥ इतिश्रुत्वाद्वितीयस्तुहास्यकारोब्रवीदिदम् ॥ नमयातत्रगंतव्यंवराहाणां
चसंमुखे ॥ १८ ॥ लोलुपानरनाशार्थंतत्रगंतुंनशक्ष्महे ॥ इतिवाक्यंतथाश्रुत्यजहसूराजपुत्रकाः ॥ १९॥ रामोजग्राहमार्गंतुकोलानांचगु
हाज्ञया ॥ आगच्छंतंवराहंतुरामोविव्याधचेषुभिः ॥ २० ॥ प्राणान्गृहीत्वातेबाणाःशुष्काःपेतुर्महीतले ॥ एवंहत्वावराहंतुजगामाग्रेरघू
त्तमः ॥ २१ ॥ भुशुंडीचमहाखड्गीचोत्तस्थौसैन्यसंमुखे ॥ तंदृष्ट्वासैनिकाःसर्वेहाहाशब्दंप्रचक्रमुः ॥ २२ ॥ केचिद्बाणैर्भुशुंडीभिःकेचि
त्खड्गैर्व्यदारयन् ॥ एवंहत्वातुतंतेसाजगामाग्रेचवाहिनी ॥ २३ ॥ हेषारवंवाजिनांचश्रुत्वासिंहोविनिर्ययौ ॥ ॥ श्रीरामचंद्रउवाच ॥ ॥
कोहंताह्यस्यसिंहस्यगृण्हातुवरवीटिकाम् ॥ २४ ॥ गुहोजग्राहवेगेनहंतव्योयंमयाहरिः ॥ यथाज्ञातेतथाहन्मिसिंहंबाणेनवासिना ॥२५॥
राघवेणतदाप्रोक्तोबाणेनैवचहन्यताम् ॥ राघवस्यतुतद्वाक्यंश्रुत्वाबाणंचसंदधे ॥२६॥ जघानाशिरसोमध्येसिंहस्यैवतदागुहः ॥ उत्पपात
तदासिंहोननर्दचपुनःपुनः ॥ २७ ॥ सखापिरघुनाथस्यप्रतापीनामनामतः ॥ जघानोत्पत्यवेगेनकंठदेशेमहाहरेः ॥२८॥ हत्वासिंहंप्रता
पीतुननामरघुपुंगवम् ॥ राघवःपरमप्रीतःसखायंपरिषस्वजे ॥२९॥ निषादाधिपतिंप्रीतोददौदेयांश्रियःपतिः ॥ तस्मिन्कालेपदातिस्तुचा

जगामवनांतराद् ॥ ३० ॥ वर्तेतचमहासिंहोवनेस्मिन्रघुनायक ॥ इतिश्रुत्वातदावाक्यंभरतोराममब्रवीत् ॥ ३१ ॥ भरतउवाच ॥ ॥ मयासिंहोपिहंतव्योवनेह्येकाकिनाप्रभो ॥ ममसिंहस्ययुद्धंतुसर्वेपश्यंतुसैनिकाः ॥ ३२ ॥ ॥ श्रीरामउवाच ॥ ॥ भोभोभ्रातःशृणुष्वेदंन योग्यंसाहसंहरौ ॥ क्षत्रियस्यैवशूरत्वंरणेचैवयशोनहि ॥ ३३ ॥ गम्यतांसखिभिःसार्द्धंहन्यतांचैवकेसरी ॥ आज्ञप्तोरघुनाथेनजगामभरतोहरिम् ॥ ३४ ॥ सैन्यैरावरणंचक्रेहननार्थंतुवैहरेः ॥ सिंहोदृष्ट्वाजनान्सर्वान्जगर्ज्जोत्क्षिप्यबालधिम् ॥ ३५ ॥ आययौवनमध्येतुकेसरीभरतंप्रति ॥ उच्चचालतदाहृष्टोभीषयन्गजमंडलम् ॥ ३६ ॥ चापमाकृष्यवेगेनविव्याधतस्यमस्तके॥ बाणस्यस्पर्शमात्रेणममारसतुकेसरी ॥ ३७ ॥ दिव्यदेहधरोजातस्तुलसीदाममंडितः ॥शंखचक्रधरोधीमान्विष्णुपार्षदसन्निभः ॥ ३८ ॥ चतुर्भिर्बाहुभिर्युक्तोमुकुटीकुंडलान्वितः ॥ भरतस्यननामाथपादपद्मेमहामनाः ॥ ३९ ॥ पुनरुत्थायप्रेम्णातुतस्थौप्रांजलिरग्रतः ॥ ॥ भरतउवाच ॥ ॥ कथंचरसिसिंहस्यरूपेणत्वंवनेवने ॥ ४० ॥ केनैवकर्मणाप्राप्तःसिंहयोनिंवदस्वमे ॥ पुनस्त्वंदिव्यरूपोहिमद्बाणस्पर्शमात्रतः ॥ ४१ ॥ इतिमेसंशयंछिंधिसर्वेषामपिशृण्वताम् ॥ ४२ ॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ ॥ पुरुषउवाच ॥ ॥ श्रूयतांमेकथावीर पूर्वजन्मसमुद्भवा ॥ कलिंगदेशसंभूतोनाम्नाहंशंकरोद्विजः ॥ १ ॥ दुष्टसंगप्रभावेणब्रह्मत्वंनाशितंमया ॥ सर्ववर्णाश्रमाणांचनिंदकोहंपुराभवम् ॥ २ ॥ वैष्णवद्विजदेवानांनिंदनेसंरतोभवम् ॥ एकदाभ्रममाणोहंपृथिव्यांचयदृच्छया ॥ ३ ॥ भरद्वाजंमुनिवरंप्रयागाश्रमवासिनम् ॥ हवनंचप्रकुर्वंतमग्नौप्रज्वलितेमुदा ॥ ४ ॥ घृतशर्करयासार्द्धंतिलेनसहपायसम् ॥ अन्यैर्मिष्टफलैःसाकंक्षिपंतंजातवेदसि ॥ ५ ॥ तंदृष्ट्वामहदाश्चर्यंगमनंतस्यसन्निधौ ॥ कृतंमयामहाभागहास्यार्थंतस्यवैमुनेः ॥ ६ ॥ उक्तोमयाद्विजवरः

किंत्वयाक्रियतेमुने ॥ एतत्तुपायसंविप्रकिमग्नौपात्यतेमुधा ॥ ७ ॥ मह्यंदेहिमहाभागयेनाहंवलवत्तरः ॥ भवानिनचिराद्ब्रह्मंस्त्वादृशा
नांचपातने ॥ ८ ॥ अग्नौयत्पात्यतेवस्तुतत्सर्वंभस्मतांव्रजेत् ॥ अन्नस्योपद्रवोह्येतत्प्रमादेनत्वयाकृतम् ॥ ९॥ मांचभोजयभोविप्रभावि
ष्येसिंहवत्वली ॥ इदंवाक्यंमदीयंचश्रुत्वाविप्रश्चुकोपच ॥ १० ॥ भरद्वाजउवाच ॥ ॥ ब्रह्मबंधोकिमेतत्तेव्याहृतंवेदनिंदनम् ॥ वेदोना
रायणःसाक्षात्तेनैवाराध्यतेहरिः ॥ ११॥ हृदयंतवसिंहत्वेतस्मात्सिंहोभविष्यसि ॥ शप्तोहंतेनविप्रेणवेपथुर्मेतदाह्यभूत् ॥ १२ ॥ प्रोवाच
प्रांजलिंकृत्वाकदामुक्तिर्भविष्यति॥सिंहयोनेर्द्विजश्रेष्ठपापिनोमेमहामते ॥ १३ ॥ ॥ भरद्वाजउवाच ॥ ॥ त्रेतायुगेदाशरथिःसाक्षादा
विर्भविष्यति॥अयोध्यायांमहापुर्यांनाम्नारामोमहीपतिः॥१४॥कनीयान्भरतस्तस्यभ्राताशूरोभविष्यति ॥ मृगयार्थंरामचंद्रेणसखिभिः
परिवारितः ॥ १५ ॥ यत्रत्वंसिंहरूपेणस्थास्यसिविपिनेवने ॥ भरतस्तत्रचागत्यचेषुणात्वांवधिष्यति १६ ॥ बाणस्यस्पर्शमात्रेणदिव्य
देहोभविष्यसि ॥ अधुनातस्यवाक्यन्तुसत्यंजातंतवाग्रतः ॥ १७ ॥ नमस्तेराजपुत्रायभरतायनमोनमः ॥ नमस्तेरघुवर्यायनमस्तेस
त्वमूर्तये ॥ १८ ॥ आज्ञांदेहिमहाराजव्रजामिरामसन्निधौ ॥ नत्वारामस्यपादौतुगमिष्येपरंपदम् ॥ १९ ॥ ॥ भरतउवाच ॥ ॥
मयापितत्रगन्तव्यंत्वमप्यागच्छभोद्विज ॥ इत्युक्त्वासखिभिः सार्द्धंतैनवभरतोमुदा ॥ २० ॥ आजगामहरेः पार्श्वंरामस्यपरमा
त्मनः ॥ दृष्ट्वारामोपितंदेवंलेभेकौतूहलंतदा ॥ २१ ॥ सोपिचागत्यरामस्यववंदेचरणौमुदा ॥ तस्यवृत्तन्तुरामायसखायोभरतस्य
ये ॥ २२ ॥ ऊचुःश्रुत्वाचरामोपिह्याश्चर्यमितिचाब्रवीत् ॥ आज्ञप्तोरामचन्द्रेणकिंकिणीजालमालिना ॥ २३ ॥ विमानेनदिवंयातोराम
चन्द्रप्रसादतः ॥ यत्रगच्छन्तिधर्मिष्ठाविष्णुभक्ताःसुसाधवः ॥ २४ ॥ नव्रजतिह्यधर्मिष्ठाशठाभूतद्रुहःखलाः ॥ २५ ॥ इतिश्रीसत्योपा
ख्यानेसूतशौनकसंवादेमृगयाविहारोनामसप्तचत्वारिंशोऽध्यायः॥४७॥सूतउवाच ॥ सेनाजगामचाग्रेवैगोमत्यास्तीरसम्भवम् ॥ वनम्बहु

मृगाकीर्णंझिल्लिझंकारनादितम् ॥ १ ॥ यामेचतुर्थेरामस्तुगुहम्प्रोवाचधर्मवित् ॥ ॥ श्रीरामउवाच ॥ ॥ निषादाधिपतेह्यत्रवस्तव्य
म्विपिनेमया ॥ २ ॥ गोमत्याःपुलिनेरम्येमुनिसंकुलशोभिते ॥ सैनिकाःश्रमितानूनंदिनांतश्चापिवर्तते ॥ ३ ॥ वनस्थाऋषयःसर्वेसा
यंसंध्यामुपासते ॥ सूर्यश्चास्तगिरिम्प्राप्तोवयश्चात्रवसेमहि ॥ ४ ॥ एतेमयूराःसंयांतिनिवासायद्रुमान्प्रति ॥ नगच्छन्तिजनानूनं
ज्ञात्वासंध्यामुपागताम् ॥ ५ ॥ ऋषीणामाश्रमोह्यत्रज्ञायतेधूमदर्शनात् ॥ धेनवःशीघ्रगामिन्यः ऋषीणामाश्रमम्प्रति ॥ ६ ॥ मंजरीभिः
शुकैः कीर्णंगोधूमानामहीतलम् ॥ शुकावसंतिवृक्षाणांकोटरेषुसमंततः ॥ ७ ॥ एतेमृगाःसमायांतिमुनेराश्रमवासिनः ॥ इत्येवंवदतस्त
स्यसेनाप्राप्ताश्रमांतिके ॥ ८ ॥ मेधावीनामब्रह्मर्षिर्ज्ञात्वारामंसमागतम् ॥ शिष्यैः परिवृतोमुख्यैः फलपुष्पकरैर्मुदा ॥ ९ ॥ रामचन्द्रो
पितंदृष्ट्वावाहनादवरुह्यच ॥ भ्रातृभिः सखिभिः सार्द्धंववन्देचरणौतदा ॥ १० ॥ वभूवतीर्थंगोमत्याःपापघ्नमितिविश्रुतम् ॥ यत्रस्नाने
नदानेनपापंनश्यतिवैनृणाम् ॥ ११ ॥ स्तुत्वारामम्मुनिस्तत्रनिनायचाश्रमंप्रति ॥ पूजयामासविधिवत्फलमूलसमित्कुशैः ॥ १२ ॥
सेनानिवेशस्तत्रासीदृषेराज्ञामवाप्यच ॥ ऋषेराज्ञामनुप्राप्यकृत्वासंध्यांयथाविधि ॥ १३ ॥ तदारामस्त्क पक्वान्नंभ्रातृभिःसखिभिःसह ॥
कौशल्याप्रेषितंचान्नंबुभुजेप्रीतमानसः ॥ १४ ॥ तथाचसैनिकाः सर्वेबुभुजुःकदलीदले ॥ अश्वागजास्तथाचोष्ट्रायवसैरेवतर्पिताः ॥
॥ १५ ॥ रात्रौप्रजज्वलुर्दीपा वृक्षेवृक्षेसमर्पिताः ॥ गजग्रैवेयकंतत्रवृक्षस्कंधेसमर्पितम् ॥ १६ ॥ सैनिकाश्चतदानिद्रांलेभिरेपरयामुदा ॥
अर्धरात्रेव्यतीतेचसर्वेनिद्रांचलेभिरे ॥ १७ ॥ पृतनायास्तदारक्षांरक्षकाश्चप्रचक्रिरे ॥ शत्रुघ्नोपितदावीरोनिद्रांत्यक्त्वामहामनाः ॥ १८ ॥
रजन्याःपश्चिमेयामेधनुर्वाणधरःस्वयम् ॥ ररक्षवंधून्प्रेम्णावैसौभ्रात्रमनुदर्शयन् ॥ १९ ॥ एतस्मिन्नंतरेतत्रमहोत्पातोवभूवह ॥ सेनागजा

पलायंतेभंक्त्वापादैश्चशृंखलाः ॥२०॥ मदंजिघ्रायकरिणोवन्यस्यवनवासिनः ॥ विशृंखलशृंखलकाः पलायनपराययुः॥२१॥ मातंगस्य
भयादश्वाःकीलमुत्पाट्यवेगतः ॥ सतुमत्तोहिमातंगोगंधमाघ्रायदंतिनाम् ॥ २२ ॥ सेनायाःप्रययौपार्श्वेयुद्धायाकिलदंतिभिः ॥
यस्मिन्वृक्षेगजाबद्धाः सेनायाःकिलनागराट्॥ २३ ॥ तंतंबभंजवेगेनशुंडयाकृष्यवीर्यवान् ॥ मानिनोहिमदोन्मत्तानासहन्खलुवैरिणः ॥
॥ २४ ॥ गंधंपरेभमाघ्रायहननायकिलोद्यतः ॥ भ्रमद्भिर्भ्रमरैर्युक्तःगंडस्थमदपायिभिः ॥ २५ ॥ धूलिधूसरसर्वांगोवन्योनागोहिदृश्यते
महामात्रास्तदानींतुह्यश्वपालास्तथैवतु ॥२६॥ उष्ट्रपालास्तथाचान्येचक्रुःकोलाहलंमहत् ॥ शत्रुघ्नस्तुतदोत्थायपप्रच्छखलुसेवकान् ॥
॥ २७ ॥ किंकिंकिमितिभोलोकाःसेनायांश्रूयतेध्वनिः ॥ एतस्मिन्नंतरेतंतुहस्तिपावाक्यमब्रुवन् ॥ २८ ॥ हस्तिपाऊचुः ॥ कुमारश्रूयतां
वाक्यंनागोयंचवनोद्भवः ॥ समायातिगजैः साकंयुद्धायकृतनिश्चयः ॥ २९ ॥ एतस्मिन्नंतरेराजानिषादाधिपतिर्गुहः ॥ उवाचवचनंवेगा
ज्जनानांशृण्वतामिदम् ॥ ३० ॥ हन्यतांहन्यतामेषउल्मुकैस्तुमतंगजः ॥ शत्रुघ्नउवाच ॥ कुत्रचास्तिगजोवन्योद्रष्टुंचेच्छामिभोजनाः ॥
॥ ३१ ॥ सज्यंकृत्वाधनुर्बाणंगुहेनसहजग्मिवान् ॥ तदागजोमदोन्मत्तोदूराद्दृष्ट्वाजनान्बहून् ॥ ३२ ॥ गंतुंसमीहामासापिशत्रुहायत्राति
ष्ठति ॥ जनाःपलायिताः सर्वेदृष्ट्वायांतंमतंगजम् ॥ ३३ ॥ हास्यंकृत्वातुशत्रुघ्नोचापमाकृष्यवेगतः ॥ तताडमस्तकेबाणंस्वर्णपुंखंशि
लाशितम् ॥ ३४ ॥ सतुबाणोगजंभित्वाप्राणमाकृष्यतस्यतु ॥ गुदद्वारेणनिर्यातोभूम्यांचविविशेपुनः ॥ ३५ ॥ गजदेहंपरित्यज्यदेववदे
होबभूवह ॥ शंखचक्रधरोदेवोवनमालापरिष्कृतः ॥ ३६ ॥ सूतउवाच ॥ तद्दृष्ट्वामहदाश्चर्यंशत्रुघ्नोविस्मितोभवत् ॥ पप्रच्छकारणंतंतुग
जदेहस्यसंभवे ॥ ३७ ॥ शत्रुघ्नउवाच ॥ कारणंब्रूहिभोदेवगजदेहस्यमांप्रति ॥ केनत्वंकर्मणाजातोगजरूपोमहामते ॥ ३८ ॥ देवउ

वाच ॥ श्रूयतांरघुशार्दूलकारणंमेगजस्यभोः ॥ पुराहंब्राह्मणोवीरमद्यपानरतः सदा ॥ ३९ ॥ साधुनिंदाकरोनित्यंतथाविष्णुविनिंदकः॥
मत्तोहंमद्यपानेनवीथ्यांगच्छन्नितस्ततः ॥४०॥ माहिष्मत्यांनिवासोमेपूर्वजन्मनिराघव॥आजगामऋषिःकश्चिन्नाम्नासोपिसुदर्शनः ॥४१॥
विष्णुभक्तोमहाबुद्धिःसाधुसेवीजितेंद्रियः ॥ स्नात्वासरोवरेदिव्येपूजांचक्रेहरेः शुभाम् ॥ ४२ ॥ घंटानादः कृतस्तेन शंखनादस्तथैवच ॥
तच्छ्रुत्वाहंजहासोच्चैर्बृंहितेनगजोयथा ॥ ४३ ॥ शप्तोहंतेनमुनिनागजस्त्वं भवदुर्मते ॥ घंटानादंशंखनादंहरिगीतंतथैवच ॥ ४४ श्रुत्वाह
संतियेपापास्तेवैनरकगामिनः ॥ निंदांकुर्वंतियेविष्णोर्हरस्यतत्परस्यवा ॥ ४५ ॥ तेषांमुखंनद्रष्टव्यंसंगतिस्तुकुतस्तराम् ॥ इत्येवंब्रुवत
स्तस्यपादेहंपतितोभवम् ॥ ४६ ॥ कथंमेशापतोमुक्तिर्मयापृष्टोमुनिः पुनः ॥ सोप्युवाचदयांकुर्वन्श्रूयतांवच्मितत्वतः ॥ ४७ ॥
॥ सुदर्शनउवाच ॥ ॥ त्रेतायुगेह्ययोध्यायां राजादशरथोबली ॥ भविष्यतिमहाप्राज्ञस्तस्यपुत्रोहरिः स्वयम् ॥ ४८ ॥ रामलक्ष्मण
शत्रुघ्नभरताइतिसंज्ञया ॥ खेटकार्थंकुमारास्तेगमिष्यंतिवनेवने ॥ ४९ ॥ गोमत्याः पुलिनेरम्येवासस्तेषां भविष्यति ॥ गंधमाघ्रायसे
नाया गजानांत्वंगमिष्यसि ॥ ५० ॥ त्वदीयंगंधमाघ्रायाविद्राविष्यंति तेगजाः ॥ अर्धरात्रेमहाघोरेजाग्रतः शत्रुघातिनः ॥ ५१ ॥ तस्यबा
णप्रहारेणगजत्वंत्वंत्यजिष्यसि ॥ अंघ्रिस्पृष्ट्वातदातस्यप्रयास्यसिपरंपदम् ॥ ५२ ॥ ॥ देवउवाच ॥ ॥ इदानींतस्यवाक्यं
तुसत्यंजातंहिराघव ॥ नमस्तेचक्ररूपायरघुवर्यायतेनमः ॥५३॥ नमस्तेस्तुमहावीरपाहिमांशरणागतम् ॥ वनेरणेमहाघोरेसंकटेशत्रुणां
गणे ॥ ५४ ॥ ध्यानंतवकरिष्यंतितेषांकालभयंनहि ॥ इत्युक्त्वापादयोर्नत्वाजगामपरमंपदम् ॥ ५५ ॥ शत्रुघ्नादयस्तेसर्वेविस्मयंलेभिरे
तदा ॥ रामस्यनिकटेतस्थौगुहेनसमहामतिः ॥ ५६ ॥ निद्रांविहायरामस्तुचोत्थितोरजनिक्षये ॥ गुहोपिकथयामाससमातंगहननंसुधीः

॥ ८७ ॥रघुनाथोपितच्छ्रुत्वाभ्रातरंपरिषष्वजे ॥ लज्जमानंमहावाहुंहृदिसं मेलयप्रेमतः ॥ ८८ ॥ ॥ श्रीरामउवाच ॥ ॥ अस्मिन्वनेमहा
घोरेनिद्रयापरिमोहिताः ॥ गुहेनभवताचैवमतंगाच्चाभिरक्षिताः ॥ ८९ ॥ गुहमित्रेणभ्रात्राचसनाथाविचरेमहि ॥ ॥ सूतउवाच ॥ एवंप्र
ब्रुवतस्तस्यमार्तंडोददृशेजनैः ॥ ९० ॥ प्रातः संध्यामुपास्याथगंतुंचक्रेमनोहरिः ॥ ९१ ॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेऽ
ष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ सूतउवाच ॥ ॥ मेधाविनंचविज्ञाप्यप्रणम्यचरणौपुनः ॥ आरुरोऽहरथंरामोनानारत्नपरिष्कृतम् ॥ १ ॥
तथैवभ्रातरंसर्वेसखायोनिजवाहनान् ॥ चचालध्वजिनी वेगात्गोमत्याः पुलिनाच्छुभात् ॥२॥ खेटकंवहुधाकुर्वन्जीवानांवनवासिनाम् ॥
राघवस्तुरथा रूढोददर्शमृगपुंगवम् ॥ ३ ॥ उवाचराघवो वाक्यंसूतंप्रतिमहामनाः ॥ ४ ॥ ॥ श्रीरामउवाच ॥ ॥ रथंप्रापयमेसूतमृगपृष्ठे
नसंशयः ॥ हनिष्यामिमृगंह्येनंयदिनस्यात्तपस्विनः ॥ ५ ॥ ॥सूतउवाच॥ ॥इत्युक्तारघुनाथेनप्रेरयामासवाजिनः ॥ वायुवेगेनतेवाहाः ह
र्षाच्चैवप्रदुद्रुवुः ॥ ६ ॥ पुनःप्राहतदारामःसूतंगंभीरयागिरा ॥ ७ ॥ ॥ श्रीरामउवाच ॥ ॥ स्यंदनोयंमहावेगाद्वायुवेगेनगच्छति ॥
मयानदृश्यतेसम्यग्भूभागश्चइतस्ततः ॥ ८ ॥ यद्वनंदृश्यतेह्यग्रेपश्चाद्भवतितत्क्षणात् ॥ अग्रेयादृश्यतेभूमिर्ह्यापतंतीवलक्ष्यते ॥ ९ ॥
पलायतीवमत्पृष्ठेमयासूतविलोक्यते ॥ एतेरथ्यामहावेगाद्वहंतिरथमोजसा ॥ १० ॥ सूर्यरथ्यायथाव्योम्निवहंतिरविस्यंदनम् ॥ वाहाद्र
वंतिवेगेनधूलिपातभयादिव ॥ ११ ॥ रथशिक्षाप्रवीणोसिगृह्यतामंगदंत्विदम् ॥ श्लाघामेवंप्रकुर्वन्सविरराममहामतिः ॥ १२ ॥ ॥
सूतउवाच ॥ ॥ मृगंदृष्ट्वापलायंतंपुनःप्रोवाचराघवः ॥ पश्यत्वंसारथेह्येनंमृगोधावतिवेगतः ॥ १३ ॥ क्वचिद्ग्रीवांचसंकुच्यनभोगच्छ
तिवेगतः ॥ स्वल्पंगच्छतिभूपृष्ठेवहुधायातिचांवरे ॥ १४ ॥ वाणपातभयाच्चैवह्यंगंसंकुचतेमुहुः ॥ स्यंदनेचार्पयन्दृष्टिंग्रीवाभंगंविधायच

॥ १५ ॥ क्वचिद्यातिप्रकाशंचक्वचिद्यातिनिलीयच ॥ धूर्तोयंमृगराजस्तुत्वयाश्रमस्थोनसंशयः ॥ १६ ॥ ॥ सूतउवाच ॥ ॥ इत्येवं
ब्रुवतस्तस्यरामस्यपरमात्मनः ॥ प्राप्तासेनातदावेगाद्रामचंद्रस्यसन्निधौ ॥ १७ ॥ दुंदुभीनांप्रणादंतुश्रुत्वामुनिवरौतदा ॥ वालखिल्यौ
महाबुद्धीरामपार्श्वमुपागतौ ॥ १८ ॥ ॥ वालखिल्यावूचतुः ॥ ॥ नहंतव्योनहंतव्योमृगोयंवनवासिनाम् ॥ भविष्यतिमहान्दो
षोवधेत्वस्यकुमारक ॥ १९ ॥ ॥ सूतउवाच ॥ ॥ अवरुह्यरथाद्रामोदृष्ट्वातौमुनिपुंगवौ ॥ पपातचरणोपांतेनम्रोभूत्वास्थितोपुनः॥
॥ २० ॥ ॥ श्रीरामउवाच ॥ ॥ क्षम्यतामपराधोमेवालकस्यमहामती ॥ अजानतामयाचैवयुवयोर्द्रावितोमृगः ॥ २१ ॥ ॥ वाल
खिल्यावूचतुः ॥ ॥ अजानतांनदोषोस्तिचेश्वराणांचकिंपुनः ॥ मर्यादापालितारामत्वयावैधर्मभीरुणा ॥ २२ ॥ आशीर्वादंप्रदास्यावः
श्रूयतांतच्चराघव ॥ जनकस्यगृहेसंतिकुमार्योवेदसंख्यया ॥ २३ ॥ विवाहोभवतांदेवकुमाराणांकिलैकदा ॥ ताभ्यामुक्तस्तदारामोरथ
मारुरुहेपुनः ॥ २४ ॥ आज्ञाप्यतौमुनीरामोगम्यतामाश्रमंप्रति ॥ चचालसेनयासार्द्धंराघवःप्रहसन्मुदा ॥ २५ ॥ वर्जयन्ऋषिसंघानामा
श्रमाणियतस्ततः ॥ ततोर्द्धंदिवसेयातमध्यंप्राप्तोदिवाकरः ॥ २६ ॥ प्राप्तासेनामुनेःस्थानमृष्यशृंगस्यवेगतः ॥ फेनान्मुंचतिवाहाश्चसू
र्यरश्मिप्रपीडिताः ॥२७॥ एतस्मिन्नंतरेजीवाःसेनानादप्रपीडिताः॥व्याघ्रांसिंहावराहांश्चमाहिषाऋक्षवानराः ॥२८॥ शशामृगास्तथाचान्ये
परिपेतुरनेकशः॥ तेषांपलायनंदृष्ट्वाऋष्यशृंगःप्रतापवान्॥२९॥उवाचशिष्यान्मेधावीपश्यतांकःसमागतः॥राजावाराजपुत्राश्चमृगयार्थंस
मागताः ॥३०॥ संवेष्ट्यपादेवल्लीश्चविद्रवंतिवनेगजाः ॥ एतेपतंतिचारण्यामृगावैसरयूजले ॥३१॥ प्लवंतिशतशोजीवाःप्राणरक्षार्थहेतवे ॥
गम्यतांतत्रशीघ्रंवैवार्यतांमृगयार्थिनः ॥ ३२ ॥ सूतउवाच ॥ इत्याज्ञप्तश्चमुनिनानिर्जगामसमहामतिः ॥ दृष्ट्वाराममुवाचाशीर्विधायकर

संपुटम् ॥ ३३ ॥ प्रणम्यलक्ष्मणोवाक्यमुवाचतंमुनिंप्रति ॥ लक्ष्मणउवाच ॥ वर्ततेमुनिशार्दूलऋष्यशृंगोनिजाश्रमे ॥ दर्शनंचक
रिष्यामोवयंतस्यमहामुनेः॥३४॥महामतिरुवाच॥ वर्ततेमुनिशार्दूलोह्यग्निहोत्रंविधायच॥श्रीमतांसंगमंचास्तेप्रतीक्षञ्छांतयासह॥३५॥
सूतउवाच ॥ ॥ विश्राव्यवचनंरामोजगाममुनिसन्निधौ ॥ कथयामासवृत्तांतंरामचंद्रसमागमम् ॥ ३६ ॥ सैनिकाःसहरामेणविज्यंकृ
त्वाचकार्मुकम् ॥ आश्रमंविविशुर्वेगाद्दर्शनार्थंमहामुनेः ॥ ३७ ॥ शांतापिभगिनीतस्यरामस्यपरमात्मनः ॥ पाद्यमर्घ्यंविधायाथचक्रे
नीराजनंततः ॥ ३८ ॥ अंचलेनममार्जथरामस्यमुखपंकजम् ॥ सहोदराणांसर्वेषांवदनानिममार्जच ॥३९॥ ऋष्यशृंगोपिचागत्यचाशी
र्वादमुवाचच ॥ रामादयस्तुतेसर्वेजगृहुःपादपंकजम् ॥ ४० ॥ सम्परिष्वज्यप्रेम्णातुरामादीन्राजपुत्रकान् ॥ आश्रमेवासयामाससैन्या
न्समहामतिः ॥ ४१ ॥ योगमायाप्रभावेणह्यन्नानिससृजेपुनः ॥ भोजयामासप्रेम्णाचसैन्यान्वैसमुनीश्वरः ॥ ४२ ॥ उषुस्तेसरयूतीरेरात्रौ
सर्वेजनास्तदा ॥ योगिनाऋष्यशृंगेणह्याज्ञताःशतशोऽगनाः ॥ ४३ ॥ सिषेविरेतदासैन्यान्वातस्पर्शानुरूपतः ॥ एवंनिवसतांतेषांगता
रात्रिर्महामुने ॥ ४४ ॥ स्नानंकृत्वाचतेसर्वेविविशुर्मुनिसन्निधौ ॥ सूतउवाच ॥ तदाविदूषकःकश्चिद्वाक्यमूचेमुनीश्वरम् ॥ ४५ ॥
॥ विदूषकउवाच ॥ ॥ भगवन्योगिनांश्रेष्ठपृच्छामस्त्वांमहामते ॥ एताश्चाप्सरसोदिव्याभगिन्योमातरस्तव ॥ ४६ ॥ एताभिर्लालि
तानूनंवयंसुप्तानदीतटे ॥ उचितापरिचर्यानोभगिनीभिर्मुनीश्वर ॥ ४७ ॥ इत्येवंब्रुवतस्तस्यजहसूरघुपुंगवाः ॥ मुनीश्वरोपिहासज्ञःएव
मेवमुवाचह ॥ ४८ ॥ श्रीरामउवाच ॥ आज्ञांचक्रियतांस्वामिन्नयोध्यागमनंप्रति ॥ मनोमेत्वरतेनाथपित्रोर्दर्शनकांक्षया ॥४९॥ ऋष्य
शृंगउवाच ॥ गम्यतांरघुशार्दूलममकार्यंविधायच ॥ ग्राहोहिवर्ततेरामसरय्वाविमलेजले ॥ ५० ॥ यदाकदाभीषयतेनरान्निमज्जनागतान्

॥ श्रीरामउवाच ॥ हंतव्योहिमयानाथग्राहोजनभयंकरः ॥ ५१ ॥ इत्युक्तारघुनाथश्चजगामसरयूतटे ॥ सशरंचापमादायनिषसादन
दीतटे ॥ ५२ ॥ एतस्मिन्नंतरेग्राहःश्रुत्वाकोलाहलंनृणाम् ॥ उत्ततारनदीतोयाद्ग्रहणार्थंनिमज्जताम् ॥ ५३ ॥ रामोपिवाणमाकृष्य
जघानतस्यमूर्द्धनि ॥ वाणस्पर्शनमात्रेणदेहंत्यक्त्वाऽपिवंगतः ॥ ५४ ॥ मुनीश्वरस्तमालिंग्यविससर्जरघूत्तमम् ॥ गजमारुह्यरामस्तु
भ्रातरस्तुतथागजान् ॥ ५५ ॥ सखायस्तुतथाह्यश्वान्जग्मुस्तेतुप्रहर्षिताः ॥ शकटेषुसमारोप्यहतान्वन्याननेकशः ॥ ५६ ॥
जगामसेनासावेगादृष्यश्रृंगंप्रणम्यच ॥ दुंदुभीनांप्रणादस्तुश्रूयतेवहुशोजनैः ॥ ५७ ॥ अयोध्यानिकटेप्रापकुमाराणांचसाचमूः ॥
नर्तयंतितथाह्यश्वान्भटानानाप्रकारतः ॥५८॥ अयोध्यावासिनः सर्वेढक्कानादंप्रश्रुत्यच ॥ निर्जग्मुःसहसासर्वेयुववृद्धकुमारकाः ॥५९॥
हर्म्याण्यारुरुहुर्नार्य्यःकुमाराणांदिदृक्षया ॥ उत्कंठितोवभूवाथराजादशरथोमुदा ॥ ६० ॥ सचचालासनात्तूर्णमुत्थायखलुतिष्ठति ॥
कौशल्याद्यामातरस्ताःपुत्रदर्शनकांक्षया ॥ ६१ ॥ प्रासादंरुरुहुःसर्वाःसखिभिःपरिवारिताः ॥ एतस्मिन्नंतरेरामोगजारूढोनिजांपुरीम्
॥६२॥ विवेशभ्रातृभिःसाकंनंदयन्सुहृदःसखीन् ॥ युवत्योराममालोक्यनेत्रैर्हृदिनिवेश्यच ॥६३॥ परिषस्वजिरेगाढंब्रह्मानंदपरिप्लुताः ॥
क्षणंयुगशतमिवयासांयेनाविनाभवत् ॥ ६४ ॥ अनिमेषैर्नेत्रपुटैःपपुस्तामुखपंकजम् ॥ अतसीपुष्पसंकाशंरामस्यवदनांवुजम् ॥ ६५ ॥
श्रमबिंदुसमायुक्तंकुंडलाभ्यांविराजितम् ॥ अलकैर्धूसरैर्युक्तंवक्रैर्वदनछादकैः ॥ ६६ ॥ स्वर्णपट्टिकयायुक्तमुष्णीषंरत्नगुच्छकम् ॥
कंचुकंचमहादिव्यंस्वर्णसूत्रेणशीलितम् ॥ ६७ ॥ रत्नकंठिकयायुक्तंकंठंचातिमनोहरम् ॥ गजासनेविराजंतंददृशुःपुरुषाःस्त्रियः ॥६८॥
पंचमेदिवसेप्राप्तंरामंप्राणसमंप्रियम् ॥ राजमार्गेणगच्छंतंपितुर्दर्शनकांक्षया ॥ ६९ ॥ राजद्वारंसमागत्यभ्रातृभिःसखिभिःसह ॥ अवतीर्य

गजाद्रामोगुहहस्तावलंबितः॥७०॥ भ्रातृभिःसखिभिःसार्द्धंननामचरणौपितुः ॥ आलिलिंगतदाराजापुत्रान्सर्वान्महामतिः ॥७१॥ पुत्रद
र्शनजोमोदःशरीरेनममौतदा ॥ आनंदजाश्रुरूपेणनेत्राभ्यांचवहिर्ययौ ॥ ७२ ॥ रामाज्ञप्तस्तदाराजागुहः परमधार्मिकः ॥ दर्शयामासव
न्यान्वैहतायेचकुमारकैः ॥ ७३ ॥ दृष्ट्वादृष्ट्वाचवन्यान्सप्रशशंसपुनः पुनः ॥ साधुसाध्वितिसर्वान्सददौदेयंप्रहार्षितः ॥ ७४ ॥ गुहायख
ड्गंरम्यंचप्रायच्छत्कनकत्सरुम् ॥ रामोऽपिभ्रातृभिःसार्द्धंमातुरंतःपुरंययौ ॥ ७५ ॥ मातरस्तुसमालिंग्यरामादीन्राजपुत्रकान् ॥ नीरा
जनंततश्चक्रुर्ममृजुर्वदनंमुहुः ॥ ७६ ॥ ददुर्दानंद्विजातिभ्यःपुत्रमंगलहेतवे ॥ एवंलीलानरवपूरमयन्सुतरांजनान् ॥ ७७ ॥ स्थापयामा
सकीर्तिंचययालोकस्तरिष्यति ॥ इदंहिचरितंपुण्यममंगलनिवारणम् ॥७८॥ पठेद्वाशृणुयाद्वापिसयातिपरमांगतिम् ॥ यइदंशृणुयान्नि
त्यंयामंक्षणमनन्यधीः ॥ ७९ ॥ रामभक्तिर्भवेत्तस्यरामस्तस्मैप्रसीदति ॥ देवताःपितरस्तस्यप्रसीदंतिनसंशयः ॥८०॥ धन्यंयशस्यमा
रोग्यंवंशमायुर्विवर्द्धनम् ॥ शत्रुक्षयकरंशीघ्रंग्रहशांतिकरंतथा ॥ ८१ ॥ यःपठेच्छृणुयाद्वापिभुक्तिंमुक्तिंचविंदति ॥ वाचकायप्रदातव्यंवस्त्र
रत्नहिरण्यकम् ॥ ८२ ॥ वाचकेपरितुष्टेचसंतुष्टाःसंतिदेवताः ॥ इदंचातिरहस्यंतुगोप्यंपरमदुर्लभम् ॥ ८३ ॥ श्रीरामकृपयालभ्यंनान्य
थाश्रवणंभवेत् ॥ किंमयावहुधावाच्यंसर्वपुण्यफलंत्विदम् ॥८४॥ व्यासप्रसादाज्जानामिश्रीरामकृपयातथा॥८५॥इतःपरंमहारम्यंविवाहच
रितंशुभम् ॥ वर्णयामिमहापुण्यंश्रोतॄणामघमोचनम् ॥ ८६ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेएकोनपंचाशत्तमोध्यायः ॥४९॥
समाप्तमिदंसत्योपाख्यानपूर्वार्द्धम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥

श्रीगणेशाय नमः ॥ अथसत्योपाख्यानोत्तरार्द्धंप्रारभ्यते ॥ शौनकउवाच ॥ सूतसूतमहाबुद्धेश्रीरामचरितंवद ॥ यस्यश्रवणमात्रेण
भवेन्मुक्तोनसंशयः ॥ १ ॥ उत्पन्नाचकथंसीतासाक्षाल्लक्ष्मीःक्षितेस्तलात् ॥ कारणंवदमेविद्वन्रामेणोद्वाहितापुनः ॥ २ ॥ सूतउवा
च ॥ एकदासुखमासीनःश्रियासार्द्धंश्रियःपातिः ॥ वैकुण्ठेपरमेदिव्येपार्षदैःपरिसेविते ॥ ३ ॥ वसन्तियत्रपुरुषा नित्यमुक्ताहरेःपदे ॥
यत्रनैःश्रेयसन्नामवनंकामदुघंनृणाम् ॥ ४ ॥ परिक्रामन्तिवैकुंठंदेवास्तुयुवतीगणैः ॥ गायन्तिचतुरोवेदान्नृत्यन्तिचहरेःपुरः ॥ ५ ॥
नमायाप्रभुतातत्रजनानांभ्रमकारिणी ॥ इंदिराप्रभुतातत्ररजःसत्वतमांसिनो ॥ ६ ॥ यत्रलक्ष्मीर्महाराज्ञीजगताम्पालनेक्षमा ॥ लसन्ति
मणयोयत्र मुक्तानांदामभिःसह ॥ ७ ॥ पार्षदास्तत्रशोभन्तेविष्वक्सेनादयःसदा ॥ नृत्यन्त्यप्सरसोयत्रउर्वश्याद्याःसहस्रशः ॥ ८ ॥
ऋतुराजश्चगंधर्वस्तत्रगायतिनित्यशः ॥ तस्यकन्यामहारूपानाम्नावासन्तिकामता ॥ ९ ॥ सानृत्यतिहरेरग्रेलक्ष्म्याचसहतिष्ठति ॥
नृत्यगानप्रवीणाचभावेअभिनयेतथा ॥ १० ॥ भावःकटाक्षाहेतुश्चशृंगारेबीजमादिमम् ॥ प्रेममानःप्रणयश्चस्नेहोरागश्चसस्मृतः ॥ ११॥
अनुरागःसएवस्यादंकुरःपल्लवस्तथा ॥ कलिकाकुसुमानीतिफलंभोगःसएवच ॥ १२ ॥ कटाक्षस्त्रिविधःश्यामःश्वेतःश्यामस्तथासितः ॥
हासोपिविविधस्तत्रमिथोयूनोः शशिप्रभः १३॥आंगिकोवाचकस्तद्वदाहार्यः सात्विकोपरः॥चतुर्द्धाभिनयश्चेतिविष्णोरग्रेचनाटके॥१४॥
इतिकर्तव्यतातस्याद्विविधाकथितापुनः॥चित्तवृत्यर्पिकाकाचिद्वाह्यवस्त्वनुकारिणी ॥१५॥भेदद्वयंचप्रोचुर्हिलोकधर्माःसनातनाः॥नाट्य
धर्माअपिद्वेधाभेदेनोक्ताहिब्रह्मणा ॥ १६ ॥ जवत्वंस्थिरतारेखाः भ्रमरीदृष्टिरश्रमः ॥प्रीतिर्मेधाचयागीतिः पात्रप्राणादशस्मृताः ॥ १७ ॥
आंगिकाभिनयैरेवभावानेवव्यनक्तयत् ॥ तन्नृत्यंमार्गशब्देनवाल्मीकिर्मुनिरब्रवीत् ॥ १८ ॥ गात्रविक्षेपमात्रंतुसर्वाभिनयवर्जितम् ॥

आंगिकोक्तप्रकारेणनृत्यंब्रूतेसमीरजः ॥ १९ ॥ अथशून्यं सुरेखाकंनृत्यंताललयाश्रितम् ॥शिरोनेत्रकरादीनामंगानांमेलनेसति ॥ २० ॥
कायस्थितिर्मनोनेत्रहारीरेखाप्रकीर्तिता ॥ संप्रदायानुशरणंमुदात्हृदयरंजिनी ॥ २१ ॥ यत्रमध्येनसंचेतनैरंतर्येणवर्तनम् ॥ प्रमाणरेखया
युक्तंमंदंनृत्यंप्रचक्षते॥ २२ ॥ यतोहस्तस्ततोदृष्टिर्यतोदृष्टिस्ततोमनः ॥ यतोमनः स्ततोभावोयतोभावस्ततोरसः ॥ २३ ॥ अंगेनालंब
येद्गीतंहस्तेनार्थंप्रदर्शयेत् ॥ चक्षुर्भ्यांभावमित्याहुः पादाभ्यांतालनिर्णयः ॥ २४॥ भानवीमैनवीचान्यागजलीलातरंगिणी ॥ हंसीमृगीखं
जरीटीगतयः सप्तचत्विमाः ॥२५॥ लावोहंसोमयूरश्चहयः कुंजरएवच ॥ तित्तिरः कुक्कुटोमीनोगतयोहास्यहेतवः ॥ २६॥ इत्यादिनृत्यभे
दैश्चतोषयामाससाहरिम् ॥ वासंतिकास्वकीयैश्चहावभावैर्मनोरमैः ॥२७॥हावभावंचतस्यास्तुस्मरन्प्राहजनार्दनः ॥वरंब्रूहिप्रवीणेत्वंमत्तः
प्राप्स्यसिनिश्चितम् ॥२८॥ इत्थंसाप्रेरिताबालाहरिणालोकधारिणा ॥ लज्जितासाब्रवीन्नैवलक्ष्म्यास्तुंडंचपश्यती ॥२९॥ तस्याहार्दंतुवि
ज्ञायलक्ष्मीः प्रोवाचसादरम् ॥ भविष्यतिपतिस्तेपिकृष्णोयद्वापरेवत ॥३०॥ त्वंचापिलक्ष्मणाराज्ञीअष्टौमध्येभविष्यसि ॥ सूतउवाच ॥
लक्ष्मीपादौप्रणम्याथप्रोवाचवरवर्णिनी ॥ ३१ ॥ ॥ वासंतिकोवाच ॥ ॥ कथंत्रेतायुगेचाहंभविष्यामिहरेः प्रिया ॥ रामचंद्रावतारेहंका
भविष्यामिशोभने ॥ ३२ ॥ ॥ श्रीरमोवाच ॥ ॥त्रेतायुगेचश्रीरामो भविष्यतिपतिर्मम ॥ एकपत्नीव्रतंतस्यनविहन्येत्कथंचन॥ ३३ ॥
तत्राहंचभविष्यामिनाम्नासीताचभूतलात् ॥ तत्रत्वंसुभगानाम्नासखीत्वंमेप्रयास्यसि ॥ ३४ ॥ आवयोः किंकरत्वंचब्रह्मप्राप्तिकरंतव
॥ भूमेर्भारावतारायरावणस्यवधायच ॥ ३५ ॥ भूलोकंचव्रजिष्यामित्वयासहसुलोचने ॥ अयंममपतिः श्रीमान्शेषेणचदरेणच ॥ ३६ ॥
सुदर्शनेनायोध्यायांगृहेदशरथस्यच ॥ रामलक्ष्मणशत्रुघ्नभरताइतिसंज्ञया ॥ ३७ ॥ अहंकन्याभविष्यामिजनकस्यमहीतलात् ॥

शेषशक्तिरुर्मिलाचजनकस्यचह्यौरसी ॥ ३८ ॥ पत्नीहिपांचजन्यस्यमांडवीतिप्रकीर्तिता ॥ श्रुतकीर्तिस्तुचक्रस्यकुशध्वजसुतेइमे
॥ ३९ ॥ उत्पत्स्यैतेमहाभागेविमलेप्रस्तुतेजनैः ॥ भविष्यंतिचमेसख्योअणिमाद्याविभूतयः ॥ ४० ॥ वाक्यंनिशम्यलक्ष्म्यास्तु
सुसुदेवासंतिकातदा ॥ वैकुंठवासिनःसर्वैसहवासोमनोदधुः ॥ ४१ ॥ देवलोकंपरित्यज्यह्ययोध्यांजन्मलेभिरे ॥ अणिमाद्याःश्रियः
सख्योमिथिलायामजीजनत् ॥ ४२ ॥ इतितेकथितंब्रह्मन्जानक्याजन्मकारणम् ॥ अतः परंमहादिव्यंश्रूयतांजन्मसंभवम् ॥ ४३ ॥
इति श्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेप्रथमोध्यायः ॥ १ ॥ ॥ सूतउवाच ॥ ॥ एकदाजनकोराजामिथिलामावसन्पु
रीम् ॥ यज्ञार्थमानसंचक्रेसमाहूयचब्राह्मणान् ॥ १ ॥ पार्थिवांश्चसमाहूयतथाजानपदान्जनान् ॥ ऋषीन्सर्वान्समाहूयसंभारान्स्थाप्यभू
रिशः ॥ २ ॥ लांगलंचविधायाथशातकौंभमयंशुभम् ॥ शतानंदंपुरस्कृत्यसमारेभेक्रतूत्तमम् ॥ ३ ॥ मासोत्तमेमहापुण्येवैशाखेमाध
वप्रिये ॥ कुजवारेशुल्कपक्षेनवमीपुष्यसंयुता ॥ ४ ॥ पृथिव्याःपूजनंकृत्वाजनकस्तुनरेश्वरः ॥ हलेनकर्षणंचक्रेसर्वेषांपश्यतांसताम् ॥
॥ ५ ॥ लांगलस्यमुखाग्रात्तुरमाकन्याविनिर्गता ॥ भित्वाक्षितितलंसद्यःसीतानाम्नाबभूवसा ॥ ६ ॥ ततोदुंदुभयोनेदुःखात्पेतुःपुष्प
वृष्टयः ॥ गंधर्वाश्चजगुःसर्वैननृतुश्चाप्सरोगणाः ॥ ७ ॥ संबोध्यजनकंवाणीदेवैःप्रोक्ताब्रवीदिदम् ॥ पालयतांचत्वयाराजन्कन्येयंकन्यका
यथा ॥ ८ ॥ भविष्यतिपरंश्रेयोह्यनयाकन्ययातव ॥ सुमोदजनकोराजाश्रुत्वावाक्यंगिरेरितम् ॥ ९ ॥ नारदस्तुतदागत्याशिक्षयामासभू
पतिम् ॥ तदातुजनकोराजानिजांकेसमरोहयत् ॥ १० ॥ पत्न्यैसमर्पयामाससुनेत्रायैचभूपतिः ॥ तयासंरक्षितासीताववृधेपितृवेश्मनि ॥
॥ ११ ॥ शुक्लपक्षेयथानित्यंद्विजराजस्यकौमुदी ॥ ततःकन्यासुनेत्रायामूर्मिलानामनामतः ॥१२॥ कुशध्वजस्ययापत्नीकन्याद्वयमजी

जनत् ॥ श्रुतकीर्तिंमांडवींचध्यानात्पापप्रणाशिनीम् ॥ १३ ॥ वासंतिकापुराप्रोक्ताजनकस्यचमंत्रिणः ॥ सुभगानामविख्यातासीतायाः
सासखीमता ॥ १४ ॥ सिद्धयोष्टादशप्रोक्तानिधयश्चनवस्मृताः ॥ सखीभावंप्रयाताश्चजानक्याजनकालये ॥ १५ ॥ यदाप्रभृतिसीतातु
जाताजनकवेश्मनि ॥ लोकपालनिभाःसर्वेधनधान्यचयैर्बहु ॥१६॥ ववृधेजानकीनित्यंह्यात्मनस्तुसखीगणैः॥चिक्रीडेपरमांक्रीडांजगदा
नंददायिनी ॥१७॥ षड्वर्षापिचवैदेहीरूपातिशयतांययौ ॥ श्यामेवलक्ष्यतेपौरैरवरोधैश्चमातृभिः ॥ १८ ॥ शृंगारेहावभावेचदेहवृद्धौतथै
वच ॥ विजहारस्वयंसीतासखीभिः परिवारिता ॥ १९ ॥ यंयंविलोकतेसीतास्वभावात्पुरुषंस्त्रियम् ॥ अमज्जतानंदह्रदेस्वभाग्यंमन्यते
धिकम् ॥ २० ॥ स्नानार्थंसाकदाचित्तुसरोयातिसखीगणैः ॥ तदाविलोक्यतेलोकैरात्मजेवाहिधर्मतः ॥ २१ ॥ कदाचिद्वाटिकां
यातिपूजामादायभूयसीम् ॥ पूजनार्थंचगौर्य्यास्तुनियुक्तामातृणांगणैः ॥ २२ ॥ कृत्वाकदाचित्पाकंतुब्राह्मणान्भोजयत्स्वयम् ॥
ब्राह्मणैर्वेदतत्वज्ञैर्ज्ञायतेचरमात्वियम् ॥ २३ ॥ अस्याःकटाक्षमात्रेणसंपदापूर्यतेजगत् ॥ क्वचिद्गायतिसासीतात्वेकान्तेचसखी
गणैः ॥ २४ ॥ क्वचिद्वादयतेवीणांमृदंगसुषिरादिकान् ॥ आलिकानांक्वचिन्नृत्यंपश्यंतीप्रेमतत्परा ॥ २५ ॥ मालांपुष्पमयींकृत्वादेवता
भ्यःप्रयच्छति ॥ सुनेत्राजननीतस्याःदृष्ट्वाचातुर्य्यमीदृशम् ॥ २६ ॥ रूपेणाप्रतिमांदृष्ट्वातथाश्यामायतींसताम् ॥ विवाहार्थं
मनश्चक्रेजानक्याःकिलचैकदा ॥ २७ ॥ ॥ सूतउवाच ॥ ॥ सीरध्वजंमहाराजमेकांतेहरितत्परम् ॥ दृष्ट्वाराज्ञीसुनेत्राचप्रीत्योवाच
महीपतिम् ॥ २८ ॥ ॥ सुनेत्रोवाच ॥ ॥ इयंकन्यामहीपालसीतानाम्नीमहाशुभा ॥ विवाहःक्रियतामस्याःपतिनासदृशेनवै ॥२९॥ज्ञाती
नांचमहानंदोविवाहेनभविष्यति ॥ ॥ जनकउवाच ॥ ॥ चिंताममास्तिभोभद्रेसीता परिणयेशुभे ॥ ३० ॥ सातुभाग्येनकन्यायाःपरिपू

र्णाभविष्यति ॥ इतिविश्राव्यस्वांपत्नींनिनायनिजमंदिरम् ॥ ३१ ॥ स्वयंकुशासनेराजासुष्वापनिशिचिंतया ॥ स्वप्नेसाक्षान्महादेवोरा
जानंवाक्यमब्रवीत् ॥ ३२ ॥ ॥ श्रीरुद्रउवाच ॥ ॥ श्रूयतांवचनंराजन्कन्यापरिणयेमम ॥ धनुर्मदीयंतेगेहेपूजितंतवपूर्वजैः ॥३३॥ तस्य
प्रतिज्ञात्वयाकार्याभंगायतोलनायच ॥ तोलयित्वाचयोभंगंकारयेद्धनुषोमम ॥ ३४ ॥ तस्मैदेयात्वयाकन्याह्येवमुक्त्वागतोहरः ॥ जन
कस्तुतदाराजाश्रावयामासस्वंपणम् ॥३५॥ पृथिव्यांसर्वलोकेषुनरदेवेषुभूरिशः ॥ तच्छुत्वाभूभुजःसर्वेह्याजग्मुर्मिथिलांपुरीम् ॥ धनुष
स्तोलनार्थंहितथाभंगायचाययुः ॥ ३६ ॥ मिथिलायाःपरिसरेध्वजिन्यासहतेस्थिताः ॥ धनुषोरंगभूमिस्तुनिर्मितावहुरत्नकैः ॥ ३७ ॥
तत्पिनाकस्थलंरम्यंमानितंसर्वराजभिः ॥ ब्राह्मणाःक्षत्रियास्तत्रवैश्याःशूद्रास्तथास्त्रियः ॥ ३८॥ प्राकृताश्चतथासर्वेनागरादेशवासिनः॥
मुनयश्चतथासर्वेशिष्यैःपरिवृताःस्थिताः ॥ ३९ ॥ जनकस्यतथापत्न्योनानावेषधराःस्थिताः ॥ मागधाश्च तथासर्वेसूतावैतालिकास्तथा
॥४०॥अन्येचनागराःसर्वेपौराजानपदास्तथा॥समास्थितायथान्यायंसर्वेकौतूहलान्विताः ॥४१॥ सचिवो रावणस्यैवप्रहस्तोनामनामतः॥
सोप्यास्थितःसभामध्येरावणेनैवप्रेषितः ॥ ४२ ॥ बलेःपुत्रोमहावीर्योबाणोनाममहामतिः ॥ सहस्रबाहुर्वेगेनयःशिवंसमतोषयत्॥ ४३ ॥
सोप्यास्थितःसभामध्येकन्याहेतोर्महामनाः ॥ सुधन्वानामभूपालःशांकास्यायाःपराक्रमी ॥ ४४ ॥ शिवभक्तिरतःशश्वन्महत्या
सेनयायुतः ॥ आस्थितःसुसभामध्येकन्यार्थंसोपिदुर्मतिः ॥ ४५ ॥ एवंजातेसमाजेतुवाद्येषुप्रणदत्सुच ॥ कन्यासमागतातत्रसी
तानाम्नीसखीगणैः ॥ ४६ ॥ तत्रशृंगारचेष्टाश्चराज्ञांजाताःसहस्रशः ॥ कश्चित्करंकिरीटेचकलयामासभूपतिः ॥ ४७ ॥ पद्मंचभ्राम
यामासपाणिनाचनराधिपः ॥ ददारपद्मपत्राणिनखैःकिंचित्स्मयन्निव ॥ ४८ ॥ कश्चिद्वार्ताप्रलापंचसख्याचक्रेमहामनाः ॥ कश्चिन्मु

क्तामयींमालांगणयामासपाणिना ॥ ४९ ॥ केनचित्कारणेनैवजहासकोपिभूपतिः ॥ खड्गंकोशाद्विकृष्यैवदर्शयामासचापरान् ॥५०॥
तांबूलभक्षणंकश्चिच्चकारचमहामनाः ॥ हस्तमुत्क्षिप्यवेगेनरत्नमुद्राविदीपितम् ॥ ५१ ॥ बभाषेचसभामध्येदर्शयन्पाणिभूषणम् ॥ जहा
सकश्चिद्भूपालोदंतान्संदर्शयन्निव ॥ ५२ ॥ श्मश्रूणिपरिमार्ज्याथपाणिनास्वेननिर्भयः ॥ एवंबभूवशृंगाराजनानांरंगवासिनाम् ॥ ५३ ॥
आजगामतदासीताधनुषोनिकटेमुदा ॥ पूजयित्वापिनाकंतुजगाममातृसन्निधौ ॥ ॥ ५४ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्त
रार्द्धेद्वितीयोऽध्यायः ॥ २ ॥ ॥ सूतउवाच ॥ मागधास्तुपणंसर्वंजनकस्यचभूपतीन् ॥ श्रावयामासुस्तेसर्वेबाहुमुत्क्षिप्यसंसदि ॥ १ ॥
तच्छ्रुत्वाभूभुजःसर्वेव्यायामंचक्रिरेमुदा ॥ कश्चित्परिकरंबध्वाधनुषोनिकटंययौ ॥ २ ॥ सर्पाकारंचतद्दृष्ट्वावेपमानोबभूवह ॥ उपवि
श्यासनेसोथजगादान्यान्महीपतीन् ॥ ३ ॥ धनुर्मिषेणसर्पोयमस्मान्दंष्टानसंशयः ॥ पुनरन्योपिभूपालोजगामधनुषोंतिके ॥ ४ ॥ अं
धीबभूवसस्तत्रचापंनैवतुदृदृशे ॥ हस्तौप्रसार्यपप्रच्छक्वास्तिचापंहिभोजनाः ॥ ५ ॥ जहसुश्चेतितेलोकाज्ञाताशक्तिस्तवोत्तमा ॥ धनु
षोदर्शनंनास्तितोलनेभंजनेकिमु ॥ ६ ॥ इत्येवंहसितः सर्वैर्विविशेस्वस्यचासने ॥ अन्यःकश्चनभूपालश्चचालचनिजासनात् ॥ ७ ॥
सिंहगत्यामहागर्वात्श्मश्रूणिस्वकरेदधत् ॥ तमेवदर्शयामासचापःसैंहींतनुंनिजाम् ॥ ८ ॥ सिंहंदृष्ट्वापपातान्यविविशेचासनंभयात् ॥
किंकिंकिमितिलोकैस्तुपृष्टःप्रोवाचभूपतीन् ॥ ९ ॥ सिंहोयंचापरूपेणजनकेननिवेशितः ॥ धूर्तोयंजनकोराजाघातयिष्यतिभूपतीन् ॥
॥ १० ॥ पुनरन्यःसमुत्थायपिनाकनिकटंययौ ॥ पस्पर्शपाणिनातंचददाहतस्यतेजसा ॥ ११ ॥ पुनरन्यःसमुत्थायधनुषोनिकटंययौ ॥
मध्येजग्राहचापस्यपाणिभ्यांचबलेनवै ॥ १२ ॥ नचकंपेधनुस्तत्रलोममात्रंचसंसदि ॥ पुनरन्यःसमुत्थायधनुषोनिकटंययौ ॥ १३ ॥

शिवरूपंतुददृशेचापंचंडीपतेस्तदा ॥ ऋजुप्रणामंकृत्वाचविवेशचनिजासने ॥१४॥ एकदासंविदंकृत्वाभूपानांशतमुत्तमम् ॥ उत्थापया
माशुरव्यग्रानचचालधनुस्तदा ॥ १५ ॥ प्रोचुस्तदानींतेसर्वेमेरुःकिंचापरूपधृक् ॥ बलेःपुत्रस्तदाबाणश्चचालचनिजासनात् ॥ १६ ॥
धनुषस्तोलनार्थंहितथाभंगायवीर्य्यवान् ॥ ददर्शशिवरूपंचननामचपुनः पुनः ॥ १७ ॥ उवाचचसभामध्येशिवरूपंधनुस्त्विदम् ॥
शम्यतेचमयागेहंनास्तिमेयोग्यतात्विह ॥१८॥ तदाप्राहप्रहस्तस्तुसर्वेषांशृण्वतामिदम् ॥ प्रहस्तउवाच ॥ रेमूढशृणुमेवाक्यंहितार्थंतेव
दाम्यहम् ॥ १९ ॥ रावणोनामपौलस्त्योराक्षसेंद्रोमहावली ॥ सलंकाधिपतिः श्रीमान्साक्षाद्वैश्रवणानुजः ॥ २० ॥ तस्मैदेहिनिजां
कन्यांश्रेयस्तेऽतिभविष्यति ॥ रावणस्तुमहावीर्योदेवदानवदर्पहा ॥ २१ ॥ तुभ्यंदास्यतिजित्वातुपृथ्वींसागरमेखलाम् ॥ जनकउवाच
यदिसोपिसमागत्यधनुषस्तोलनंवलात् ॥ २२ ॥ कुर्य्यात्तस्मैप्रदास्यामिनान्यथाप्रददाम्यहम् ॥ प्रहस्तउवाच ॥ चंद्रमौलेरयंचापस्त
स्मान्नेच्छतिरावणः ॥ २३ ॥ कदाचिदन्यदेवस्यतत्क्षणाच्चूर्णतांनयेत् ॥ इत्युक्त्वासहसोत्थायगमनायमनोदधे ॥ २४ ॥ हरिष्यत्येव
नोराजाकन्यामेतांसुनिश्चितः ॥ जनकउवाच ॥ हरणंयदिकन्यायारावणस्तुकरिष्यति ॥ २५ ॥ नाशायदशकंठस्यसीताचैवभवि
ष्यति ॥ सूतउवाच ॥ एवंब्रुवाणंजनकंराक्षसस्तमभर्त्सयत् ॥ २६ ॥ जगामदुर्मनाः सोथलंकामेवचपापधीः ॥ राक्षसेतुगतेलंकांसुधन्वा
नामभूपतिः ॥ उवाचजनकंवाक्यंश्रूयतांभोजनेश्वर ॥ २७ ॥ सुधन्वोवाच ॥ मह्यंचदीयतांकन्याधनुषासहभूमिप ॥ नवैदास्यसिचेद्राज
न्लुंठयिष्यामितेपुरीम् ॥ २८ ॥ निर्गच्छरंगभूमेस्त्वंपतिष्यसिमहीतले ॥ ताडितोममदासैश्चपादैर्मुष्टिभिरेवच ॥ २९ ॥ एवंकोलाहले
जातेजनकस्यचपक्षिणः ॥ खड्गचर्मधराःसर्वेतस्थुर्जनकसन्निधौ ॥३०॥विवेकिनस्तुयेभूपाःद्वौनिवार्ययतस्ततः ॥ रंगभूमेर्विनिर्गम्यसुधन्वा

क्रोधमूर्छितः ॥ ३१ ॥ रुरोधमिथिलांदर्पात्सेनयासहभूमिपैः ॥ युयुधेजनकोराजापरैःसार्द्धंमहामनाः ॥ ३२ ॥ बहवश्चहतास्तत्ररणे
तस्मिंश्चमानवाः ॥ बभूवदुर्गमाभूमिर्मृतकैश्चभयावहा ॥ ३३ ॥ युध्यतामेवतेषांतुगतः संवत्सरोद्विज ॥ निरुद्धानगरीतैश्चतृणधान्यंनचा
पतेत् ॥ ३४ ॥ ततश्चदुःखितोराजासस्मारचसदाशिवं॥शिवेनप्रेषितासेनादेवानांचबलीयसाम् ॥ ३५ ॥ देवसेनांतदाप्राप्ययुयुधेजनको
नृपः ॥ सुधन्वानिहतोयुद्धेजनकेनमहात्मना ॥ ३६ ॥ अन्येपलायिताः सर्वैंलुंठमानास्तदाजनैः ॥ शांकास्यानगरीतस्यभ्रातरंचकुश
ध्वजम् ॥ ३७ ॥ विदधेतत्रराजानमिक्षुमत्यास्तटेनृपः ॥ पुनर्यज्ञंसमारेभेजनकस्तुमहामतिः ॥३८॥ इतिश्रीसत्योपाख्यानेसूतशौनकसं
वादेउत्तरार्द्धेतृतीयोऽध्यायः ॥३॥ सूतउवाच ॥ महेश्वरेणचाज्ञप्तोविश्वामित्रोमहामुनिः ॥ सिद्धाश्रमाच्चचालाशुरामार्थंमुनिपुंगवः ॥१ ॥
साकेतनगरंदृष्ट्वामुमुदेकौशिकोमुनिः ॥ राजद्वारंसमागत्यददर्शमहतीश्रियम् ॥२॥ द्वारपालाःसमागत्यप्रणेमुःशिरसामुनिम् ॥ मुनिनाप्रे
षिताःसर्वैराजानंचविजिज्ञपुः ॥३॥ राजादशरथःश्रुत्वावसिष्ठादिभिरन्वितः ॥ पूजामादायमहतींनिर्जगामसभासदैः ॥४॥ आगत्यचरणौ
राजाजगृहेशिरसामुनेः ॥ आलिंगितस्तुमुनिनावसिष्ठेनमहामुनिः ॥५॥राजानंचसमालिंग्यविवेशांतःपुरंवशी ॥ पाद्यमर्घ्यंददौराजावार्ता
चक्रुःपरस्परम् ॥६॥ श्रीदशरथउवाच ॥ आज्ञाप्यतांचभूदेवआज्ञाप्योहंतवानघ॥तन्मयाक्रियतेसर्वंप्राणैरर्थैःसुतैस्तव ॥७॥ सूतउवाच॥
वाक्यंश्रुत्वानरेशस्यजहर्षमुनिपुंगवः ॥ प्रत्युवाचमहर्षिस्तुकौशिकोमुनिसत्तमः ॥ ८ ॥ विश्वामित्रउवाच ॥ दीयतांराजशार्दूलरामचंद्र
स्त्वयाहिमे॥त्वयोक्तंचसुतैःप्राणैरर्थैःकार्यंचसाधये ॥९॥दशरथउवाच॥ यथेष्टंगृह्यतांपुत्रःकार्यार्थमात्मनस्त्वया ॥१०॥ याचनांचरघूणां
हिव्यर्थाजातानकस्यचित् ॥ कृच्छ्राल्लब्धोमयापुत्रस्तुभ्यंदास्यामिभोमुने ॥ ११ ॥ वसिष्ठंचसमामंत्र्यकौशल्यांचपहामनाः ॥ राममाहू

यविधिवल्लक्ष्मणेनसमन्वितम् ॥ १२ ॥ मुनयेचार्पयामासह्याशिषासहभूमिपः ॥ पुष्पवृष्टिर्महत्यासीदयोध्यायाश्चवीथिषु ॥ १३ ॥ पितु
राज्ञाकरौतौचपादयोःपेततुस्तदा ॥ प्रवत्स्यतोश्चमूर्द्धानौन्यपतन्नश्रुबिंदवः ॥ १४ ॥ नेत्राभ्यांराजराजस्यचचालमुनिसत्तमः ॥ लक्ष्म
णानुचरंरामंपरिगृह्यमुदान्वितः ॥ १५ ॥ आशिषंयुयुजेराजावाहिनींनचरक्षिणः ॥ आशीरेवक्षमातत्रवाहिन्यानप्रयोजनम् ॥ १६ ॥
पितुर्नेत्रभवैस्तोयैरीषदार्द्रशिखंडिकौ ॥ गच्छंतौधन्विनौतौचमुनेःपश्चात्पदातिनौ ॥ १७ ॥ पौराणांनेत्रजालैश्चमार्गेचकृततोरणौ ॥ रेज
तुःसुतरांतौचगाधेर्मार्गानुसारिणौ ॥ १८ ॥ मातृपादान्प्रणम्याथजग्मतुःपुरुषर्षभौ ॥ भास्करेणयथामासौशोभेतेचैत्रमाधवौ ॥ १९ ॥
तयोस्तुगमनंतत्रहस्तिभ्यामप्यशोभत ॥ अयोध्यायाविनिर्गत्यविद्यांप्रादान्महामुनिः ॥ २० ॥ बलांचातिबलांचैवनमम्लातेयथापथि॥
विद्ययोश्चप्रभावेणमातुःक्रोडगताविव ॥ २१ ॥ इतिहासैस्तुपूर्वेषांमुनिप्रोक्तैश्चसानुजः ॥ शृण्वन्मार्गंयथांनैवलेभातेवाहनैर्यथा ॥ २२ ॥
वायुःसिषेवेतौबालौपंकजानांसुगंधिभिः ॥ पतत्रिणश्चस्वैर्नादैर्जलदाःस्वस्यच्छायया॥२३॥ पश्यन्ग्रामान्ययौरामोमुनिनालक्ष्मणेनच॥
ग्रामीणवध्वस्तंरामंपश्यंतिस्मसुलोचनैः ॥ २४ ॥ द्वारेनिर्गत्यसहसाह्यानंदंलेभिरेबहु ॥ पिबतोवारुणींगोष्टेगोपान्पश्यतिराघवः॥२५ ॥
वल्गतौमुहुरुत्थायग्राम्यान्पानेनमोहितान् ॥ तेषांपल्योरमानाथंलोचनैःकर्णविस्तृतैः ॥२६॥ हावभावंनजानंत्योग्रामिण्योराघवंपपुः॥
जानुनाचोभयेनैवपात्रींगृह्यचगोपकान् ॥ २७ ॥ गावश्चदुहतोवत्सान्लिहतीश्चददर्शच ॥ तान्दृष्ट्वाथतदारामोमनसाचविचारयन्॥२८॥
अहमेवंकरिष्यामिद्वापरेकृष्णजन्मनि ॥ कैदारिकाणांपत्न्यस्तुशुकान्द्रावयितुंगताः ॥ २९ ॥ तावन्मृगांश्चखादंतिव्रीहींस्तत्रपुनर्द्रुताः॥
सहासंमुनिनाभ्रात्रागोपिकाश्चविलोकयत्॥३० ॥ ललाटेबिभ्रतीपुष्पंबंधूकस्यचगोपिका ॥ मृगान्द्रावयितुंयाताभुजमुद्यम्यवेगतः॥३१॥

कुचंपिदधतीपीनमंचलेनचसस्मिता ॥ गीतमाकर्ण्यचान्यासांनखादंतिमृगाःकृषीम् ॥ ३२ ॥इत्थंविलोकयन्रामोमुनेःपश्चाद्ययौमुदा ॥
स्त्रियस्तुराघवंदृष्ट्वाकंदर्पसदृशाकृतिम् ॥ ३३ ॥ अतसीपुष्पसंकाशंव्यूढोरस्कंमहाभुजम् ॥ धनुर्बाणधरंवीरंनानाभूषणभूषितम् ॥३४॥
सात्विकंभावमापन्नामन्मथेनप्रपीडिताः ॥ तरुणंपुरुषंदृष्ट्वायोनिर्द्रवतियोषिताम् ॥ ३५ ॥ विधायतर्जनीमोष्ठेपृच्छंतिस्मस्त्रियोमुदा॥
सत्यंब्रूहिमुनेमह्यंकस्यचेमौकुमारकौ ॥ ३६ ॥ शिष्यौवातवपुत्रौवामातानयोस्तुकुत्रचित् ॥ ययापुत्रौत्वयिन्यस्तौकठिनासातुनि
श्चयम् ॥ ३७ ॥ विश्वामित्रउवाच ॥ राज्ञोदशरथस्यैतौतनयौरामलक्ष्मणौ ॥ रक्षणार्थंमयाह्येतौक्रतोश्चखलुयाचितौ ॥ ३८ ॥ सिद्धा
श्रमंचनीयेतेपित्रादत्तौचप्रेमतः ॥ सूतउवाच ॥ एतस्मिन्नंतरेगोपावनात्प्राप्ताअनेकशः ॥ ३९ ॥ ततोवीक्ष्यमुदानेमुर्दण्डवत्पृथिवीं
गताः ॥ ऊचुःपरस्परंतेतुविश्वामित्रंपुनःपुनः ॥ ४० ॥ अद्यनः सफलंजन्मअद्यनःसफलंतपः ॥ यन्नोगृहंभवान्प्राप्तः पुत्राभ्यांतुनृपस्यच
॥ ४१ ॥ स्तुत्वैवंपूजयामासुर्मुनिराजकुमारकौ ॥ सिद्धाश्रमंप्रजग्मुस्तेउषित्वातत्रशर्वरीम् ॥४२॥ मार्गेवनंमहाभीमंदृष्ट्वाराजकुमारकौ॥
अधिज्यौचक्रतुश्चापौह्याज्ञयाकौशिकस्यच ॥ ४३ ॥ तयोर्निनादंतच्छ्रुत्वाचाजगामाथताडका ॥ वृद्धाभयानकासाचभाद्रमासक्षपाछविः
॥ ४४ ॥ कपालकुंडलासाचवकपंक्तिर्यथाघने ॥ वेपयंतीमहावृक्षान्प्रेतचीराणिविभ्रती ॥ ४५ ॥ महानादंप्रकुर्वाणामहाधूलिंचवर्षती ॥
अभ्यभावितथारामोधूल्याचपवनोत्थया ॥ ४६ ॥ उद्यम्यभुजयष्टिंचआपतंतींचताडकाम् ॥ पुरुषांत्रमालयायुक्तांनजघानेतिकिंवधूः ॥
॥ ४७ ॥ कौशिकेनसमाज्ञप्तःशरंधनुरुपाददे॥ घृणयासतदाबाणंमुमोचताडकोरसि ॥४८॥ विदीर्णहृदयासातुपपातधरणीतले॥महानादं
प्रकुर्वाणादेहंत्यक्त्वाचस्वर्गता ॥ ४९ ॥ कौशिकस्तुसमाहूयरामंराजीवलोचनम् ॥ मंत्रान्समर्पयामासतस्याघातेनतोषितः ॥ ५० ॥

सूर्यकांतोयथासूर्यात्तथामंत्रेणद्योतितः ॥ कामाश्रमंपुनः प्राप्यकामरूपोबभूवह ॥ ५१ ॥ सिद्धाश्रमंसमागत्यसिद्ध्यर्थंकौशिकस्यच ॥
उत्कंठितोबभूवात्रवामनोह्यभवत्पुरा ॥ ५२ ॥ दीक्षितंकौशिकंतत्रधनुर्बाणधरौचतौ ॥ ररक्षतुः सावधानौमुनेर्यज्ञंमहोजसौ ॥ ५३ ॥
सूर्यचंद्रौयथालोकमंधेनतमसावृतम् ॥ ततस्तुषष्ठेदिवसेआजग्मूराक्षसादिवि ॥ ५४ ॥ रुधिरंववृषुः सर्वेरामऊर्द्ध्वंविलोकयन् ॥ निषंगा
द्बाणमुद्धृत्यमारीचंदुद्रुवेप्रभुः ॥ ५५ ॥ पक्षिणोभोजयामाससुबाहोःपललेनवै ॥ अन्येषुनप्रवृत्तस्तुकिमेभिर्लघुराक्षसैः ॥ ५६ ॥ राजिले
षुयथाताक्ष्र्यौंनप्रवर्तेतगर्वतः ॥ विक्रमंतुतयोर्दृष्ट्वासांयुगीनंमहामुनिः ॥ ५७ ॥ ऋषयःपूजयांचक्रुर्यज्ञमूर्तिंप्रचक्रमुः ॥ मुनिंप्रणम्यतौ
वीरौमुमुदातेकुमारकौ ॥ ५८ ॥ आशिषायोजयामासमुनिःपाणितलेनवै ॥ ५९ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेचतु
र्थोऽध्यायः ॥ ४ ॥ सूतउवाच ॥ तस्मिन्कालेनरेशस्यजनकस्यमहात्मनः ॥ प्रतिहारोमहाबुद्धिराजगाममहामतिः ॥ १ ॥ प्रणम्य
चमुनीन्सर्वान्यज्ञार्थंचविजिज्ञपन् ॥ दूतउवाच ॥ जनकस्यगृहेराज्ञोधनुर्यज्ञोहिवर्तते ॥ २ ॥ भवद्भिर्गम्यतांशीघ्रंदयाचयदिक्रि
यते ॥ सूतउवाच॥तच्छ्रुत्वामुनयः सर्वेकुमाराभ्यांसमन्विताः ॥ ३ ॥ जग्मुश्चमिथिलांतूर्णंविश्वामित्रपुरःसराः ॥ कथाप्रसंगंशृण्वंतोदे
शनद्युपवर्णनम् ॥ ४ ॥ आपतुः परमंहर्षंमुनिभ्योरामलक्ष्मणौ ॥ तैर्विवेशसवसतिंगौतमाश्रममंडले ॥ ५ ॥ अगाहीद्दीर्घंतपसो
मिथिलायाःसमीपतः ॥ यत्राहल्यामहेंद्रस्यक्षणंपत्नीबभूवह ॥ ६ ॥ तेनाहल्याशिलाजाताशापाद्वैगौतमस्यच ॥ तत्सर्वंकथ
यामासरामायपरमात्मने ॥ ७ ॥ तच्छ्रुत्वारामचंद्रस्तुशिलांद्रष्टुंप्रचक्रमे ॥ रामपादतलोद्भूताधूलिःप्राप्ताशिलोपरि ॥ ८ ॥
तस्याःस्पर्शनमात्रेणमुक्तशापाबभूवह ॥ सुंदरीसाभवत्क्षिप्रंरामचंद्रप्रसादतः ॥ ९ ॥ संस्तूयरघुनाथंसापत्यासहगतापुनः ॥ विश्वा

मित्रोपिरामेणलक्ष्मणेनतपस्विभिः ॥ १० ॥ जगाममिथिलांवेगात्धनुर्यज्ञदिदृक्षया ॥ मिथिलोपवनेतत्रराजानोवहवःस्थिता ॥ ११ ॥
एकांतेसर्वसुखदेउवासमुनिभिःसह ॥ राजदूतोमुनिंपृष्ट्वागमनायमनोदधे ॥ १२ ॥ गत्वाप्रणम्यराजानंमुनिंप्राप्तंन्यवेदयत् ॥ ॥सूतउ
वाच ॥ ॥ तच्छुत्वाजनकोराजामंत्रिभिर्ब्राह्मणैःसह ॥ १३ ॥ अन्यैश्चनागरैश्चैवनानामंगलपाणिभिः ॥ दर्शनार्थंसमायातःकौशिकस्य
मुनेर्मुदा ॥ १४ ॥ आगत्यप्रणतिंचक्रेनागरैर्मंत्रिभिःसह ॥ १५ ॥ कौशिकोपिमहायोगीउत्थायपरमासनात् ॥ वाहूप्रासार्यराजानंपरिष्वं
गंचकारह ॥१६॥ शतानंदोपिचागत्यप्रणाममकरोत्तदा॥आलिलिंगयथान्यायंशतानंदंतुकौशिकः ॥१७॥ निवेशयामासमुदासंमुखेस्वे
महामनाः ॥ शतानंदंचराजानंतथाचान्यान्समंत्रिणः ॥१८॥ विश्वामित्रउवाच ॥कुशलंवर्ततेराजन्सप्तस्वंगेषुतेधुना ॥ येषांकुशलतोराजा
वर्ततेचसदासुखी ॥ १९ ॥ राजोवाच ॥ सर्वत्रकुशलंनाथत्वयितिष्ठतिरक्षके ॥ येषांकुशलकामोसिकुशलंतेषुनित्यशः ॥२०॥ त्वंवैकुश
लमूर्तिश्चतपसादुष्करेणवै ॥ सूतउवाच ॥ एतस्मिन्नंतरेराजाददर्शरामलक्ष्मणौ ॥ २१ ॥ तथासर्वेजनाश्चैवददृशुस्तौकुमारकौ ॥ अत
सीपुष्पसंकाशंरामंराजीवलोचनम् ॥ २२ ॥ कांचनाभंद्वितीयंचप्रफुल्लपंकजेक्षणम् ॥ कोटिमन्मथलावण्यंदधतौनिजविग्रहे ॥२३॥ धनु
र्वाणधरौतौचखड्गौचकनकच्छवी ॥ दधतौमस्तकेदिव्यांकांचनींपट्टिकांशुभाम् ॥ २४ ॥ स्तवकंमणिमुक्तानांपुष्पाणांचतथाविधम् ॥
वेष्टनंचमहादिव्यंदधतौकर्णकुंडले ॥ २५ ॥ नानारत्नमयेदिव्येह्यलकैश्चाविभूषिते ॥ तिलकंधारयंतौचरोचनाकुंकुमोद्भवम् ॥ तथाचूर्णं
हरिद्रायाःदधानौपरमाद्भुतौ ॥ २६ ॥ मुखंमनोहरंरम्यंदंतपंक्तिविराजितम् ॥ नासांशुकस्यचंचुंचलज्जयंतींमुहुर्मुहुः ॥ २७ ॥ कंठेचकं
ठिकांरम्यांनानारत्नसमुद्भवाम् ॥ केयूरैश्चमहादिव्यैर्बाहवः शोभितास्तथा ॥ २८ ॥ वलयैश्चतथादिव्यैर्नानारत्नविनिर्मितैः ॥ मुद्राभीरत्न

युक्ताभिरंगुलीयैर्विराजितौ ॥ २९ ॥ दधतौकंचुकंपीतंकट्यांवैपीतमंशुकम् ॥ प्रावरंचतथापीतंदधतौमौक्तिकींस्रजम् ॥ ३० ॥ इषुधीच
महादिव्यौनानाबाणैः प्रपूरितैः ॥ उपानहौगूढपादौपादभूषणभूषितौ ॥ ३१ ॥ द्योतयंतौदिशःसर्वास्तेजसाभास्करोपमौ ॥ ह्लादिकौ
चंद्रमःकांत्याकामेनसदृशावुभौ ॥३२॥ बुद्ध्याबृहस्पतेस्तुल्यौक्षमयापृथिवीसमौ॥ मोहयंतौजनान्‌सर्वान्‌स्मितेनचनिजान्परान् ॥३३॥
तथारूपौचतौदृष्ट्वापप्रच्छजनकोमुनिम् ॥ जनकउवाच ॥ भगवन्‌योगिनांश्रेष्ठकस्यचेमौकुमारकौ ॥ ३४ ॥ मोहयंतौजनान्‌सर्वान्
कांत्यारूपेणमांतथा ॥ श्रीविश्वामित्रउवाच ॥ शृणुराजन्‌यथातथ्यंतवस्नेहाद्ब्रवीम्यहम् ॥ ३५ ॥ इमौकुमारौराज्ञस्तुअयोध्याधिपतेः
किल ॥ यज्ञसंरक्षणार्थायमयानीतौनिजाश्रमे ॥ ३६ ॥ दर्शनेसुकुमारौचबलेनबलवत्तरौ ॥ मारीचंभ्रामयामासबाणेनैकेनराघवः ॥ ३७॥
सुबाहोर्निधनंचक्रेद्वितीयेनतुपत्रिणा॥ अन्यान्‌जघानसौमित्रिरेवंयज्ञस्यरक्षकौ॥३८॥अतसीपुष्पसंकाशोनाम्नारामस्तुकथ्यते ॥ द्वितीयः
कांचनाकारोलक्ष्मणश्चेतिभण्यते ॥ ३९ ॥ रामस्यपादरजसापूतागौतमगेहिनी ॥ इदानींतेधनुर्यज्ञंसमायातोरघूत्तमः ॥ ४० ॥ वाण्या
लंचमहाराजबलंवक्तुंनशक्यते ॥ समूहेभूभृतांरंगेचापेव्यक्तंभविष्यति ॥ ४१ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेपंचमो
ऽध्यायः ॥५॥ सूतउवाच ॥ उक्त्वैवंचसभामध्येविररामम‌हामुनिः ॥ जनकस्तुमहाराजःशृण्वन्‌लेभेपरांमुदम् ॥ १ ॥ मुनिनाप्रेरितौतौ
चराघवौरामलक्ष्मणौ ॥ प्रणामंचक्रतुःकिंचिन्नतेनशिरसास्थितौ ॥ २ ॥ जनकायमहाराज्ञेज्ञात्वात्मकुलसंभवम् ॥ जनकस्तुसमुत्थाय
ज्ञात्वादशरथात्मजौ ॥ ३ ॥ राजाधिराजतनयौपरिरेभेमुदान्वितः ॥ घ्राणंचकारमूर्द्धस्तुरामलक्ष्मणयोस्तदा ॥ ४ ॥ संस्नापयामासत
दाजलैर्नेत्राब्जसंभवैः ॥ रामंदक्षिणजंघायांवामायांचैवलक्ष्मणम् ॥ ५ ॥ निवेश्यवक्रंपाणिभ्यांममार्जजनकोनृपः ॥ जनकउवाच ॥

अद्यमेसफलंजन्मअद्यमेसफलंतपः ॥ ६ ॥ अद्यमेसफलंराज्यंपुरीयंमिथिलापुनः ॥ अद्यमेसफलोयज्ञःसुप्रभातानिशामम ॥ ७ ॥ यस्मादिमौसमायातौराजराजकुमारकौ ॥ निमिस्तुपूर्वजोस्माकमिक्ष्वाकुतनयोभवत् ॥ ८ ॥ इक्ष्वाकुकुलजन्मत्वादिक्ष्वाकुसदृशाविमौ ॥ कुलेतस्मिन्निमौजातौपूजनीयौनसंशयः ॥ ९ साधुसाध्वितितेसर्वेशशंसुश्चजनानृपम् ॥ रामरूपंसमालोक्यमुमोहजनकोनृपः ॥ १० ॥ बुद्ध्याविचारयामासहृदयेराजसत्तमः ॥ अयंनारायणोदेवःलक्ष्मीकांतोनसंशयः ॥११॥ लक्ष्मीसीतासमुत्पन्नायज्ञभूमौहलाग्रतः ॥ अयंनारायणोदेवः स्वयंसीतांवरिष्यति ॥ १२ ॥ धनुषस्यप्रतिज्ञेयंनिरर्थाचकृतामया ॥ कन्याचास्मैप्रदेयामेपणस्तिष्ठतुयातुवा ॥ १३ ॥ अयंनारायणोदेवोधनुर्भंगंकरिष्यति ॥ तावन्नेत्रसुखंसर्वेलभंतुकिलनागराः ॥ १४ ॥ गृहेममनरानार्यः पश्यंतुरामलक्ष्मणौ ॥ एवंविचार्यराजातुहृदयेमुनिमब्रवीत् ॥ १५ ॥ गम्यतांमद्गृहेस्वामिन्कुमाराभ्यांतपोधनैः ॥ १६ ॥ इक्ष्वाकूणांगृहंचैतत्वयंतेषांचकिंकराः ॥ भुज्यतांरमतांतत्रकृपांकृत्वाममोपरि ॥ १७ ॥ ॥ सूतउवाच ॥ ॥ इतिश्रुत्वानरेशस्यवाक्यंमैथिलभूपतेः ॥ उवाचकौशिकोधीमान्जनकंप्रतिमहामनाः ॥ १८ ॥ कौशिकउवाच ॥ सम्यक्त्व्यवसिताबुद्धिस्तवराजर्षिसत्तम ॥ १९ ॥ एवमेवमहाराजयथात्वंचब्रवीषिमाम् ॥ परंतुसावकाशोत्रमहर्षीणांरमेन्मनः ॥ २० ॥ अत्रैवैषांस्थितिश्चास्तुमहानंदेनसंयुता ॥ आगमिष्यामितेगेहंभोजनार्थंनराधिप ॥ २१ ॥ मुनिभिश्चकुमाराभ्यांप्रातःकालेतवाज्ञया ॥ गम्यतांचमहीपालसंध्याकालोहिवर्तते ॥ २२ ॥ वयंचात्रकरिष्यामःउपस्थानंरवेरपि ॥ सूतउवाच ॥ विश्वामित्रेणचाज्ञप्तोजगामजनकोगृहम् ॥ २३ ॥ हृदिध्यायन्रामरूपंलक्ष्मणस्ययथामतिः ॥ जानकींचप्रदास्यामिरामायरूपशालिने॥२४॥ उर्मिलांलक्ष्मणायैवकन्यकांरुचिरान नाम्॥

धनुषोभञ्जनश्चैवरामएवकरिष्यति ॥ २५ ॥ मनोरथोमदीयस्तुपूर्णोंभून्नात्रसंशयः ॥ मिथिलायांजनाःसर्वेंआनन्दंलेभिरेमुहुः ॥ २६ ॥
राजारामायकन्यांतुलक्ष्मणायप्रदास्यति ॥ हर्षेणज्ञायतेस्माभिर्जनकस्यमहात्मनः ॥ २७ ॥ एवंवदन्तिरात्रौचनरनार्यःपरस्परम् ॥
आनन्देनैवसर्वेषांसारात्रिर्व्यत्यवर्तत ॥ २८ ॥ सूतउवाच ॥ राजाजनकउत्थायप्रातःकालेऽन्नपाचकान् ॥ आज्ञापयामाससमुदाक्रियतां
व्यञ्जनानिच ॥ २९ ॥ भोजनार्थंमुनीनांतुतयोश्चराजपुत्रयोः ॥ सुनेत्रांनामराज्ञींचप्रोवाचनृपतिर्मुदा ॥ ३० ॥ सख्यासार्द्धं
चभवतीराजपुत्रौविलोकय ॥ संमानश्चापिकर्तव्योमाननीयौचतौमतौ ॥ ३१ ॥ तथास्त्वितिचसाराज्ञीप्रत्युवाचनृपंतदा ॥
मिथिलायास्तदाराजास्नात्वाहुतहुताशनः ॥ ३२ ॥ दूतंतुप्रेषयामासविश्वामित्रस्यसन्निधौ ॥ सदूतोमुनेसान्निध्यंगत्वावचनमब्रवीत्
॥ ३३ ॥ शिरस्यंजलिमाधायययाचेदंमुनीश्वरम् ॥ गम्यतांभगवन्शीघ्रंजनकस्यगृहेत्वया ॥ ३४ ॥ भोजनार्थेकुमाराभ्यां
मुनिभिश्चमहामते ॥ ३५ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेषष्ठोऽध्यायः ॥ ६ ॥ सूतउवाच ॥ दूतवाक्यं
निशम्याथसर्वैस्तैर्मुनिपुंगवः ॥ जगामराजभवनंनरनारीभिरावृतम् ॥ १ ॥ श्रीरामागमनंश्रुत्वानरनार्योमुदंययुः ॥ रामंनिरी
क्ष्यतेसर्वेनेत्रैरनिमिषैर्जनाः ॥ २ ॥ मिथिलाधिपतिर्धन्यइत्यूचुश्चपरस्परम् ॥ जनकोद्वारमागम्यववंदेमुनिपुंगवम् ॥ ३ ॥ मुनींश्चापि
प्रणम्याथविनयावनतस्तथा ॥ रामोपिलक्ष्मणश्चापिविदेहंमिथिलाधिपम् ॥४॥ दक्षिणंकरमुत्थायमून्द्धिकृत्वाप्रणेमतुः ॥ जग्राहराजातौ
बालौकराभ्यांकरयोर्मुदा ॥ ५ ॥ अंतःपुरंनिवेश्याथब्राह्मणान्वेदपारगान्॥ पूजायांनाविदत्कृत्यंप्रेमवेगपरिप्लुतः ॥ ६ ॥ सिंहासनेमहा
दिव्येनानारत्नविचित्रिते ॥ निवेश्यबालकौतत्रतयोर्मध्येचगाधिजम्॥७॥पीठानिमुनिमुख्येभ्योदत्वाभुविस्वयंस्थितः ॥ पाद्यमर्घ्यंस्वयंच

क्रेनीराजनविधिंतथा ॥ ८ मालांपुष्पमयींदत्वाचन्दनेनविलिप्यच॥सुनेत्रानामसाराज्ञीसीतयासखिभिः सह ॥ ९॥ प्रणनामसुनेःपादौवि
नयेनजिह्वीयती ॥ अयोध्याधिपतेःपुत्रौकोमलांगौमहाबलौ ॥ १० ॥ कोटिसूर्यप्रकाशौचपश्यंतीरामलक्ष्मणौ ॥ पुनःपुनश्चपश्यन्तीह
र्षंप्रापमहासती ॥ ११ ॥ सुनेत्राशुभनेत्राभ्यांरामंमुहुर्निरीक्षते ॥ इंद्रनीलमणिश्यामंकोमलाकृतिमव्ययम् ॥ १२ ॥ अचिन्त्यवैभवंरामं
कृपावार्द्धिंरमापतिम् ॥ कट्यांपीतंचकौशेयंदधतंघनविग्रहे ॥ १३ ॥ विद्युल्लतोपमंदिव्यंकाञ्च्याबद्धंसुरत्नया ॥ आजानुबाहुंश्रीरामंसुमु
खपंकजेक्षणम् ॥ १४ ॥ पूर्णचंद्राननंरामंकर्णांतदीर्घलोचनम् ॥ घटितेनमणीनांतुकिरीटेनविराजितम् ॥ १५ ॥ तस्यकांत्याचतुर्दिक्षु
व्यादायाशुमनोहरम् ॥ विभ्रंतंतुमनोजस्यदिव्यचापाकृतीभ्रुवौ ॥ १६ ॥ इन्द्रोरर्द्धसमंरुच्यंललाटंसुमनोहरम् ॥ ऊर्द्ध्वपुंड्रेणशुभ्रेणभाल
देशेविराजितम् ॥ १७ ॥ नासयाशुकनासायाःकर्षन्तंचमहाछविम् ॥ अलकैश्चमहानीलैःशोभयंतंमुखांबुजम् ॥ १८ ॥ कुंडलेनसुदी
प्तेनमकराकारशोभिना ॥ राजंतंतुकपोलेनहरिन्मणिनिभेनच ॥ १९ ॥ मुखामोदेनकर्षंतंषडंघ्रींश्चयतस्ततः ॥ बिंबाधरेणरक्तेनदंतपं
क्त्याविराजितम् ॥ २० ॥ त्रिरेखयाशोभमानंकंबुकंठंमनोहरम् ॥ निगूढजत्रुपीनांसंकंठेकौस्तुभधारिणम् ॥ २१ ॥ श्रीवत्समुरसाल
क्ष्मविभ्राणंवामपार्श्वकम् ॥ भुजद्वयेनशोभंतमंगदैर्वलयैरपि ॥ २२ ॥ महत्यावैजयंत्याचहारेणापिसुशोभितम् ॥ उन्नतेनसुयुग्मेनकु
क्षिणाचापिमञ्जुलम् ॥ २३ ॥ नाभ्यागंभीरयारम्यंविधेर्यत्रनिकेतनम् ॥ उत्तरीयेणराजंतंसंध्यामेघनिभेनच ॥ २४ ॥ कट्यासुसूक्ष्मयार
म्यंनितंबद्वयशोभया ॥ कदलीस्तंभरुच्येनश्यामेनोरुद्वयेनच ॥ २५ ॥ जानुयुग्मेनजंघेनरमयालालितेनच ॥ मुक्तिप्रदेनदासेभ्यः
पादपद्मेनशोभितम् ॥ २६ ॥ मणिनिर्मितकोदंडंदधतंवामपाणिना ॥ दक्षिणेचतथाबाणंस्वर्णपुंखंमनोहरम् ॥२७॥ तूणद्वयेनशोभंतंपृ

ष्ठभागेमनोहरम् ॥ कस्तूरीगंधयुक्तेनचंदनेनविलेपितम् ॥ २८ ॥ कोटिमन्मथलावण्यंसुंदरंरघुनंदनम् ॥ लक्ष्मणेनापिगौरेणभूषितेनत
थैवच ॥ २९ ॥ सेव्यमानंसदातेन शेषभूतेनबन्धुना ॥ परात्परंपरंब्रह्मशरण्यंसर्वदेहिनाम् ॥ ३० ॥ शरणागतभूतानांपालनायसदो
द्यतम् ॥ सौशील्यादिगुणैर्युक्तंवात्सल्यगुणसागरम् ॥ ३१ ॥ कोटिकंदर्पलावण्यंस्मितपूर्वाभिभाषिणम् ॥ एवंपश्यंतिताः सर्वाजनक
स्यपुरस्त्रियः ॥ ३२ ॥ रामंचलक्ष्मणंचैवजामातृसुखवांछया ॥ मुहू रामंनिरीक्षंत्यः सस्मिताश्चवराननाः ॥ ३३ ॥ हावभावंचकुर्वंत्यो
राममोहायसत्वरम् ॥ काचिद्रामंनिरीक्ष्यैवध्यायमानमुखांबुजम् ॥ ३४ ॥ मुहुर्मुहुश्चनिश्वासंमुंचमानाइतस्ततः ॥ काचिद्देवंध्यायमाना
मंदंदृष्ट्वामनोरमम् ॥ ३५ ॥ कामाकृतिःकुमारोयंसुंदरीयंशुभानना ॥ एकांतसुखशय्यायांकृत्वावक्षःस्थलेत्वमुम् ॥ ३६ ॥ ओष्ठपानं
करिष्यामिपाणिभ्यांगृह्यमध्यमम् ॥ काचिद्रामंचपश्यंतीकर्णेचक्रेस्वकांगुलीम् ॥ ३७ ॥ पयोधरंपीनतमंदर्शयंतीमुहुर्मुहुः ॥ मोहिता
रामरूपेणकाचिदेवंचकारसा ॥ अलकांश्चनिरीक्षंतीनासामुक्तांपुनःपुनः ॥ ३८ ॥ कंचुकंदर्शयामासस्वर्णसूत्रेणशीलितम् ॥ मुक्तामालां
पुनःकंठेबाहुंचोत्थाप्यसंमुखे ॥ ३९ ॥ लक्ष्मणस्यमुखंकाचिदापिवद्धक्रचक्षुषा ॥ उन्मुच्यनीवींविभ्रंतीपाणिनालक्ष्मणाग्रतः ॥ ४० ॥
नूपुरंचवबंधाथपादयोरत्नशीलितम् ॥ करादर्शंनिरीक्षंतीदंतपंक्तिसुरंजिताम् ॥ ४१ ॥ काचित्कमलपुष्पंचपाटयामासपाणिना ॥ काचि
दालिंगतीवालंकुचेसंमेल्यपाणिना ॥ ४२ ॥ एवंपश्यंतिताःसर्वाः किशोरौरामलक्ष्मणौ ॥ सुनेत्राजानकीचैवनिरीक्ष्यमुदिताभवत् ॥ ४३ ॥
विश्वामित्रादाशिषश्चलब्ध्वाजग्मुश्चमंदिरम् ॥ भोजयामासराजापिबालकौतौमुनिनापि ॥ ४४ ॥ तांबूलंचददौचाथसर्वेभ्योराजसत्तमः ॥
स्वंनिवेशंजगामाथकुमाराभ्यांमहामुनिः ॥ ४५ ॥ रथ्यासुराजमार्गेषुदृष्ट्वारामंमुदंययुः ॥ नरानार्यश्चशतशस्तथावृद्धकुमारकाः ॥
॥ ४६ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेसप्तमोऽध्यायः ॥ ७ ॥ शौनकउवाच ॥ विवाहंरामचंद्रस्यसूतब्रूहिमहामते ॥

धनुर्भंगंतथाशीघ्रंश्रवणान्मुक्तिदंनृणाम् ॥ १ ॥ सूतउवाच ॥ ततोराजाविदेहानांदिवसेऽन्येसमाह्वयत् ॥ कार्तांतिकान्वंदिनश्चवचनंचे
दमब्रवीत् ॥ २ ॥ राज्ञांचशिविरान्गत्वाब्रुवध्वंवचनान्मम ॥ रंगभूमिंचगच्छध्वंयत्रास्तिधनुरुत्तमम् ॥ ३ ॥ सूतउवाच ॥ तेगत्वा
राजशिविरानब्रुवन्वचनंशुभम् ॥ गम्यतांराजशार्दूलायत्रचापोऽयासिष्ठति ॥ ४ ॥ तच्छ्रुत्वाभूभुजः सर्वेनागराश्चजनाश्चये ॥ स्त्रियोबाला
स्तथावृद्धाःप्राप्तास्तेचापसन्निधौ ॥ ५ ॥ विश्वामित्रोपिमुनिभिःकुमाराभ्यांतथैवच ॥ मिथिलाधिपतीराजायथायोग्यंन्यवेशयत् ॥ ६ ॥
आगतेषुजनेष्वेवमुवाचवचनंनृपः ॥ श्रूयतांमेपणोलोकाधनुर्भंगंकरोतियः ॥ ७ ॥ तस्मैसीतांप्रदास्यामिअद्यैवविधिनाध्रुवम्॥सूतउवाच
इतिश्रुत्वाजनाःसर्वेप्रत्यूचुर्नृपतिंतदा ॥ ८ ॥ दृष्टःपराक्रमोराजन्सर्वेषांभूभुजांनृप ॥ अधुनादर्शनीयंहिरामस्यचबलंदृढम् ॥ ९ ॥
तेषांतुवचनंश्रुत्वाविश्वामित्रोमहामुनिः ॥ उवाचरामंसुप्रीतश्चापभंगंकुरुष्वभो ॥ १०॥ इतिश्रुत्वातदारामःप्रणम्यमुनिपुंगवम् ॥चापस्य
निकटंगत्वादृष्ट्वावाक्यमथाब्रवीत् ॥ ११ ॥ इत्युक्त्वावामहस्तेनगृहीत्वाधनुरुत्तमम् ॥ सुप्तनागमिवोत्थाप्ययेनदक्षोहतः पुरा ॥ १२ ॥
ज्यांसमारोप्यसदसिसर्वेषांपश्यतांनृणाम् ॥ बभंजमध्यतःशीघ्रंपुष्पचापमिवस्मरः ॥ १३ ॥ तस्यशब्दोमहानासीत्बधिरास्तेनवैजनाः
केचिन्निपतिताभूमौकेचिच्चैवचकंपिरे ॥ १४ ॥ दिविदुंदुभयोनेदुःपुष्पवृष्टिस्तदाभवत् ॥ तदावाद्यान्यवाद्यंतजनकस्यमहात्मनः॥१५॥
तदाजयजयारावोजनैरुक्तोबभूवह ॥ राज्ञाचाकारितासीतावरमालांप्रगृह्यसा ॥ १६ ॥ राजहंसीवगच्छंतीदीपयंतीचभूषणैः ॥ आगत्यरा
मकंठेतुहस्ताभ्यांनिदधेस्रजम् ॥ १७ ॥ नागराश्चतदासर्वेबालवृद्धास्तथास्त्रियः ॥ ज्ञात्वाविवाहंरामस्यसीतायाश्चमुदंययुः ॥ १८॥
बभूवुर्मलिनादुष्टा राजानोयेसमागतः ॥ उत्थिताआसनेभ्यस्तुगतादेशान्सुखात्स्वकान् ॥ १९ ॥ राजापिजनकोहृष्टःमुनिनारामल

क्ष्मणौ॥गजमारोप्यनगरंप्रविवेशस्वसेनया॥२०॥ददौदानंद्विजातिभ्योदीनांधकृपणेषुच॥गुणिभ्योयाचकेभ्यश्चयेचतत्रसमागताः ॥२१॥
गृहमागत्यराजातुरामचंद्रंमनोहरम् ॥ गजादवतारयद्भूमौदत्वाहस्तंस्वयंनृपः ॥ २२ ॥ विवेशयामासगृहेसत्कारैःपूजितोवसत् ॥तद्दिनंत
स्यरात्रिश्चमहानंदेनसागता ॥ २३ ॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेअष्टमोऽध्यायः ॥ ८ ॥ ॥ ॥ सूतउवाच ॥ ॥
ततःप्रभातेविमलेसूर्येचविमलोदिते ॥ मिथिलाधिपतीराजाकृतपूर्वाह्निकक्रियः ॥ १ ॥ विश्वामित्रमुपागम्यवचनंचेदमब्रवीत् ॥ दूता
गच्छंतुभोस्वामिन्वृद्धंदशरथंनृपम् ॥ २ ॥ आनयंतुतवादेशात्सेनयासहभोमुने ॥ ॥ ॥ विश्वामित्रउवाच ॥ ॥ एवंभवतुभोराजन्ग
च्छंतुत्वरितंहयैः ॥ ३ ॥ आगमिष्यतिराजातुपुत्राभ्यांसैनिकैःसह ॥ तदैवप्रेषितादूता जनकेनमहात्मना ॥ ४ ॥ अहोभिःकतिभिस्ते
वैसाकेतनगरंययुः ॥ राजद्वारंसमासाद्यनानारत्नविचित्रितम् ॥ ५ ॥ अश्वारोहैर्गजारोहैःशिविकाभिःसमावृतम् ॥ पत्तिभिर्नरनारीभिस्तो
रणंविविशुश्चराः ॥ ६ ॥ द्वारपालैःसमागम्यवृत्तमूचुर्यथातथम् ॥ तेदूताराजभवनंद्वारपालैःप्रवेशिताः ॥ ७ ॥ प्रणम्यराजशार्दूलमूचु
श्चवचनंत्विदम् ॥ ॥ दूताऊचुः ॥ ॥ भद्रंतेस्तुमहाराजश्रूयतांवचनंहिनः ॥ ८ ॥ जनकश्चशतानंदोकुशलंकुशलेत्वयि ॥ अब्रवीच्चम
हाराजविश्वामित्रेणसंयुतः ॥ ९ ॥ रामलक्ष्मणयोःक्षेमंश्रूयतांनृपसत्तम ॥ संदेशंजनकस्येदंमहाराजनिशामय ॥ १० ॥ जनकउवाच ॥
पूर्वंप्रतिज्ञाविदितावीर्यशुल्काममात्मजा ॥ गृहीतातवपुत्रेणरामेणचापत्रोटनात् ॥ ११ ॥ भवानागत्यशीघ्रंतुसेनयाबहुशोभया ॥ पुत्रा
भ्यांऋषिभिःसार्द्धंगृण्हीष्वतनयांमम ॥ १२ ॥ इत्येतत्प्रियसंदेशंजनकस्यमहात्मनः ॥ ॥ सूतउवाच ॥ ॥ दूतवाक्यंतदाश्रुत्वासुमु
देनृपसत्तमः ॥ १३ ॥ वसिष्ठंचसमाहूयमंत्रिणस्त्वब्रवीन्नृपः ॥ ॥ राजोवाच ॥ ॥ एतेदूताःसमायाताजनकस्यपुराद्गुरो ॥ १४ ॥ सीत

यारामचंद्रस्यविवाहंप्रवदंत्यमी ॥ रोचतेभवतामेतत्यदियोग्यंभवेदिह ॥ १५ ॥ ॥ सूतउवाच ॥ ॥ इतिश्रुत्वानरेशस्यवाक्यंपरम
शोभनम् ॥ ऊचुश्चमंत्रिणःसर्वेवसिष्ठश्चमहामुनिः ॥ १६ ॥ विवाहःक्रियतांराजन्जनकेषुनसंशयः ॥ तच्छ्रुत्वाराजशार्दूलःसेनाध्यक्षानु
वाचह ॥ १७ ॥ मातंगाश्चापिसंयंतांरथाःपदातयस्तथा ॥ अश्ववारास्तथाचोष्ट्राःशिविकाःशतशस्तथा ॥ १८ ॥ आनकाःपटहाढक्काभे
र्यश्चापितथैवहि ॥ काहलामर्दलाःसर्वेमुरजावाद्यतांजनैः ॥ १९ ॥ मंगलानिप्रकुर्वंतुगणनाथंप्रपूज्यवै ॥ इत्युक्काराजशार्दूलोविवे
शभवनंशुभम् ॥ २० ॥ कौसल्यांचसुमित्रांचकैकेयींचतथापराः ॥ प्रहसन्नृपातिःप्राहश्रूयतांवचनंमम ॥ २१ ॥ जनकस्यपुरेरा
ज्ञोवर्तैतेरामलक्ष्मणौ ॥ विश्वामित्रेणमुनिनाधनुर्भंगंचराघवः ॥ २२॥ चकारभूभृतांरामःपश्यतांसर्वदेहिनाम् ॥ जनकेनसुतादत्तासीता
परमसुन्दरी ॥ २३ ॥ तेनाहूतोविवाहार्थंगमिष्यामिचसेनया॥तच्छ्रुत्वाराजपत्न्यस्तुपरमंहर्षमाययुः ॥२४॥ पुनःपुनश्चपप्रच्छूराजानंस
स्मिताननाः ॥ प्रत्दृष्टनरनारीकंराज्ञश्चांतःपुरंबभौ ॥ २५ ॥ काश्चिद्गायंतिसुभगावादयंत्यस्तथापराः॥नृत्यंत्यःसुष्टुलपनाश्चक्रुःकर्माण्य
नेकशः ॥ २६ ॥ व्यंजनानिप्रकुर्वंत्योदेवताःपूजयंतिच ॥ महाराजांगणेसर्वाश्चक्रुःकोतूहलंमुहुः ॥ २७ ॥ ददुर्दानंद्विजातीनांदीनांधकृप
णेषुच ॥ दिवसेशुभनक्षत्रेप्रस्थानमकरोन्नृपः ॥२८॥ शत्रुघ्नंचैवभरतंप्रस्थाप्यपुरतोबहिः ॥ वसिष्ठंवामदेवंचतथाचान्यान्मुनीनपि॥२९॥
आनकान्वादयंतोवैजनाःसर्वेविनिर्गताः ॥ गजानामयुतेनैववाजिनांप्रयुतेनच ॥ ३० ॥ रथाःषष्टिसहस्राणिदशलक्षंचपत्तयः ॥ नर्तका
वारमुख्याश्चगायकाश्चसहस्रशः ॥ ३१ ॥ कोशाध्यक्षाःप्रयातावैधनैःपुष्कलराशिभिः ॥ निष्क्रम्यनगरात्सर्वेजनामंगलपाणयः ॥ ३२ ॥
पुरंध्र्यःशुभवस्त्राश्चकलशैर्मूर्ध्निचास्थितैः ॥ गायंत्योताविवाहस्यमंगलानिपुनःपुनः ॥ ३३ ॥ मध्येजगामराजाचछत्रचामरमंडितः ॥

वीक्षितोनरनारीभिर्मंगलाशंसिभिर्नृपः ॥ ३४ ॥ एवंचचालभूपालःसेनयागजशोभया ॥ पथिवासान्कतिपयान्कृत्वाकोशलभूमिपः ॥३५॥
मिथिलांप्रापतेजस्वीजनैश्चपरिवारितः ॥ प्रासादैर्बहुभीरम्यैर्ध्वजैश्चसमलंकृतम् ॥३६॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धे
नवमोध्यायः ॥ ९ ॥ सूतउवाच ॥ श्रुत्वातुजनकोराजाप्रजाभिर्ब्राह्मणैःसह ॥ निर्जगामनृपंनेतुंस्वपुरंप्रतिमैथिलः ॥ १ ॥ अश्ववारैर्मतंगै
श्चशिबिकाभिश्चनागराः ॥ निर्गम्यमिथिलायास्तुददर्शपार्थिवर्षभः ॥ २ ॥ वृद्धंदशरथंदृष्ट्वामुमोदजनकोनृपः ॥ गजादुत्तीर्यराजापिव
सिष्ठादिभिरन्वितः ॥ ३ ॥ तस्थौभूम्यांमहाराजःसैनिकैःपरिवारितः ॥ जनकस्तुमहाबुद्धिर्नृपस्यचरणांतिके ॥४॥ प्रेम्णाननामवैराजाकृ
त्वांजलितुमस्तके ॥ तदादशरथोराजादोर्भ्यांतंपरिषस्वजे ॥ ५ ॥ कुशलंपरिपप्रच्छत्वन्यानपितथैवसः ॥ जनकस्तुतदा
राजराजंदशरथंनृपः ॥ ६ ॥ सारथ्यंचस्वयंचक्रेरथेस्थाप्यप्रहार्षितः ॥ एवंगृहीत्वाराजानंनृत्यवाद्यैःप्रहार्षितम् ॥ ७ ॥
पुरंनिवेशयामासनानासंभारशोभितम् ॥ सेनांनिवेशयामासपुरस्यनिकटेनृपः ॥ ८ ॥ पटवेश्मानिशोभंतेसहस्राणिध्वजैःसह ॥
उवासतेषुधर्मात्मासैन्यैःसहमहामतिः ॥ ९ ॥ जनकोपितमामंत्र्यपौरैःसहगृहंययौ ॥ नानाविधानिचान्नानिदधिव्यंजनयुतानिच ॥
॥ १० ॥ प्रेषयामासराजापिसैन्यानांभोजनायच ॥ सर्वास्तुसिद्धयस्तत्रचाज्ञयाजनकस्यतु ॥ ११ ॥ सेवंतेसैनिकांस्तत्रनानासंभारभू
तिभिः ॥ राजादशरथस्तंतुविस्मयंवीक्ष्यनागमत् ॥ १२ ॥ योगिनांदुष्करंनैवजनकोयंतुयोगिराट् ॥ एतस्मिन्नंतरेविप्रोविश्वामित्रो
महामुनिः ॥ १३ ॥ सौमित्रिणाचरामेणह्यागतौनृपसन्निधौ ॥ सैनिकाश्चतदामोदंलेभिरेपरमाद्भुतम् ॥ १४ ॥ विश्वामित्रंमुनिं
वीक्ष्यतथातौरामलक्ष्मणौ ॥ आयांतंतुमुनिंवीक्ष्यतथातौचकुमारकौ ॥ १५ ॥ उत्थायजगृहेपादौविश्वामित्रस्यराजराट् ॥ भ्रातरौराजरा

जस्यचरणौजगृहतुर्मुदा ॥ १६ ॥ पुत्रौसंकृष्यराजाचदोर्भ्यांकृत्वातुवक्षसि ॥ स्नापयामासप्रेम्णावैनेत्राभ्यांवारिबिंदुभिः ॥ १७ ॥ मुनिपु
त्रौसमावेश्यजगादनृपसत्तमः ॥ कृपयातवविप्रेंद्रसंबंधोहीदृशोभवत् ॥ १८ ॥ परोपकारिणःसर्वेसाधवःसमदर्शिनः ॥ ॥ विश्वामित्र
उवाच ॥ ॥ भाग्याद्भाग्यवतांभूतिःसर्वत्रकिलजायते ॥ १९ ॥ पुत्रौगृह्णीष्वराजेंद्रन्यासभूतौसमर्पितौ ॥ सर्वेप्रमुदितालोकाराजाचापिमहा
मतिः ॥ २० ॥ एतस्मिन्नंतरेविप्रशतानंदोमहामतिः ॥ जनकानुमतेनैववाक्यंचेदमुवाचह ॥ २१ ॥ शतानंदउवाच ॥ राघवेंद्रमहा
राजह्यग्रेकृत्वाकुमारकान् ॥ गम्यतांमंडपेराज्ञोविप्रैर्नागरिकैःसह ॥ २२ ॥ इतिश्रुत्वामहाराजोवादयामासदुंदुभीन् ॥ ब्राह्मणान्क्षत्रि
यांश्चैवनैगमान्समनोदयत् ॥ २३ ॥ भूषयामासकुमारांश्चभूषणैरत्ननिर्मितैः ॥ गजारूढांश्चतान्कृत्वाचचालनृपतिर्हितैः ॥२४॥ मिथिला
यांजनाःसर्वेनरानार्योमरप्रभाः ॥ आपतंतंनृपंश्रुत्वाविवाहायमुदंययुः ॥ २५ ॥ दर्शनायकुमाराणांनागरीणांयतस्ततः ॥ हर्षोबभूवतास्तू
र्णंहर्म्याण्यारुरुहुर्मुदा ॥२६॥ आलोकनायरामस्यकाचित्परमसुंदरी ॥ धम्मिल्लंनवबंधाथपुष्पाणिन्यपतंस्ततः ॥२७॥ अंघ्रिप्रसाधिका
यास्तुकरादाक्षिप्यसत्वरम् ॥ गवाक्षायव्रजंतीसायावकंचिन्हितंक्षिपत् ॥ २८ ॥ काचिन्नेत्रंचसंभाव्यह्यंजनेनशलाकया ॥ द्वितीयंवंचयि
त्वातुवातायतनमाययौ ॥ २९ ॥ वातायनेददौदृष्टिंनीवींनापिबबंधसा ॥ अवलंब्यकरेणासौतस्थौरामंचवीक्षती ॥ ३० ॥ रशनांनबबं
धाथकाचिद्बालाप्रसर्पति ॥ पदेपदेचभम्यांसापातयामासघंटिका ॥ ३१ ॥ तासांमुखैश्चचंद्राभैर्गवाक्षाःपूरिताभवन् ॥ पश्यंत्यस्तुरमाना
थंकोटिकंदर्पसन्निभम् ॥ ३२ ॥ गंधर्वराजप्रतिममिंद्रनीलमणिप्रभम् ॥ मस्तकेमणिमुक्तानांबिभ्रंतंमौलिमुत्तमम् ॥ ३३ ॥ दीर्घेललाट
देशेचऊर्ध्वपुंड्रंमनोहरम् ॥ कुंडलंमकराकारमलकाभ्यांचशोभितम् ॥ ३४ ॥ ग्रैवेयंमणिमुक्तानामुरसाचमहामणिम् ॥ ३५ ॥ केयूरंकिल

रत्नानांदधतंभुजयोर्द्वयोः ॥ प्रकोष्ठयोर्महादिव्यंकंकणंरत्नशीलितम् ॥ ३६ ॥ अमूल्यैरंगुलीयैश्चनानारत्नैश्चशोभितम् ॥ कंचुकंचमहादि
व्यंदधतंश्यामविग्रहे ॥ ३७ ॥ उपानहोश्चयुग्मेनशोभितंपादपंकजम् ॥ ददृशुस्ताश्चश्रीरामंलोचनैःकर्णविस्तृतैः ॥ ३८ ॥ ॥ इतिश्री
सत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेदशमोऽध्यायः ॥ १० ॥ सूतउवाच ॥ ऊचुःपरस्परंवालारामेसंलग्नमानसाः ॥ जनकेनकृ
तंयज्ञंधनुषस्तुपिनाकिनः ॥ १ ॥ कथंरामःसमायातियदियज्ञोनजायते ॥ रामोनारायणःसाक्षात्सीतालक्ष्मीःप्रियासती ॥ २ ॥ कथं
वृणोतिसीतान्यंप्राकृतंतुनरंवृथा ॥ रोहिणीवशशांकेनतथाराममनुव्रता ॥ ३ ॥ रामचंद्रस्यसीतायाविवाहोनैवजायते ॥ मूर्खत्वंव्रह्म
णोलोकेजायतेवहुकालिकम् ॥ ४ ॥ नागरीणांतुवाक्यंचशृण्वन्यांतिकुमारकाः ॥ भ्रातृभिःसखिभिःसार्द्धंपित्रादशरथेनच ॥ ५ ॥
नृत्यमानांनटींसर्वेपश्यंतोयांतिराघवाः ॥ नटीसागायतीगीतंतथाशृण्वंतितेजनाः ॥ ६ ॥ रामस्याग्रेभ्रमंतीमांजनाहास्यंप्रकुर्वते ॥
राममायावलेनैवस्वयंनित्यंभ्रमंतिच ॥ ७ ॥ इत्थंदशरथोराजाराघवैस्तनयैःसह ॥ संवंधिनोजनस्याशुद्वारंप्रापमहामनाः ॥ ८ ॥ शोभि
तंमंगलैःसर्वैर्वेदपाठैस्तथाशुभैः ॥ द्वारदेशेविनिर्गत्यजनकस्तुनरेश्वरः ॥ ९ ॥ महत्यापूजयारामंपूजयामासदारकान् ॥ जनकस्यचपु
त्रोवैनाम्नालक्ष्मीनिधिर्महान् ॥ १० ॥ हस्तावलंवनंदत्वागजाद्रामंव्यरोहयत् ॥ तथैवान्यान्कुमारान्वैतथादशरथंनृपम् ॥ ११ ॥
जनकेनविनिर्दिष्टंचत्वरंचकुमारकाः ॥ विविशुर्भूषितास्तेतुप्रणम्यगुरुदेवताः ॥ १२ ॥ पीठेनिवेशितोरामोनानारत्नविभूषिते ॥ जग्रा
हमधुपर्कंचराज्ञादत्तंचराघवः ॥ १३ ॥ वस्त्रद्वयंचश्रीरामोवनितानांविलोकनैः ॥ जग्राहमंडपेदत्तंभूपेनैवमहामनाः ॥ १४ ॥ पुरोधा
स्तुविदेहानांशतानंदोमहामातिः ॥ रघूणांचवशिष्ठस्तुतथैवान्येद्विजातयः ॥ १५ ॥ अग्निमाज्यादिभिर्हुत्वातंवैसाक्ष्येनिधायच ॥

सीतांकन्यांसमानीयविदेहःप्राहराघवम् ॥१६॥ इयंसीतावरारोहालक्ष्मीस्तेतुपरिग्रहः ॥ भवान्नारायणोदेवःपत्न्यर्थंप्रतिगृह्यताम् ॥१७॥
हस्तेनहस्तंश्रीरामोजानक्याजगृहेतदा ॥ शुशुभेचतदारामःकामोरत्येवमंडपे ॥ १८ ॥ स्पर्शेनकिलसीतायाःजातोमोहस्तुराघवे ॥
राघवस्यकरस्पर्शात्सीतायाश्चबभूवह ॥१९॥ तयोर्विलोचनान्येवलज्जांप्रापुःपरस्परम् ॥ व्याजेनहोमधूमस्यचोन्मेषणनिमेषणम् ॥२०॥
बभूववरवध्वोश्चमंडपेजनसान्निधौ ॥ पश्चाद्रामश्चसीताचह्यग्निंचैवप्रदक्षिणम् ॥ २१ ॥ चक्रतुर्ब्राह्मणानांतुरेजातेचमुहुर्मुहुः ॥
शतानंदेनसाप्रोक्ताजानकीपातिदेवता ॥ २२ ॥ हुताशनेचलाजांश्चजुहावाधोमुखीतदा ॥ हविषांपल्लवानांचगंधोमिश्रोबभूवह ॥ २३ ॥
धूमःकर्णोत्पलस्येवप्रापशोभांचसंमुखे ॥ वदनंजानकीदेव्याअंजनक्लेदमाबभौ॥२४॥ ग्रहणाद्धोमधूमस्यययौपाटलतांतदा ॥कन्यावरौ
तदासर्वैसंस्थाप्यकनकासने ॥२५॥ ब्राह्मणानुगमादेवाःक्षत्रियाःपुरवासिनः ॥ अभिषेकंतदाचक्रुर्वरवध्वोःसुमंगलम् ॥ २६ ॥ एतस्मिन्नं
तरेराजाआहूयलक्ष्मणंपुनः ॥ उर्मिलांचविधानेनलक्ष्मणायस्वयंददौ ॥ २७ ॥ भरतंपुनराहूयमांडवींदत्तवान्नृपः ॥ कुशध्वजसुतांरम्यां
श्रुतकीर्तिंचविश्रुताम्॥२८॥ शत्रुघ्नायददौराजाविधिनाबलशालिने ॥ एवंदत्वाकुमारीश्चप्रीत्यातेभ्योनराधिपः ॥२९॥ पारिबर्हंददौपश्चा
दसंख्यंमिथिलाधिपः ॥ पश्चाद्रामःसमुत्थायशतानंदस्यचाज्ञया॥३०॥विवेशांतःपुरंवीरोभ्रातृभिःसहराघवः॥यत्रदेवालयंराज्ञोनित्यपूजा
रतस्यच॥३१॥लक्ष्मीनारायणस्यापिप्रतिमायत्रविद्यते ॥ तंप्रणम्ययथान्यायंस्थितास्तत्रकुमारकाः॥३२॥इतिश्रीसत्योपाख्यानेसूतशौ
नक संवादेउत्तरार्द्धेविवाहवर्णनंनामएकादशोऽध्यायः ॥११॥ सूतउवाच ॥ आसनेषुचदिव्येषुरेजुस्तत्रकुमारकाः ॥ राजदाराः समाजग्मु
र्यत्ररामादयः स्थिताः ॥१॥ ब्रह्माणीतत्ररुद्राणीइंद्राणीशारदातथा ॥ अन्यावैलोकपालानांस्त्रियस्तत्रसमागताः ॥२॥ गंधर्व्योप्सरसस्तत्र

तथानार्यौह्य नेकशः ॥ दर्शनार्थंतुदेवस्यरामचंद्रस्यधीमतः॥३॥गायंतिगायिकास्तत्रवाद्यंचक्रुर्मनोरमम् ॥ नृत्यंतिचापरास्तत्ररामाग्रेभा
वदर्शिकाः ॥ ४ ॥ भोजयंतिकुमारांश्चमधुपर्कंतथैवताः ॥ तासांमध्यात्समुत्थायराज्ञीलक्ष्मीनिधेस्तुया ॥ ५ ॥ नाम्नासिद्धिस्तुसाख्या
तासखीयस्यास्तिशारदा ॥ वधूर्जनकराजस्यप्रियालक्ष्मीनिधेः शुभा ॥ ६ ॥ रूपेणाप्रतिमालोकेसर्वाभरणभूषिता ॥ आगत्यरामचंद्र
स्यतस्थौप्रांजलिरग्रतः ॥ ७ ॥ उवाचसस्मितारामंनर्तयंतीविलोचने ॥ पीतांबरंप्रकृष्याथपाणिना स्वेननिस्त्रपा ॥ ८ ॥ सिद्धिरुवाच ॥
राघवेंद्रमहाराजश्रूयतांवचनंमम ॥ ननंदामेगृहीताते सीतानाम्नीवरानना ॥ ९ ॥ किंचित्पूजाममापिस्याद्दीयतांराजपुत्रक ॥ इत्युक्त्वावी
टिकांदिव्यांददौ रामायसुंदरी ॥ १० ॥ लक्ष्मणायचशत्रूणांहंत्रेवैभरतायच ॥ पुनश्चप्रार्थयामासममपूजांप्रदेहिभो ॥ ११ मार्जतीवदनं
तेषामंचलेनशुभानना ॥ जहसुस्तेकुमारावैस्पर्शनाद्वदनस्यतु ॥ १२ ॥ दृष्ट्वातुवदनंतेषांमोदमापवरानना ॥ जगादसस्मितावाक्यंदेहि
पूजांचमामकीम् ॥ १३ ॥ नोचेत्संगेगमिष्यामितवरामपुरींप्रति ॥ भूत्वाचसेवकोनोचेन्मदीयांनगरींवस ॥ १४ ॥ ननंदामेगृहीतातेउर्मि
लाद्याश्चभ्रातृभिः ॥तस्यावाक्यंसमाकर्ण्यसस्मिताराजयोषितः ॥ १५॥ श्रीरामउवाच ॥ उवाचरामचंद्रोपितवपूजांददाम्यहम् ॥ सेवको
नभविष्यामिवयंक्षत्रियपुंगवाः ॥ १६ योगिनोजनकाः सर्वेंऋद्धिंसिद्धिंह्युपासकाः ॥ वयंतासांतुभोक्तारःसिद्धिंत्वांचनयाम्यहम् ॥ १७ ॥
सिद्धिरुवाच ॥ एवंभवतुभोराजंस्तवदासीभवाम्यहम् ॥ पूजांदेहिमदीयांत्वंननंदामेविवाहिता ॥१८॥ श्रीरामउवाच ॥ वस्त्ररत्नहिरण्या
दिभूषणंगजवाजिनः ॥ रथाश्वशिबिकादिव्याः वांछास्वीयाप्रपूर्य्यताम् ॥१९॥ इत्युक्त्वाराजपुत्रेणसिद्धिःप्रोवाचराघवम् ॥ सिद्धिरुवाच ॥
देहिभक्तिंमहाराजममभर्त्रे तथैवहि ॥ २०॥ ययाभक्त्याभविष्यावस्त्वत्पदोत्पलकिंकरौ ॥ सूतउवाच॥ तच्छ्रुत्वाशारदा देवीसखीतस्य

मनोहरा ॥ २१ ॥ उवाचरामंसंलग्नावीजयंतीमुखांबुजम् ॥ शारदोवाच ॥ अंहमप्यागमिष्यामिसीतासंगेपुरींतव ॥२२॥ दर्शनार्थंचरा
ज्ञीनांयुष्माकंपार्श्वमातरः ॥ एताजनकपत्न्यस्तुसंदिहानाः परस्परम् ॥ २३ ॥ गौरोदशरथोराजाकौशल्याश्रूयतेतथा ॥ कथं
श्यामोभवाञ्जातः संदेहं त्वमपाकुरु ॥ २४ ॥ भवान्नारायणोदेवः श्यामसुंदरविग्रहः ॥ लक्ष्मणः शेषरूपश्चभरतःशंखमूर्तिभृत् ॥
॥ २५ ॥ शत्रुहाचक्ररूपीचमयात्व्येवंविलोकिताः ॥ एवंतांब्रुवतींबालांकुमाराः सस्मिताननाः ॥ २६ ॥ अपांगैर्वारयामासुस्तामेव
जनसंसदि ॥ दृष्ट्वारामंतुताःसर्वा नात्मानंविविदुस्तुताः ॥ २७ ॥ मोहितारामरूपेणध्यानस्थाइवलक्षिताः ॥ एतस्मिन्नंतरेराजाविदेहो
मिथिलाधिपः ॥ २८ ॥ विलोक्यरामचंद्रंचदेहन्नविबुधेनृपः ॥ पुनरुत्थायराजातुवेदीमध्येचतस्थिवान् ॥ २९ ॥ दशरथंमहाराजंवसिष्ठा
दिसमन्वितम् ॥ रामाद्यैर्बालकैःसर्वैरघूणांप्रवरैःसह ॥ नैगमैःखलुवृद्धैश्चभोजयामासधर्मवित् ॥ ३० ॥ गायंतिगायकास्तत्रगंधर्व्योप्सरस
स्तथा ॥ चतुर्विधंसुधान्नंचबुभुजुः क्षत्रियर्षभाः ॥ ३१ ॥ भुक्त्वाचम्ययथान्यायं वस्त्राण्याधायविग्रहे ॥ यमादयस्तुतेसर्वेशिविराय
विनिर्ययुः ॥ ३२ ॥ आगत्यशिबिरेराजावधूभिःसहपुत्रकैः ॥ ददौदानंद्विजातिभ्योयाचकेभ्यः पुनः पुनः ॥ ३३ ॥ इतिश्रीसत्योपा
ख्यानेसूतशौनकसंवादे उत्तरार्द्धे द्वादशोऽध्यायः ॥ १२ ॥ सूतउवाच ॥ उषित्वाचैवराजातुदिनानिकतिचिन्मुदा ॥ अयोध्यांपुनरागं
तुंययाचेजनकंनृपम् ॥ १ ॥ तच्छ्रुत्वाजनकोराजागजानश्वान्समादिशत् ॥ कंबलान्मणिमुक्तादीन्जामात्रेप्राहिणोन्नृपः ॥ २ ॥ रामोनृ
पाज्ञयाप्रापश्वश्रूणांनिकटेहरिः ॥ उवाचप्रणतोभूत्वाश्वश्रूः सर्वाः समाहिताः ॥ ३ ॥ श्रीरामउवाच ॥ आज्ञांदेहिमहाराज्ञिअयोध्यांगंतु
मीहते ॥ अहंचापिगमिष्यामिभ्रातृभिः सहतांपुरीम् ॥ ४ ॥ एकाग्रमानसैनैवममध्यानंहिक्रीयताम् ॥ भवतीभिः सदाचित्तेउपकंठेवसा

ण्यहम् ॥ ५ ॥ धर्मतस्तवपुत्रोहंविस्मर्त्तुंनक्षमःक्वचित् ॥ मांचध्यायंतियेलोकास्तेकृतार्थानसंशयः ॥ ६ ॥ तच्छ्रुत्वाराजदारास्तुवि
चार्यमनसात्विदम् ॥ चतुरस्ताः कन्यकास्तुसंभूष्यभूषणोत्तमैः ॥ ७ ॥ आलिंग्यमातरःसर्वा जानकींप्रेमतोमुहुः ॥ मोक्तुंनैक्षंतकन्यांतां
वियोगभयकातराः ॥ ८ ॥ वैदेहितवजन्मेदमीश्वरैस्तुस्तुतंकिल ॥ देहांतरेपिद्रष्टव्याजनन्यश्वइमाः शुभाः ॥ ९ ॥ विश्वकर्तुरियंसृष्टिर्व
धूस्संयोज्यभिंदतः ॥ नचजानातिकस्यापिपीडांचापिवियोगजाम् ॥ १० ॥ आत्मतुल्यःपतिः प्राप्तस्त्वयासीतेनसंशयः ॥ अस्माभिस्तु
नशोच्यासिसर्वदाप्राणवल्लभे॥ ११ ॥विरहंदुःसहंसीतेत्व्यस्माकंतेवियोगजम्॥सुदिनंवर्ततेतेषांयत्रसीतेगमिष्यसि॥ १२ ॥जनकउवाच॥ मंग
लंक्रियतांदेव्यःसीतायैविधिपूर्वकम्॥इतिश्रुत्वातदाप्रोचुर्वैदेहींगद्गदस्वराः॥ १३ ॥चिरायुर्भवसीतेत्वंकृपयाश्रीधवस्यच ॥शिवगौरीप्रसादेन
सौभाग्यंतेविवर्धताम्॥ १४ ॥वामभागेतुरामस्यसदातिष्ठवरानने॥इत्यादिचाशिषोदत्वाऊचूरामंचमातरः ॥ १५ ॥ मंगलानिप्रकुर्वत्यःप्रेम्णा
चाश्रुविलोचनाः ॥ सुकुमारीचसीतेयंसुंदरीचगुणान्विता॥ १६ ॥पित्राचलालितानित्थंपरिचर्यांकरिष्याति॥ यदिचेदपराधंतुचरेद्बालात्वया
त्वियम्॥ १७ ॥ हृदयेनतुमंतव्यंदासीतेचरणाब्जयोः ॥जनकेनचतेदत्ताधर्मपत्नीसदातव ॥ १८ ॥ कृपयैनांसदासिंचनित्यंसिंचनृपात्मज ॥
यदायदावतारस्तेजायतेभुविमानवे॥ १९ ॥तदातदात्वियंपत्नीजायतेनृपनंदन॥ २० ॥वाक्यैरित्यादिसंतोष्यरामंजामातरंतुताः॥दत्वाबहूनि
रत्नानिरामायप्रियकारिणे ॥ २१ ॥ चतुरस्रांशुभांदोलांस्वर्णरत्नविनिर्मिताम् ॥ सीतामारोहयामासुरुदंतींताश्चमातरः ॥ २२ ॥ अंवव
त्सेतिनादोभूत्जनविक्लवकारकः ॥ उर्मिलांश्रुतकीर्तिंचमांडवींचापिमातरः ॥ २३ ॥ यानेषुस्थापयामासुरालिंग्यालिंग्यसादरम् ॥ सुभ
गादयस्तुसख्यस्तायानान्यारुरुहुस्तदा ॥ २४ ॥ मिथिलाधिपतीराजावदान्यानांशिरोमणिः ॥ सर्वंदत्वाचरामायरामंह्लादिनिवेश्यच॥ २५ ॥

राघवेंद्रंप्रणम्याथगमनायादिदेशह ॥ प्रयाणेचैवरामस्यमिथिलापुरवासिनः ॥ २६ ॥ पश्यन्राममपश्यंसर्वमश्रुकंठाबभूविरे ॥ वालावृद्धायु
वानश्चतरुण्योध्यानतत्पराः ॥ २७ ॥ दुंदुभीनांप्रणादेनगजानांबृंहितैस्तथा ॥ हेषितैश्चापिचाश्वानांशांतिपाठैस्तथैवच ॥२८॥ रुदिता
निनशृण्वंतिनरानार्यःपरस्परम् ॥ केचित्सीतेतिहाचक्रुर्हारामेतिवदन्मुहुः ॥ २९ ॥ एवंब्रुवत्सुसर्वेषुप्रचचालरघूद्वहः ॥ नाम्नाशत्रुंजयं
नागमारुरोहनराधिपः ॥ ३० ॥ तथैवरामोधर्मात्माभ्रातृभिःपरिवारितः ॥ वसिष्ठाद्यास्तथाविप्रानागराः क्षत्रियास्तुते ॥ ३१ ॥ वधूनां
तानियानानिमध्येकृत्वाप्रतस्थिरे ॥ तस्थुरुन्मील्यनेत्राणिमिथिलापुरवासिनः ॥ ३२ ॥ महोत्सवंतुध्यायंतोव्रतेनानेनरेमिरे ॥ ३३ ॥
इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेत्रयोदशोऽध्यायः ॥ १३ ॥ सूतउवाच ॥ अयोध्यांप्रतिसासेनाजगामपरयाश्रिया ॥
दुंदुभीनांप्रणादाश्चश्रूयंतेतत्रभूरिशः ॥ १ ॥ वधूनांतानियानानिहैमानिप्रचकाशिरे ॥ मालेवकांचनीभूम्यांयानपंक्तिर्विराजते ॥ २ ॥
वितानानितुमेघानांबभूवुर्व्रजतांपथि ॥ मंगलानिप्रदृश्यंतेतत्रतत्रचभूरिशः ॥ ३ ॥ जमदग्नेस्तदापुत्रःक्षत्रियाणांकुलांतकः ॥ नाम्नापर
शुरामश्चरामदर्शनकांक्षया ॥ ४ ॥ प्रोवाचागत्यरामंतुधनुर्बाणधरःस्वयम् ॥ परशुरामउवाच ॥ रामचंद्रमहाभागधनुर्भंगस्त्वयाकृतः
॥ ५ ॥ विश्वासस्तेनमेजातोरामोनारायणःस्वयम् ॥ इदंधनुर्वरंरामविष्णोरमिततेजसः ॥ ६ ॥ गृह्णीष्वभोमहाराजपादौतेप्रणमाम्यहम् ॥
अथरामःप्रणम्याशुकार्मुकंचगृहेमुदा ॥ ७ ॥ ऋषिःप्रसादमाभाष्यरामोराममुदैक्षत ॥ रामंचसीतयासार्द्धंहृदिन्यस्यययौमुनिः ॥ ८ ॥
रामोपिसेनयासार्द्धंराज्ञादशरथेनच ॥ अयोध्यांचजगामाथनंदयन्मंडलंभुवः ॥ ९ ॥ पुत्रैःसार्द्धंमहाराजमायांतंमंत्रिसत्तमाः ॥ पौरैर्निर्ग
त्यपुर्यास्तुपूजयातानपूजयन् ॥ १० ॥ मंगलानिप्रगायंतिनरानार्यस्तुभूरिशः ॥ वाद्यमानेषुतूर्येषुस्तूयमानेषुबंदिषु ॥ ११ ॥ वेदेषु

पठ्यमानेषुविप्रवर्य्यैःसमंततः ॥ पुरतोनृत्यमानाश्ववारमुख्याःसहस्रशः ॥ १२ ॥ अयोध्यानगरंरम्यंनानारत्नैश्चमंडितम् ॥ वैजयंतीप
ताकाभिःराजितंबहुधोन्नतम् ॥१३॥ उत्सार्यशिविकावस्त्रंभगिनीभिस्तुजानकी ॥ प्रणाममकरोत्प्रेम्णावैकुंठेतिहरेःपुरीम् ॥१४॥ वीणावे
णुमृदंगानांझर्झराणांचभूरिशः ॥ शंखदुंदुभिनादंचगोमुखानांतथैवच ॥ १५ ॥ नादितंविविधैर्नादैःपुरंदेवपुरोपमम् ॥ बालवृद्धास्तरुण्य
श्चहर्म्याण्यारुरुहुस्तदा ॥ १६ ॥ गजारूढंमहाराजंराजराजंचराघवम् ॥ वृद्धंदशरथंदृष्ट्वाप्रशंसंतितदाजनाः ॥ १७ ॥ ऐरावतकुलेजातं
गजेंद्रंपर्वतोपमम् ॥ तमारुह्यसमायांतंछत्रचामरशोभितम् ॥ १८ ॥ कोटिकंदर्पलावण्यंरामचंद्रंमनोहरम् ॥ भूषितंवरवस्त्रैश्चतथैववरभूष
णैः ॥ १९ ॥ तथैवभरतंवीरंमत्तमातंगगामिनम् ॥ लक्ष्मणंशत्रुहंतारंनागेनागेविराजितम् ॥ २० ॥ राजपुत्रांस्तथादृष्ट्वास्त्रियोबालाश्च
कन्यकाः ॥ मुक्ताभिरक्षतैःपुष्पैःकिरंत्योगीतमुज्जगुः ॥२१॥ धन्याअभूवंस्तेलोकामिथिलापुरवासिनः ॥ शोभांविलोक्यतेरामेनयनैःकर्ण
विस्तृतैः ॥ २२ ॥ धन्यास्तामातरःसर्वाःकौशल्याभूरिदासदा ॥ यासांपुत्राभवंतोहिमन्मथादधिकोपमाः ॥ २३ ॥ वयंधन्यतमास्ते
तुमुखचंद्रावलोकिनः ॥ एवंशृण्वन्शुभावाचःप्रययुस्तेकुमारकाः ॥ २४ ॥ कौशल्याभवनंप्रापूराज्ञासहकुमारकाः ॥ तस्याउद्भासि
तंसद्मंमंगलैर्मंगलवस्तुभिः ॥ २५ ॥ द्वारंचापिमहादिव्यंमुक्तादामादिभिर्वृतम् ॥ द्वारभित्तौहरेर्व्यूहाःसर्वेसाधुनिरूपिताः ॥ २६ ॥
ब्रह्माद्याःसकलादेवाःस्त्रियोहिकमलादयः ॥ द्वारेतस्मिन्विराजंतेमंगलैर्हस्तपूरितैः ॥ २७ ॥ कौशल्याचसुमित्राचकैकयीराजयोषितः ॥
स्वर्णपात्रेमहादिव्येनानारत्नैश्चपूरिते ॥ २८ ॥ दीपंस्वर्णमयंतत्रगोघृतेनसमन्वितम् ॥ सीतयासहितंरामंनीराजयंतिसंमुखे ॥ २९ ॥
विलोक्यगतिंगायंतिरामचंद्रंमुहुर्मुहुः ॥ राज्ञांसहस्रेसदसिधनुर्भग्नंत्वयाकृतम् ॥ ३० ॥ तेषांमानमपाकृत्यसीताचोद्वाहितात्वया ॥ पू

रिताजनकस्यैवप्रतिज्ञाराजनंदन ॥ ३१ ॥ पूजितोभार्गवेणैवकीर्त्तिस्तेलोकविश्रुता ॥ स्वयापत्न्याचिरंजीववर्द्धयस्वनिजान्जनान् ॥
॥ ३२ ॥ एवंनीराजनंकृत्वाददुर्दानान्यनेकशः ॥ अवतेरुर्गजेभ्यस्तुजननीभिस्तुपूजिताः ॥ ३३ ॥ यानेभ्यस्तुतथावध्वोजानक्याद्या
अवातरन् ॥ तासांमुखानिचालोक्यश्वश्रूरत्नानिचाददुः ॥ ३४ ॥ वधूभिःसहितास्तास्तुदेवागारंययुःपुनः ॥ तंप्रणम्ययथान्यायंश्व
श्रूभ्यश्चपुनर्नताः ॥ ३५ ॥ प्रवराणांविशुद्धानांस्त्रीणांचकुलयोषिताम् ॥ प्रमुखारुंधतीयत्रगुरुपत्नीमनस्विनी ॥ ३६ ॥ तासांपादौ
प्रणम्याथविविशुस्तावरासने ॥ एतस्मिन्नंतरेराजादत्वादानानिभूरिशः ॥ ३७ ॥ याचकेभ्योगुणिभ्यश्चजगामांतःपुरंसुतैः ॥ कुमारैःस
हसंगम्यपादपद्मंप्रणम्यच॥३८॥पक्कैरन्नैर्यथान्यायंविप्रवर्यानभोजयत् ।क्षत्रियांश्चतथावैश्यान्तथैवपरिचारकान्॥३९॥ स्वानिस्वानिगृहा
ण्येवमुदितास्तेप्रपेदिरे॥जनेभ्यःकथयामासुर्विवाहानंदमद्भुतम् ॥४०॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेचतुर्दशोऽध्यायः॥
॥१४॥ ॥ सूतउवाच ॥ अथरात्र्यांप्रवृत्तायांराजराजस्यसद्मनि ॥ इंद्रेणप्रेषिताः सर्वारम्भाद्याप्सरसोमुदा ॥१॥ नर्तनार्थंतुरामस्यविवाहे
मंगलप्रदाः ॥ कौशल्याप्रांगणेदिव्येदिव्यास्तरणशोभिते ॥ २ ॥ वितानैश्चापिरम्यैश्चछादितेचापिसर्वशः ॥ तत्रराजामहाबुद्धिः पत्नी
पुत्रसमन्वितः ॥३॥ तस्याग्रेननृतुः सर्वारंभाद्यादेवनाटिकाः ॥ हावभावंप्रकुर्वंत्यः सर्वास्ताभिनयान्मुहुः ॥ ४ ॥ लेभिरेपरमानंदमंतः
पुरगताजनाः ॥ एतस्मिन्नंतरेदेवोनारदोभगवानृषिः ॥५॥ अंतरिक्षाच्चावतीर्यपुत्रैः सार्द्धंमहामतिः ॥ संपूज्यविधिवद्विप्रंदिव्ये पीठेन्यवे
शयत् ॥ ६ ॥ नारदंपूजयामासुः सर्वास्ता राजयोषितः ॥ ननृतुर्देववध्वश्चसमाजेकिलतादृशे ॥ ७ ॥ नानावाद्यप्रणादेन नानागीतेन ह
र्षिताः ॥ नर्तनार्थंसमुत्तस्थौकौतुकीनारदोमुनिः॥८॥दर्शयामासभावंचरामाग्रेकौतुकीमुनिः॥मध्येननर्तदेवीनांरामाग्रेवैष्णवोऋषिः॥९॥

कौतुकानिबहून्येवदर्शयन्मुनिसत्तमः ॥ क्वाचिद्दशरथस्याग्रेकौशल्यापुरतः क्वचित् ॥ १० ॥ सुमित्रायाश्चकैकेय्याअन्यासाम
पियोषिताम् ॥ ननर्तनारदोयोगीवीणांस्कंधेनिधायच ॥ ११ ॥ जटाः पिशंगीर्विक्षिप्यकूर्चैविस्फार्यपाणिना ॥ तिलोत्तमासुकेशीचतयोः
स्कंधेभुजौनिजौ ॥ १२ ॥ कृत्वाजगौननर्ताथहास्यायकुतुकंतथा ॥ प्रफुल्लंवायुनाकृत्वामुखंस्वंदर्शयन्मुदा ॥ १३ ॥ चूर्णयन्मंथरांविप्रो
वानरीमिवभूषिताम् ॥ मंथरापितदोत्थायकैकेयीनिकटात्पुनः ॥ १४ ॥ वासोजग्राहविप्रर्षेःस्मयंतीप्राहनारदम् ॥ मंथरोवाच ॥ नत्वा
दृशोवरः क्वापिमादृशीक्वापिसुंदरी ॥ १५ ॥ विधिनिर्मितमेतत्तुसंवंधंभर्तृभार्ययोः ॥ तच्छ्रुत्वाजहसुःसर्वेनरानार्यस्तुभूरिशः ॥ १६ ॥
नारदोपिमहायोगीप्रहसन्प्राहमंथराम् ॥ त्वादृशीकुत्रलप्स्यामित्रैलोक्येसचराचरे ॥१७॥ इदानींपरितुष्टोस्मिदृष्ट्वातेकूवरंमहत् ॥ इति
श्रुत्वाजनाःसर्वेहास्यंचक्रुःपरस्परम् ॥१८॥ उत्तमांचाशिषंदत्वासर्वेभ्योनारदोमुनिः ॥ तिलोत्तमांसुकेशींतुपूजांप्राप्यनिजंपदम् ॥१९॥
पूजांचमहतींप्राप्यस्वानिधिष्ण्यानिभेजिरे ॥ यत्रसीतास्वयंलक्ष्मीरामोनारायणःस्वयम् ॥२०॥सिद्धयोविपुलास्तत्रनिधयश्चापिभूरिशः॥
ययोःकटाक्षमात्रेणविश्वंजीवतिनित्यशः ॥२१॥ इदंविवाहचरितंयेशृण्वंतिनराःसदा ॥ तेषांभक्तिश्चमुक्तिश्चमंगलानिभवंतिहि ॥२२॥
इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेपंचदशोऽध्यायः ॥ १५ ॥ सूतउवाच ॥ अयोध्यापुरवासिन्योदर्शनार्थंसमाययुः ॥
तरुण्यः कन्यकावृद्धाःपुरंध्र्यश्चपतिव्रताः ॥१॥ दर्शनायवधूनांचरामादीनांचताःपुनः ॥ कौशल्यांचसुमित्रांचकैकेयींचतथापराः ॥२॥
प्रणम्यप्रांगणेतस्थूराज्ञीभिस्तास्तुसत्कृताः ॥जानकींमांडवींचैवश्रुतकीर्तिंतथोर्मिलाम् ॥३॥ दृष्ट्वादृष्ट्वापुनर्दृष्ट्वाह्यानंदंलेभिरेमुहुः ॥ राज
लक्षणसंयुक्तावध्वःसर्वाविलोकिताः॥४॥धन्योवैजनकोराजापुत्र्योयस्यवराननाः॥सुभगाःसंतुसर्वाहिपतिवश्याभवंत्विमाः ॥५॥ इत्युक्तातु

करेतासांरत्नानिप्रददुःस्त्रियः॥कौशल्यापिपुनस्ताभ्योवस्त्ररत्नहिरण्यकम्॥६॥ पुत्राणांचविवाहेषुप्रीतिदानंददौमुदा ॥ गृहाणिताः पुनर्ज
ग्मुर्भुक्त्वान्नममृतोपमम्॥७॥ व्यतीयायमहान्कालोमंगलैर्नवशौनक ॥ शौनकउवाच॥ कथेयंमहतीरम्यारामस्यपरमाद्भुता॥८॥नतोषये
न्मनःकस्यश्रुतायेनशिवप्रिया ॥ विजहारकथंरामोजानक्यासहितोहरिः॥९॥भ्रातरस्तेकथंतस्मिन्वर्तैरन्वशवर्तिनः ॥ कथंदशरथःप्रीतः
पुत्रानुद्धार्यराजराट्॥१०॥ ब्रूहिसूतमहाभागरघूणांचरितंत्विदम्॥सूतउवाच॥एकदारामचंद्रस्तुराजराजेश्वरात्मजः॥११॥ सीतयासहप्रा
सादमारुरोहमुदान्वितः ॥ पर्यंकेतुमहादिव्येमुक्तादामपरिच्छदे ॥ १२ ॥ पयःफेनमयेशुभ्रेनिषसादतयासह ॥ वीजयामासरामंसाचामरे
णशुचिस्मिता ॥ १३ ॥ तांबूलंखादयामासपूगीफलयुतंतदा ॥ उवाचात्मधवंसीतागवाक्षात्पश्यतीपुरीम् ॥ १४॥ सीतोवाच ॥ अयो
ध्येयंपुरीरम्यानानावृक्षैश्चशोभिता ॥ सरयूर्दृश्यतेयत्रवैकुंठेविरजायथा ॥ १५ ॥ वैकुंठाख्यमिदंक्षेत्रंकोटिपुण्यैश्चलभ्यते ॥ भवान्नाराय
णोदेवोलक्ष्मीश्चाहंप्रियातव ॥ १६ ॥ अत्रवासाद्द्विजानीमोवैकुंठाख्यपुरीत्वियम् ॥ इत्येवंब्रुवतीसीतासूर्यश्चास्तगिरिंययौ ॥ १७ ॥प्रवृत्ता
रजनीशुक्लाक्षणदासर्वदेहिनाम् ॥ रामःसीतामुवाचाथदृष्ट्वाचंद्रनिभाननाम् ॥ १८ ॥ श्रीरामउवाच ॥ सीतेविलोक्यतांचंद्रःप्राचीभागे
मनोरमः ॥ उदेतिसर्वलोकानांतापनाशायसुंदरि ॥१९॥ वृंदकुमुदिनीमांतुस्फोटयन्परितःप्रिये ॥ इत्युक्त्वाजानकींरामआलिलिंगप्रियां
निजाम् ॥ २० ॥ तयोर्भोगेनसंजातंजगदेतच्चराचरम् ॥ पुनःप्रोवाचसीतांसस्तुन्वन्वाक्यैर्मुहुर्मुहुः ॥ २१ ॥ वदनंचंद्रतोरम्यंसीतेपश्या
मिसुंदरम् ॥ विलोक्यमुखचंद्रंतुचंद्रोयंतुनभोगतः ॥२२॥ मृगाःसर्वैवनंजग्मुर्दृष्ट्वानेत्रद्वयंतव ॥ कटिंदृष्ट्वाचतेसिंहाभजंतिगिरिगह्वरम् ॥
॥ २३ ॥ गमनंतेनसंप्राप्यमतंगादिग्गजाभवन् ॥ पंकजानिजलंजग्मुर्नेत्रशोभांनलेभिरे ॥२४॥ विलोक्यभुजगावेणींजग्मुर्देहैर्बिलेबिले ॥

स्वर्णंददाहचात्मानमग्नौदेहंविलोक्यते ॥ २५ ॥ सतामिदंप्रियेयोग्यंदूरेवासःपराजये ॥ इतिश्रुत्वाशुभंवाक्यंरामचंद्रात्समीरितम् ॥ ॥ २६ ॥ सस्मितंवीक्ष्यतीराममपांगैश्चात्मवल्लभम् ॥ श्रीजानक्युवाच ॥ अहंदासीमहाराजयथेच्छसितथावद ॥ २७ ॥ परंतुसुंदरीसाहिपत्युराज्ञाकरीचया ॥ पतिर्वशेभवेद्यस्याःपतिवश्याचयाभवेत् ॥ २८ ॥ उभौचसुखमेधेतएवंजानीहिभोःप्रिय ॥ ॥ सूतउवाच ॥ भेजातेशयनंतौचपर्यंकेनिजवेश्मनि ॥ २९ ॥ अरुणोदयवेलायांजहौनिद्रांचराघवः ॥ उत्थायचान्हिकंकृत्वाजगामपितुरंतिके ॥ ३० ॥ तंप्रणम्ययथान्यायंराज्यकार्यंचकारह ॥ तथैवजानकीदेवीस्नाताहुतहुताशना ॥ ३१ ॥ पूजनार्थंतुश्वश्रूणांजगामगजगामिनी ॥ श्वश्रूजनंचसंपूज्यकौशल्यानिकटेपुनः ॥ ३२ ॥ विवेशचालिभिःसाकंसेवायैचसदोन्मुखी ॥ तस्याःप्राणसमासाहिजनकस्यसुतासती ॥ ३३ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेषोडशोऽध्यायः ॥ १६ ॥ ॥

॥ सूतउवाच ॥ ॥ माताप्रोवाचरामस्यसीतांपरपहर्षिता ॥ पाकंविधायभोदेविपुत्रैःसहनराधिपम् ॥ १ ॥ वसिष्ठंवामदेवंचजाबालिमथकाश्यपम् ॥ अन्यान्विप्रवरांश्चैवभोजयत्वंवरानने ॥ २ ॥ तस्या वाक्यंसमाकर्ण्यसीतासर्वांगशोभना ॥ भगिनीभिस्तदासार्द्धंचक्रे पाकंचतुर्विधम् ॥ ३ ॥ निवेद्यहरयेचान्नंविधिपूर्वंतुजानकी ॥ आकारितास्तुगुरवोराजापुत्रैःसमन्वितः ॥ ४ ॥ भोजनार्थंतुतेसर्वेपाकशालांसमाययुः ॥ हस्तौपादौचप्रक्षाल्यतस्थुःपंक्तिंविधायच ॥ ५ ॥ संगोप्यवदनंसीतावस्त्रेणैवतथातनुम् ॥ स्वर्णपात्रेविधायान्नंवसिष्ठायददौन्हिया ॥ ६ ॥ तथैवविप्रवर्येभ्योभूपायचतदाददौ ॥ ततश्चन्हीमतीबालारामायभरतायच ॥७॥ लक्ष्मणायतदासुभ्रूःशत्रुघ्नायतथैवसा ॥ अन्यानपियथान्यायंप्रीत्याचान्नंन्यवेदयत् ॥ ८ ॥ गुरुणाप्रेरितोराजासीतायैप्रददौमाणिम् ॥ इंद्रेणैवपुरादत्तोयज्ञेवैचाश्वमेधके

॥ ९ ॥ सैवचूडामणिर्ज्ञेयः सर्वलोकेषुविश्रुतः ॥ तंमणिंजानकीलब्ध्वासुस्मिताभूद्वरानना ॥ १० ॥ तदातुभोजनंचक्रुर्वसिष्ठाद्यास्तुरा
घवाः ॥ तदन्नंपरमंस्वादुरसैःषड्भिःसमन्वितम् ॥ ११ ॥ भुक्त्वापीत्वाचपानीयंविविशुस्तेसभांशुभाम् ॥ पुनस्तुभोजिताश्वश्रूर्दास्योदा
साश्वसीतया ॥ १२ ॥ प्रीताःसर्वेंजनास्तस्यै मंगलानिप्रचक्रिरे ॥ स्वयंतुबुभुजेसीताभगिनीभिःसमन्विता ॥ १३ ॥ सीतायाःपाकसदनं
सदापूर्णंविराजते ॥ प्रत्यहंपश्यतोगेहेत्व्यन्नपूर्णाविराजते ॥ १४ ॥ यत्रसीतास्वयंलक्ष्मीःसिद्धयः संतिसर्वदा ॥ विलीयंतेचपापानिदर्शना
त्पाकसद्मनः ॥ १५ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेसप्तदशोऽध्यायः ॥ १७ ॥ ॥ शौनकउवाच ॥ सूतजीवचिरं
साधोवदनोवदतांवर ॥ रामभद्रकथांपुण्यांश्रवणान्मुक्तिदायिनीम् ॥१॥ सूतउवाच ॥एकदाजानकीदेवीरामंवचनमब्रवीत् ॥ सरय्वाउत्तरे
तीरेविहारायव्रजप्रिय ॥ २ ॥ भ्रातृभिःसखिभिःसार्द्धमहंचापिसखीजनैः ॥ गमिष्यामिमहाभागभगिनीभिःसमन्विता ॥ ३ ॥ सूतउवाच॥
जानक्यावचनंश्रुत्वातथास्त्वितिचराघवः ॥ प्रणम्यपितरंरामोवचनंचेदमब्रवीत् ॥ ४ ॥ श्रीरामउवाच ॥ विवाहेयेजनाराजन्नागतामैथि
लोद्भवाः ॥ दासादास्यस्तथावध्वःप्रार्थयंतिचमांसदा ॥ ५ ॥ अयोध्यापरितोयानितीर्थानिसकलानिच ॥ स्नातुंमनोहिमेदेवव्रजामस्त
त्रराघव ॥ ६ ॥ सूतउवाच ॥ वाक्यंश्रुत्वातुरामस्यददावाज्ञांतदानृपः ॥ द्वारपालान्समाहूयरामोवचनमब्रवीत् ॥७ ॥ लक्ष्मणायतदानु
ज्ञांभरतायतथैवच ॥ शत्रुघ्नायपुनर्वीरोनागरेभ्यस्तथैवच ॥ ८ ॥ सैनिकेभ्योपिचान्येभ्योरामश्चाज्ञांसमादिशत् ॥ तेदूतास्त्वरितंगत्वाते
भ्योवचनमब्रुवन् ॥९॥ गम्यतांतीर्थयात्रार्थंकुमारा यांतिभार्यया ॥ इतिश्रुत्वावचस्तेषांगृहात्सर्वेविनिर्गताः॥१०॥ कोलाहलोमहानासी
त्सर्वेषांपुरवासिनाम्॥तांदेवोजेंद्रमारुह्यसरयूतीरमाययौ ॥११॥तथातेभ्रातरःसर्वेस्वंस्वंवाहमवास्थिताः ॥ जानकीशिविकारूढामांडव्या

दिभिरन्विता ॥१२॥ [illegible]लास्तथावृद्धानरानार्यःसहस्रशः ॥सरयूतीरमासाद्यहर्षेणपरिपूरिताः ॥१३॥ आज्ञयारामचन्द्रस्यनावःसर्वाः समागताः॥पताकिन्यस्तुतानावोघंटारवसमन्विताः ॥१४॥ नानाजविमुखास्तास्तुरक्तकंबलछादिताः ॥ धीवरैर्वाह्यमानास्तुधीवरीभिः समंततः॥१५॥ वाद्यंतेतत्रवाद्यानिवाद्यकैस्तत्रभूषितैः ॥ आरुह्यनावस्तेसर्वेनद्याःपारंययुस्तदा ॥१६॥अश्वागजास्तथाउष्ट्रानरानार्यस्तु भूरिशः ॥ महापोतेतदारामःसीतयासहतास्थिवान् ॥१७॥ पोतेपोतेस्वयापत्न्याभ्रातरस्तेतदारुहन् ॥ वाह्यमानासुनौकासुधीवरीभिः समंततः ॥१८ ॥उवाचलक्ष्मणोभार्यांमूर्मिलांचशुभाननाम् ॥ लक्ष्मणउवाच ॥ इदंसहस्रधारेतिख्यातंतीर्थंवरानने ॥ १९ ॥ पश्चिमेराजतीर्थंतुतन्मध्येपापमोचनम् ॥ पूर्वतःस्वर्गद्वारंचनानातीर्थोत्तमोत्तमम् ॥ २० ॥ संस्नानार्थमहंभद्रेआगच्छामिसदाप्रिये ॥ शेषरूपोहमत्रैववसामिसरयूजले ॥ २१ ॥ शेषयात्रासदाकार्यावर्षेवर्षेनरैः सदा ॥ पूजनीयोहमत्रैवत्वयासार्द्धंमनीषिभिः ॥२२॥ दानानिविविधानीहकर्तव्यानिसदैवहि ॥ शुक्लेश्रावणपंचम्यांवैशाखेचसदैवहि ॥ २३ ॥ नाम्नाममैवख्यातिंचलोकेतीर्थंगमिष्यति ॥ इत्येवंकथयन्वीरस्तरण्यांराघवानुजः ॥ २४ ॥ सरय्वास्तुपरेपारेजगामप्रिययासह ॥ स्वर्गद्वारस्यमाहात्म्यंरामचंद्रस्तुजानकीम् ॥ २५ ॥ श्रावयामासधर्मात्मावल्लभांचात्मनः प्रियाम् ॥ श्रीरामउवाच ॥ स्वर्गद्वारमिदंतीर्थंसर्वतीर्थाधिकंभुवि ॥ २६ ॥ स्वर्गद्वारसमंतीर्थंनास्तिब्रह्मांडगोलके ॥ दशकोटिसहस्राणिदशकोटिशतानिच ॥ २७ ॥ स्नानार्थंहिसमायांतिदेवाःस्वस्त्रीगणैःसह ॥ ऋषयोनागयक्षाश्चगुह्यकाःपन्नगास्तथा ॥ २८ ॥ नानामूर्तिधराःसर्वेस्नानंकुर्वंतिमुक्तये ॥ स्नातव्यंचवयस्याभिस्त्वयामयाचजानकि ॥२९॥ धर्मावाप्तिंप्रपश्यामिपुर्यांवासेत्विदंफलम् ॥ इत्येवंकथयामासमाहात्म्यंसरयूद्भवम् ॥ ३० ॥ सरय्वाश्चोत्तरेतीरेलग्नानावःसहस्रशः ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेअष्टादशोऽध्यायः ॥ १८ ॥ सूतउवाच ॥ नौकाभ्यस्तेसमुत्तीर्यवाहानारुरुहुः पुनः ॥ जगामसेनयारामोमहत्याचतुरं

गया ॥ १ ॥ यत्रचास्तेमहादेवःपार्वत्यासहनित्यशः ॥ यत्रचास्तेसरोरम्यंपार्वतीचेतिविश्रुतम् ॥ २ ॥ पुंडरीकैःसितांभोजैस्तथारक्त
सरोरुहैः ॥ कमलैःशतपत्रैश्चकुमुदैश्चापिमंडितम् ॥ ३ ॥ जलकुक्कुटकोयष्टिसारसैश्चापिनादितम् ॥ जलजंतुसमाकीर्णंपक्षिभिश्चापिना
दितम् ॥ ४ ॥ तदाश्रमंसमालोक्यसुमंत्रोराममब्रवीत् ॥ सुमंत्रउवाच ॥ अत्रैवस्थीयतांराजन्सैनिकाःश्रमितावयम् ॥ ५ ॥ फेनान्मुंचं
तिवाहाश्चसूर्यरश्मिप्रपीडिताः ॥ सूर्योमध्यदिनंप्राप्तोवासमत्रैवक्रियताम् ॥६॥ देवखातमिदंरम्यंस्नानाद्बहुफलप्रदम् ॥ तच्छ्रुत्वाराघवःश्री
मान्स्थीयतामितिचाब्रवीत् ॥७॥ तदासर्वेजनास्तस्थूरामचंद्रस्यचाज्ञया ॥ द्रुमाणांचैवछायासुजनाःसर्वेविशश्रमुः ॥ ८ ॥ रामस्यचमहादी
र्घपटवेश्मविराजते ॥ सौमित्रेर्भरतस्यापिपटवेश्ममनोहरम् ॥९॥ रेजिरेपटवेश्मानितथैवपुरवासिनाम् ॥ दीर्घाभिःप्रतिसीराभिर्वितानैश्चस
मंततः ॥ १० ॥ राघवाणांस्त्रियस्तस्थुःसखीभिःपरिवारिताः ॥ परितःपटवेश्मानांपत्तयोबहुधास्थिताः ॥ ११ ॥ मातंगास्तुरगाश्चैववृ
षाउष्ट्राश्चगर्दभाः ॥ शृंखलैःपरितोबद्धाराजंतेतत्रभूरिशः ॥१२॥ ध्वजाश्चविविधाकाराःपटवस्त्रैश्चशोभिताः ॥ हयावणिक्जनानांतुनानावस्तुप्र
पूरिताः ॥१३॥ क्रयंचविक्रयंचक्रुस्तदासैन्याःसहस्रशः ॥ वृंदानिकिलवेश्यानांयत्रतत्रविरेजिरे ॥१४॥ तडागेपार्वतीयेचसस्नुःसर्वेचनागराः ॥
॥ कुमारारामचंद्राद्याजानक्याद्याश्चयोषितः ॥ १५ ॥ कुडचैस्तुप्रतिसीराणांगोपितास्तुविजह्रिरे ॥ पुष्पाण्यादायपद्मानांमानर्चुश्चसदा
शिवम् ॥ १६ ॥ पार्वतीसहितंतस्यचक्रुर्नीराजनंजनाः ॥ बुभुजुश्चजनाःसर्वेप्यन्नानिविविधानिच ॥ १७ ॥ रात्रौजागरणंचक्रुर्नरानार्यस्त
थैवहि ॥ केचिन्नृत्यंतिगायंतिवादयंतितथापरे ॥ १८ ॥ कथांशृण्वंतिकेचित्तुमिश्रितांहरिचर्चया ॥ अर्धरात्रेव्यतीतेतुहरःसाक्षाद्बभूवह
॥ १९ ॥ पार्वत्यासहितोदेवोगणैःसर्वैःसमन्वितः ॥ उत्थायपूजयामासशिवंरामस्तुसीतया ॥ २० ॥ तथैवभ्रातरःसर्वेपत्नीभिःपरिवारिताः

॥ महादेवोब्रवीद्रामंसर्वेषांचापिशृण्वताम् ॥२१॥ महादेवउवाच ॥ अहंचपूजितोरामत्वयालोकाहितैषिणा ॥ यद्यदाचरतिश्रेष्ठस्तत्तदेवेत
रोजनः ॥ २२ ॥ सयत्प्रमाणंकुरुतेलोकस्तदनुवर्तते ॥ भवान्नारायणोदेवःसीतालक्ष्मीस्त्वियंशुभा ॥ २३ ॥ जगतांतारणार्थाययुवां
तुनररूपिणौ ॥ कीर्तिर्वांपावनीलोकेप्रसरिष्यतिभूरिशः ॥ २४ ॥ श्रोष्यंतियेनरानूनंवादिष्यंतिसदैवहि ॥ पारंतेचगमिष्यंतिभवाब्धेः
प्रेमतत्पराः ॥ २५ ॥ श्रीरामेतिचतेनामवेदानांसारमेवहि ॥ कथयिष्यंतियेनूनंमुक्तिंयास्यंतितेभुवि ॥ २६ ॥ हेश्रीराममहाबाहोसीत
यारमयासह ॥ ममहृत्कमलेवासंकुरुदासोस्मितेसदा ॥ २७ ॥ सूतउवाच ॥ श्रीरामतवनामेदंकाश्यांदस्येसदैवहि ॥ येभ्योददामितेमु
क्ताःप्रयांतिपरमंपदम् ॥ २८ ॥ इत्थमुक्त्वाचश्रीरामंरामेणैवाभिवादितः ॥ अंतर्द्धानंययौदेवःपार्वत्याचगणैःसह ॥ २९ ॥ आत्मनस्तु
महद्भाग्यंतदामेनेरघूत्तमः ॥ विस्मयंचतदाजग्मुर्नरानार्योप्यनेकशः ॥ ३० ॥ श्रुत्वारमंरमानाथंरमारूपांचजानकीम् ॥ भेजिरेशयनंस
वैंतदास्वप्नंचलेभिरे ॥ ३१ ॥ परंब्रह्मपरंधामजगतांकारणंपरम् ॥ नागशय्याशयानंचद्विभुजंरघुनंदनम् ॥ ३२ ॥ शिवब्रह्मादिभिर्देवे
रनंतगरुडादिभिः ॥ स्तूयमानंजगन्नाथंसीतांचापितथाविधाम् ॥ ३३ ॥ चरणौरामदेवस्यपाणिभ्यांमृदुमर्दतीम् ॥ ह्रियाकीर्त्याचसावि
त्र्याभुवारत्यातथोमया ॥ ३४ ॥ स्तूयमानौचवैकुंठेसाकेताख्येनदीतटे ॥ तत्रैवतुतदात्मानंददृशुःपुरवासिनः ॥ ३५ ॥
इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेएकोनविंशोऽध्यायः ॥१९॥ ॥ सूतउवाच ॥ अर्द्धयामावशिष्टायांरात्र्यंतेवाद्यवादकाः ।
आनकान्वादयामासुर्गमनायतदोत्तराम् ॥ १ ॥ तच्छुत्वाविजहुःसर्वेनिद्रांतंद्रांचसैनिकाः ॥ अन्नानिवाहनेभ्यस्तुददुस्तेपरिचारकाः ॥
२ ॥ घटिकैकावशिष्टायांरात्र्यांवन्दिगणास्तदा ॥ उदारवचसःसर्वेरामस्यस्तुतिपाठकाः॥ ३ ॥ जानक्यासहितंरामंबोधयंतिपुनःपुनः ॥

पीवरांसंमहावाहुंकुंडलद्वयशोभितम् ॥ ४ ॥ विरलंह्यंगरागंचसुप्रतीकंयतस्ततः ॥ मर्दनेनतुशय्यायाःकुसुमानांपुनःपुनः ॥ ५ ॥
सुशोभनयनंरामंनिद्रयानेत्रलग्नया ॥ ॥ वैतालिकाऊचुः ॥ ॥ मुंचनिद्रांमहाराजगतारात्रिर्विशांपते ॥ ६ ॥ निद्रावशेनभोदेवत्वयानैववि
लोकिता ॥ सुताजनकराजस्यसखीभिःपरिवारिता ॥ ७ ॥ नीराजनायभोदेवमंगलाभिमुखीतव ॥ मुखचंद्रंविलोक्याशुचंद्रोगच्छतुम्ला
नताम् ॥ ८ ॥ उन्मिषस्वमहाराजनेत्रयुग्मेनभूरिद ॥ नेत्रसाम्यायतेरामपद्मानिस्फुटितानिच ॥९॥ तारकाइवनेत्राणांपद्मेपद्मेभ्रमंतिच॥
भ्रमराःकलगानैश्चरमंतेयत्रतत्रच ॥ १० ॥ शाखिनांपुष्पजालाश्चवायुनानिपतंतिच ॥ पुष्पैःसंमिलितोवायुर्मुखश्वासंसमीहते ॥ ११ ॥
हिमांभःपल्लवाग्रेषुपतितंमौक्तिकैःसमम् ॥ ओष्ठद्वयेतुनारीणांनासायांमौक्तिकंतथा ॥ १२ ॥ नयावदुदयंप्राप्यतमोहंतीवभानुमान् ॥
तावदेवारुणेनैवतमोनीतंचदूरतः ॥ १३ ॥ युद्धायतेपितायावन्नायातिराघवोयथा ॥ तावत्त्वयाक्षयंनीतंवैरिणांचबलंशरैः ॥ १४ ॥ वीत
निद्रामतंगास्तेमत्ताःकर्षन्तिशृंखलाम् ॥ दंतेषुयेषांसूर्यस्यरक्ताराजन्तिरश्मयः ॥ १५ ॥ अश्वाःकुर्वन्तिहेषांवैलेह्यार्थंपटवेश्मनि ॥ म्ला
नाःपुष्पोपहारास्तेशय्यायांरामनिर्मिताः ॥ १६॥नप्रसर्पंतिदीपानांरश्मयःपरितःप्रभो ॥ पञ्जरस्थाःशुकास्तेचप्रबोधायपठंत्यमी ॥१७॥
सूतउवाच ॥ ॥ वन्दिपुत्रैःकुमारास्तेत्यक्तनिद्रास्तदाकृताः ॥ कृत्वाचान्हिककर्माणिभूषितावस्त्रभूषणैः ॥ १८ ॥ यथोचितंतुतेसर्वैवाहा
नारुरुहुःपुनः ॥ शिबिकासुचसीताद्याअवरोधारथेषुच ॥ १९ ॥ शंखदुन्दुभिनादोभूत्प्रयाणेराघवस्यच ॥ मत्स्यध्वजैःगजाःसर्वेप्रयाता
उत्तरांदिशम् ॥ २० ॥ तेषांपश्चाद्ययुःसर्वेसैनिकास्तेप्रहर्षिताः ॥ शत्रुंजयेगजेरामोराजमानोयथारविः ॥ २१ ॥ वंधुनालक्ष्मणेनैवचामरे
णसुशोभितः ॥ हस्त्विंचान्[illegible]ंत्रस्तुरामंवचनमब्रवीत् ॥२२॥ सुमंत्रउवाच ॥ इयंपृथ्वीमहाराजधनधान्यवतीशुभा ॥ सुदेवमातृकोरम्यो

देशोयंप्रतिभातिमे ॥सीतया॥अत्रत्याश्चजनाःसर्वेधर्मशीलाश्चसाधवः ॥शालितंडुलसंपूर्णागोधूमेनतथैवच ॥२४॥ क्षेत्राणिसस्यपूर्णानिफलैः
पूर्णाश्चशाखिनः॥वायुकोणेचगोशालाराज्ञोदशरथस्यच॥२५॥उत्तरेपर्वतोरम्योनानाधातुविचित्रितः ॥ नद्यश्चविविधाःसंतिपार्वतीयाअघा
पहाः॥२६॥वनानिरमणीयानिफलपुष्पैर्युतानिच॥इत्थंशृण्वंस्तदारामःप्रापदिव्यांमनोरमाम्॥२७॥दृष्ट्वामनोरमांरामःप्रणाममकरोद्विभुः॥
बलंनिवेशयामासनद्यास्तीरेमनोरमे ॥ २८ ॥ पटवेश्मानिराजन्तेनद्यास्तीरेसहस्रशः ॥ सखीगणैस्तदासीतास्नातुंप्राप्तामनोरमाम् ॥
॥ २९ ॥ मध्येतुप्रतिसीराणांचिक्रीडेजनकात्मजा ॥ रामेणसहपद्माक्षीविजहारनदीजले ॥ ३० ॥ दृतिभिःसिच्यमानौतौयथैवरति
मन्मथौ ॥ सुशोणनयनाःसख्योरामःसीतातथैवच ॥ ३१ ॥ सुस्मयित्वातदारामोजानकींवाक्यमब्रवीत् ॥ मनोरमायथात्वंहितथेयंमे
मनोरमा ॥ ३२ ॥ स्थानादुद्दालकस्यैवजातेयंपरमाद्भुता ॥ मुखस्थानंसमाविष्टचसरय्वाःसंगमंगता ॥ ३३ ॥ अस्यावैस्नानमात्रेण
पुण्यवृद्धिश्चजायते ॥ नद्यास्तीरेपुनर्गत्वावस्त्राण्यादायराघवः ॥३४॥ददौदानंद्विजातिभ्योभोजयित्वायथाविधि॥ स्वयंतुबुभुजेरामःसैन्यैः
सहमहामनाः ॥ ३५ ॥ यामेचतुर्थकेरामःसीतांप्राहस्मयन्निव ॥ एतच्छालवनंरम्यंनानापुष्पैरलंकृतम् ॥ ३६ ॥ पुष्पावचयनंकर्त्तुंगच्छ
न्तिपुरवासिनः ॥ मयासार्द्धंत्वमप्येवंसखीभिःपरिवारिता ॥ ३७ ॥ भरतोलक्ष्मणश्चैवशत्रुहाराघवस्तथा ॥ गच्छन्तुतेविहारायस्वैःस्वै
र्दारैःसमन्विताः ॥ ३८ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेविंशोऽध्यायः ॥ २० ॥ श्रीरामउवाच ॥ वनंविशोधितंसर्वं
गुहेनसखिनामम ॥ दासैःपलायिताजीवाढक्कानादेनसर्वतः ॥ १ ॥ इत्युक्काराघवोरामःप्रस्थितःसीतयासह ॥ तेचसर्वेवनंजग्मुर्विस्तरेण
यतस्ततः ॥ २ ॥ षडेवऋतवःप्रापुर्विहारार्थंतुकानने ॥ फलपुष्पदलैर्युक्तास्तरवस्तेतदाभवन् ॥ ३ ॥ अंगनाःसमयंप्राप्यकर्षंत्यइवमा

नसम् ॥ राघवाणांपदंचक्रुर्मार्गेतास्तुपुरोगताः ॥४॥ काचिच्छीघ्रंप्रयातिस्मकाचिन्मंदंप्रगच्छति ॥ नूपुराणिप्रकर्षंतिवादयंतिचमेखलाः
॥ ५ ॥ मुखेस्वेदलवायाताभारेणकुचयोर्द्वयोः ॥ लज्जितामांडवीदेवीमनस्येवंविचार्यच ॥ ६ ॥ रामस्याग्रेकथंपुष्पंविचिनोमियतस्त
तः ॥ पश्चाद्दूरेययौमंदंभरतेनैवभामिनी ॥ ७ ॥ लज्जयाभरतस्यैवचोर्मिलापतिनासह ॥ ययौवनांतरंसाध्वीसखीभिःपरिवारिता ॥ ८ ॥
लज्जयालक्ष्मणस्यैवश्रुतकीर्तिर्वनांतरम् ॥ पतिनाचवयस्याभिर्जगामगजगामिनी॥९॥विविशुस्तेवनंसर्वेनरानर्यःसखीयुताः॥सूतउवाच॥
तदानींसुभगाप्राहरामंराजीवलोचनम्॥१०॥वीटिकांखादयंतीसाजानकीमनुगच्छतीम् ॥ रामचन्द्रमहाबाहोमाशीघ्रंगम्यतांत्वया॥११॥
अनुयांतींप्रियांपश्यहंसीमिवचगच्छतीम् ॥ तस्यावाक्यंसमाकर्ण्यरामस्तुसास्मिताननः ॥१२॥ बाहुंभुजगभोगाभंप्रियाकंठेनिधायच ॥
जगामदर्शयन्शोभांवन्यांबहुविधांतदा ॥१३॥ वनेगत्वातदासख्यःपुष्पाण्यानीययत्नतः ॥ मालांकृत्वातुरामायप्रददुस्तावरास्त्रियः॥१४॥
धृत्वाकंठेतदारामोमालांपुष्पमयींशुभां ॥ ताभ्योयच्छातिसुप्रीतोमुदेतासांमहामनाः ॥ १५ ॥ विनासूत्रेणमालांतुस्वयंकृत्वातुराघवः ॥
सुस्मयंतींप्रियांप्राहगृह्यतामितिसादरम् ॥१६॥ मालांपुष्पमयींरम्यांसीताकंठेनिधायच ॥ कर्णयोःकर्णपुष्पंचरचयामासपाणिना॥१७॥
स्मयंतीसातदाप्राहरामंमधुरभाषिणी ॥ सीतोवाच ॥ कर्णौमेभूषितौराजन्गुणरत्नैस्तथैवच ॥ १८ ॥ तस्यैवभूषितौकर्णौयःशृणोतिकथां
तव ॥ इत्याभाष्यस्मयंसीतापुष्पाण्यानयितुंगता ॥ १९ ॥ जानक्यामुखपद्मस्यगंधमाघ्रायषट्पदः ॥ पुष्पाणितुपरित्यज्यह्युड्डीनोजा
नकींप्रति ॥ २० ॥ आयातींतंतुसादृष्ट्वागुंकारेणाभिसंमुखम् ॥ विधुन्वतीकरंसाचतदादुद्रावराघवम् ॥ २१ ॥ सखेलंवादयंतीचनूपुराणि
पदेस्वके ॥ रामस्यां[illegible]लात्यापपातससंभ्रमा ॥ २२ ॥ कुचद्वयेनरामस्यत्हृदयंस्पृशतीवसा ॥ कंठेलग्नातदाभातितमालेस्वर्ण

वल्लरी ॥ २३ ॥ प्रहसीतयाथः प्राहप्रियांप्रीतिपरायणाम् ॥ महत्सुखंत्वयादत्तंस्वयमालिंगनेनमे ॥ २४ ॥ सुस्मिताजानकीदेवीवाक्यं
पत्युर्निशम्यच ॥ तदा[illegible]जानकीदेवीपत्युरंगानिसर्वशः ॥ २५ ॥ पुष्पैर्विभूषयामासस्मयंतीसासुलोचना ॥ एवंविहरतांतेषांराघवाणांम
हात्मनाम् ॥ २६ ॥ सूर्यश्चास्तगिरिंप्राप्तःशिबिरायतदाययुः ॥ रामादयःकुमारास्तेसीताद्यास्तुवरास्त्रियः ॥२७॥ कृत्वातुपश्चिमांसंध्यां
शय्यायांपटवेश्मसु ॥ शयनंभेजिरेसर्वेनद्यास्तीरेमनोरमे ॥२८॥ सुखेनसागतारात्रीराघवाणांमहात्मनाम् ॥२९॥ इतिश्रीसत्योपाख्यानेसू
तशौनकसंवादेउत्तरार्द्धेएकविंशोऽध्यायः ॥ २१ ॥ सूतउवाच ॥ नादेनदुंदुभीनांतुचोत्थिताः सकलाजनाः ॥ कृत्वाचान्हिककर्माणिप्र
तीक्षंतेचराघवम् ॥ १ ॥ राघवोभ्रातृभिःसार्द्धंपूर्वांसंध्यामुपास्यवै॥आरुह्यगजराजंतुप्रयातोहिमखस्थलम् ॥२॥ महत्यासेनयासार्द्धंसीता
यासहवीर्यवान् ॥ तटेमनोरमायास्कभूमिभागान्विलोकयन् ॥ ३ ॥ ततोमध्यान्हवेलायांमखस्थानंसमागतः ॥ समुत्तीर्यगजाद्रामोनि
वासमकारोद्बलैः ॥ ४ ॥ तस्मिन्तीर्थेतदास्नात्वादत्वादानानिभूरिशः ॥ वैष्णवान्यासिनश्चैवविप्रावैब्रह्मचारिणः॥५॥ भोजिताःपरमान्नेन
दक्षिणाश्चपुनर्ददौ ॥ उषित्वाशर्वरींतत्रभुक्त्वाचान्नानितेमुदा ॥ ६ ॥ प्रातःकालेतदारामोगमनायमनोदधे ॥ चचालसेनामहतीगजवा
जिरथैर्नरैः ॥ ७ ॥ शिबिकाश्चावरोधानांराघवाणांमतंगजाः ॥ दक्षिणांदिशमालोक्यप्रयातांमहतींचमूम् ॥ ८ ॥ गच्छन्सरोवरंरम्यंददर्श
रघुनायकः ॥ पप्रच्छमंत्रिणांश्रेष्ठंसुमंत्रंमंत्रिसत्तमम् ॥ ९ ॥ देवखातमिदंरम्यंबहुपद्मैरलंकृतम् ॥ किन्नामाचतडागोसौमत्वंब्रूहिमहामते
॥ १० ॥ सुमंत्रउवाच ॥ अत्रउग्रतपानामब्राह्मणोधर्मवित्तमः ॥ तपस्तेपेमहाराजस्वर्गायगमनंप्रति ॥११॥ तपसस्तुविनाशायरूपयौव
नगर्विताः ॥ स्ववेश्याः प्रेषयामासपंचैवबलसूदनः ॥ १२ ॥ समागतास्ततःसर्वाऋषेराश्रममुत्तमम् ॥ आलिंगनंददुस्तस्मैव्याकुलो

भूद्दाषिस्ततः ॥ १३ ॥ क्रोधेनमहताविष्टःप्रत्युवाचवरांगनाः ॥ यूयंचवडवाभूत्वातडागेस्थीयतामिह ॥ १४ ॥ पंचाश्वा
श्चतडागोयंलोकेख्यातिंगमिष्यति ॥ यदातुजानकीदेवीरामपत्नीयशस्विनी ॥ १५ ॥ आगमिष्यतिकालेनसहपत्यासखीजनैः ॥ दंपती
सुंदरौदृष्ट्वायूयंमुक्ताभविष्यथ ॥ १६ ॥ तदाप्रभृतिभोरामअश्वरूपावसंतिताः ॥ शापावमोचनंतासांकर्त्तव्यंकरुणानिधे ॥ १७ ॥ इति
श्रुत्वातदारामोदयावार्द्धिःप्रियान्वितः ॥ निवासमकरोत्तत्रसीतयासहसेनया ॥ १८ ॥ सरोवरंतदारम्यंवैदेह्याचसखीगणैः ॥ जगामरम
यारामस्तटेतस्थौतयासह ॥ १९ ॥ पंचैववडवास्तत्रप्रचरंतितृणान्यहो ॥ सीताकरंकरेणैवगृहीत्वावाक्यमब्रवीत्॥२०॥श्रीरामउवाच॥
पश्यप्रियेइमादेव्यःशापात्प्राप्ताइमांदशाम् ॥ त्वत्कटाक्षवशादेवप्रयांतुत्रिदशालयम् ॥ २१ ॥ पतिनाप्रार्थितासीताचकारकरुणांतदा ॥
सीताकटाक्षमात्रेणअश्वरूपंविहायच ॥ २२ ॥ सुंदर्यस्ताःपुनर्भूत्वाप्रणेमुस्तास्तयोःपदौ ॥ स्तुत्वासंपूज्यविधिवत्विमानान्यारुरुहुः
पुनः ॥ २३ ॥ पश्यतांसर्वलोकानांययुःस्वर्गवरांगनाः ॥ तडागस्तद्दिनात्तीर्थंबभूवपृथिवीतले ॥ २४ ॥ तत्रस्नानेनदानेनशापाद्दोषैः
प्रमुच्यते ॥ तदैवप्रार्थयामासपतिंसीतासुलोचना ॥ २५ ॥ अत्रत्यानांगवांनाथमहिषीणांतथैवच ॥ जलपानायजीवानांकुल्यावैक्रिय
तांत्वया ॥ २६ ॥ तदारामःसमुत्थायधनुष्कोट्याचकारताम् ॥ नाम्नालोकेचविख्यातारामरेखाप्रकीर्तिता ॥ २७ ॥ यत्रस्नानेनदानेन
पापहानिःप्रजायते ॥ तत्रैवन्यवसद्रामःशर्वरींतांमहाबलः ॥ २८ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेद्वाविंशोऽध्यायः ॥
॥२२॥ सूतउवाच ॥ उषित्वाशर्वरींतत्रगमनायमनोदधे ॥ महत्यासेनयासार्द्धंजगामरघुनायकः ॥ १ ॥ सरयूंतेपुनस्तीर्त्वानौकाभिश्च
समंततः ॥ निवासमक[illegible]यत्रविल्वहरिःस्वयम् ॥ २ ॥ तत्रैवग्रामवध्वश्चद्रष्टुंसीतांसमागताः ॥नानावस्तून्युपादायतथामंगलपाणयः॥

३ ॥ पूजांसमर्पयामासुस्तास्तस्याःपादपद्मयोः ॥ प्रणम्यचरणौतस्यास्तस्थुस्ताःपटवेश्मनि ॥ स्थित्वातस्याःसमीपेतुसुषमांचययुर्मुदा ॥
॥४॥पश्यंतिजानकींसर्वाभूदेव्याश्चसुतांशुभाम्॥गौरींकनकवर्णाभांस्वर्णकौशेयशोभिनीम् ॥५॥चंद्राननांचंद्रनिभांरामस्यमहिषींप्रियाम्
चूडामणिंशिरोमध्येधारयंतींवराननाम् ॥ ६ ॥ नासायांमौक्तिकंरम्यंस्वर्णसूत्रेणनिर्मितम् ॥ बिभ्राणांसुंदरींसीतांदिव्यांपंकजलोचनाम्
॥ ७ ॥ कामचापनिभेनैवभ्रूयुग्मेनविराजतीम् ॥ कर्णयोर्मणिमुक्तानांताटंकद्वयशोभिनीम् ॥ ८ ॥ नीलनागाभयावेण्यामुक्तारत्नवि
चित्रया ॥ पुष्पैःसवलयांरम्यांपृष्ठभागेमनोरमाम् ॥ ९ ॥ दंतैश्छविंचमुष्णंतींबीजानांदाडिमस्यच ॥ ओष्ठद्वयेनगृह्णंतींबिंबकस्य
चरक्तताम् ॥ १० ॥ स्वर्णादीनांमणीनांतुमालांकंठेचबिभ्रतीम् ॥ नक्षत्रमालांबिभ्राणांकंचुकींस्वर्णनिर्मिताम् ॥ ११ ॥ मीनस्त
नतटामुच्चैःशाटिप्रांतेनगोपतीम् ॥ तथैवभुजयोर्युग्मंकंचुक्याह्यंगदेनच ॥ १२ ॥ प्रकोष्ठेवलयैनैवतथैवकरमुद्रिकाम् ॥ नाभिह्रदंचगंभीरं
जघनंचमनोहरम् ॥ १३ ॥ नितंबोपरिराजंतींमेखलांस्वर्णनिर्मिताम् ॥ ऊरुद्वयेनरम्येणरंभास्तंभेननिर्मिताम् ॥ १४ ॥ पादयोःपादक
टकंबिभ्राणांहंसकंतथा ॥ एवंभूतांचतांदृष्ट्वाराजलक्षणलक्षिताम् ॥ १५ ॥ सत्यामयोनिजांसीतांमिंदिरांमेनिरेस्त्रियः ॥ प्रणेमुःपादपद्मेच
भगिनीनांतथैवच ॥ १६ ॥ तासांमुखात्तुविज्ञायनामगोत्रकुलादिकम् ॥ वार्त्तालापंतदाचक्रेसुशीलाराघवप्रिया ॥ १७ ॥ ताभ्योददौमहा
राज्ञीमंडनानितुभूरिशः ॥ भूरीणि चसुवस्त्राणिभूषणानिफलानिच ॥ मंडनंतुततः स्थानंलोकेख्यातंबभूवह ॥ १८ ॥ सूतउवाच ॥
दक्षिणीकृत्यतांबालांप्रणम्यचपुनःपुनः ॥ ययुःसर्वागृहंतास्तुरामोरात्रिंनिनायच ॥ १९ ॥ स्नात्वाचसरयूतोयेदत्वादानानिभूरिशः ॥
नत्वाबिल्वहरेः पादौसंपूज्यविधिवत्तदा ॥ २० ॥ जगामनागरैःसार्द्धंनंदिग्रामंतुराघवः ॥ मार्गेग्रामाण्यनेकानितथातीर्थान्यनेकशः॥२१॥

पश्यन्पश्यन्ययौश्रीमान्दत्वास्नात्वापुनःपुनः ॥ तमसासरयूमध्येयत्किंचिद्ध्रियतेजलम् ॥२२॥ तत्तोयंजान्हवीतुल्यंसीतांप्राहरघूत्तमः॥ पूर्वेषांकाकुत्स्थानांचयज्ञयूपाननेकशः ॥ २३ प्रियायैदर्शयन्वीरोनंदिग्रामेचतस्थिवान् ॥ तदावैसैनिकाःसर्वेअन्नानिबुभुजुर्मुदा ॥२४॥ नंदिग्रामेमहापुण्येदर्शनात्पापनाशके ॥ जारणंतेचक्रुर्गीतैर्नृत्यैः कथास्तवैः ॥ २५ ॥ मांडवीभरतंप्राहभोस्वामिन्क्रियतांवचः ॥ अत्रैवक्रियतांकुंडंस्वनाम्नाचैवकीर्तये ॥२६॥ तच्छ्रुत्वाभरतःश्रीमानाज्ञयाराघवस्यच ॥ खनकैःखानयामासनाम्नाभरतकुंडकम्॥२७॥ शोभितंजलकल्लोलैःपद्मैर्नानाविधैःशुभैः ॥ तथापक्षिगणैःसर्वैश्चक्रवाकैरलंकृतम् ॥२८॥ सीतारामौचसंपूज्यनानावस्त्रैश्चभूषणैः ॥ब्राह्मणाभोजिताःसर्वेवैष्णवान्यासिनस्तथा ॥ २९ ॥ पूजितादानमानाभ्यांतथाचान्येसमागताः ॥ तदाप्रभृतितत्तीर्थंलोकेख्यातंबभूवह ॥ ३० ॥ यत्रस्नानेनदानेनसीतारामःप्रसीदति ॥ नंदिग्रामाद्दक्षिणेचगयाकूपात्तुचोत्तरे॥३१॥तीर्थंभरतकुंडाख्यंराजतेविमलप्रभम्॥३२॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेत्रयोविंशोऽध्यायः ॥२३॥ सूतउवाच ॥ तत्रस्नात्वाचदत्वाचराघवःसीतयासह ॥ प्रययौसेनयासार्द्धंततोरमणकंवनम् ॥१॥ रमासीतास्वयंयत्ररेमेरामेणसुंदरी ॥ रमापादइतिख्यातस्तत्रकाश्चिन्महामुनिः॥२॥ उवासजानकींध्यायन्जराजीर्णकलेवरः ॥ वासंतिकासतीकाचित्सीतायाश्चमनोहरा ॥ ३ ॥ पुष्पाण्यानयितुंयाताददर्शमुनिपुंगवम् ॥ श्वेतैःशिरोरुहैर्युक्तंजराजीर्णकलेवरम् ॥ ४ ॥ मनसाध्यायमानंतुलक्ष्म्याःपादसरोरुहम् ॥ वासंतिकाचतंदृष्ट्वाप्रणम्याशिरसापुनः ॥ ५ ॥ आगत्यजानकींप्राहदर्शनंक्रियतांमुनेः ॥ अलिभिःसहसोत्थायरामेणरमणेनच ॥ ६ ॥ दर्शनार्थंययौसीतारमापादस्यवैमुनेः ॥ ॥ सूतउवाच ॥ नूपुराणांध्वनिंश्रुत्वानेत्रेचरमशीलययोगिराट् ॥७॥ ददर्शाग्रेमहातेजारामंनारायणंहरिम् ॥ सीतांलक्ष्मींततोदृष्ट्वाप्रणनाममुनीश्वरः॥८॥

प्रणतःपूजितस्ताभ्यांक्रीयैस्तराघवेणच ॥ तुष्टावजानकींदेवींप्रणम्यशिरसामुनिः ॥ ९ ॥ ॥ रमापादउवाच ॥ जयत्वंपद्मपत्राक्षिजयत्वं
राघवप्रिये॥जगन्मातर्महालक्ष्मिसंसारार्णवतारिणि॥१०॥महादेविनमस्तुभ्यंनमस्तुभ्यंसुरेश्वरि ॥रामप्रियेनमस्तुभ्यंनमस्तुभ्यंदयानिधे
॥११॥ पद्मालयेनमस्तुभ्यंनमस्तेराघवप्रिये ॥ जगन्मातर्नमस्तुभ्यंकृपावतिनमोस्तुते ॥१२॥ दयावतिनमस्तुभ्यंनमोविश्वेश्वरप्रिये ॥
नमःक्षीरार्णवसुतेनमस्त्रैलोक्यधारिणि ॥ १३ ॥ विश्वेश्वरिनमस्तुभ्यंरक्षमांशरणागतम् ॥ रक्षत्वंदेवदेवीशेदेवदेवेशवल्लभे ॥ १४ ॥
दरिद्रात्राहिमांदेविकृपांकृत्वाममोपरि ॥ नमस्त्रैलोक्यजननिनमस्त्रैलोक्यपावनि ॥ १५ ॥ ब्रह्मादयोनमंतित्वांजगदानंददायिनीम् ॥ राम
प्रियेनमस्तुभ्यंनमस्तुभ्यंजगद्धिते ॥ १६ ॥ आर्तिहरेनमस्तुभ्यंसमृद्धिंकुरुतेनमः ॥ अब्जवासेनमस्तुभ्यंचपलायैनमोनमः ॥ १७ ॥
नमस्तेशीघ्रगामिन्यैचंचलायैनमोनमः ॥ परिपालयमांमातर्दासंमांशरणागतम् ॥ १८ ॥ शरणंत्वांप्रपन्नोस्मिकमलेकमलानने ॥
त्राहित्राहिमहादेविपरित्राणपरायणे॥१९॥किंबहूक्तेनभोःसीतेनमस्तेस्तुपुनःपुनः ॥ अन्यन्मेशरणंनास्तित्वमेवशरणंमम॥२०॥सीतोवाच
यत्त्वयोक्तमिदंपुण्यंयेपठिष्यंतिमानवाः ॥ श्रोष्यंतियेमहाभक्त्यातेषांदास्यामिसंपदम् ॥ २१ ॥ यःपठेत्प्रातरुत्थायश्रद्धाभक्तिसम
न्वितः ॥ सुखसौभाग्यसंपन्नोबुद्धिमान्ऋद्धिमान्भवेत् ॥ २२ ॥ पुत्रवान्गुणवान्श्रेष्ठोभोक्ताभवतिमानवः ॥ इदंस्तोत्रंमहापुण्यंमहादा
रिद्र्यनाशनम् ॥ २३ ॥ क्षिप्रंप्रसादजननंचतुर्वर्गफलप्रदम् ॥ इत्थंवरांस्तुमुनयेदत्वारामेणसंयुता ॥ २४ ॥ वनेनिनायतांरात्रिंविहारेणर
माभिधे ॥ प्रातःकालेरमातीर्थेस्नात्वाश्रीसरयूजले ॥ २५ ॥ सीतयासहधर्मात्माअयोध्यांगंतुमुत्सुकः ॥ ब्राह्मणैःकुलवृद्धैश्चक्षत्रियैर्नैगमै
स्तथा ॥ २६ ॥ वणिग्जनैस्तथापौरैः सैनिकैर्बहुभिस्तदा ॥ आरुह्यवाहंतेसर्वेअयोध्यांप्रययूरथैः ॥ २७ ॥ ततेतटेसरय्वाश्चप्राप्तागुतह

रिंचते ॥ तत्रस्नात्वाचदत्वाचरामश्चाहकथामिमाम् ॥२८॥ अत्रपूर्वंरमानाथस्तपस्तपेसुदुश्चरम्॥नाशायकिलदैत्यानांदेवानांविजयायच॥
॥२९॥ तदाप्रभृतिलोकेचनाम्नागुप्तहरिःस्मृतः ॥ इत्येवंकथयन्रामोगमनायमनोदधे ॥३०॥ अयोध्यांप्राप्यतेसर्वेप्रापुर्वेश्मानिनागराः ॥
राजद्वारंसमागम्यरामोभ्रातृसमन्वितः ॥ ३१ ॥ गजादुत्तीर्यराजानंप्रणाममकरोत्प्रभुः ॥ रामंचालिंग्यबाहुभ्यांतथापुत्रान्नृपोत्तमः
॥ ३२ ॥ आनंदंपरमंप्रापदृष्ट्वापुत्रान्समागतान् ॥ कौशल्यांचसुमित्रांचकैकेयींचतथापराः ॥ ३३ ॥ प्रणेमुस्तेकुमाराश्चपरिष्वक्ता
श्चमातृभिः ॥ प्रणम्यश्वश्रूःसीताचभगिनीभिर्मुदान्विता ॥ ३४ ॥ ताभिश्चापिपरिष्वक्ताःवध्वस्तास्तुवराननाः ॥ विजग्मुःपति
नासार्द्धंस्वेस्वेवेश्मनिताःपुनः ॥ ३५ ॥ इमांतुतीर्थयात्रांवैरामस्यपरमात्मनः ॥ यःशृणोतिसदाभक्त्याकथयेद्वापिभक्तितः ॥ ३६ ॥
तीर्थयात्राफलंतस्यजायतेनात्रसंशयः ॥ ३७ ॥ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तार्द्धेचतुर्विंशोऽध्यायः ॥ २४ ॥
॥ शौनकउवाच ॥ ॥ विहारंब्रूहिरामस्यभोःसूतकरुणानिधे ॥ यस्यश्रवणमात्रेणनमनोयातिकुत्रचित् ॥ १ ॥ शृणुविप्रमहा
भागरामचन्द्रकथामिमाम् ॥ अशोकवनिकांरम्यांराघवःसीतयासह ॥ २ ॥ प्रविवेशविहारायतस्याएवविनोदभाक् ॥ सखी
सहस्रसंयुक्ताजानकीजनकात्मजा ॥ ३ ॥ रमयामासरामंसानानाभावैर्मनोरमैः ॥ ह्रियाकीर्त्याचशीलेनभर्तुःसीताहरन्मनः ॥ ४ ॥ अ
शोकवाटिकायांतुविजहारबहून्ऋतून् ॥ रमयासीतयासाकंरामचन्द्रोमहामनाः ॥ ५ ॥ एकदाजानकीदेवीमालांपुष्पमयींव्यधात् ॥
आदर्शेथरामकंठेतुत्यात्मानंतुददर्शसा ॥६॥ आत्मनःप्रतिबिंबंतुचात्ममोहकरंपरम् ॥ कौस्तुभेरामचन्द्रस्यकंठदेशेमनोहरे ॥७॥ मानंच
कारसाबालाद्वितीयपरिशंकया ॥ एकपत्नीव्रतोरामोद्वितीयांतुबिभर्त्यसौ ॥८॥ इतिमत्वाजगामाथसख्यासुभगयासह ॥ अन्याअपि

तदाजग्मुःसीतासख्यः ३२ ः ॥ ९ ॥ कुंजांतरेस्थितांसीतांशोचंतींतामवस्थिताम् ॥ परिवार्यतदातस्थुःसर्वाश्चितापरायणाः ॥ १० ॥
किमियंमानमापन्नाकयेयंकोपितासती ॥ इतिशोचंतिताःसर्वाःपरिवार्यसमंततः ॥११॥ वीजयंतितथात्वन्याश्चामरेणसुशोभिना ॥
वीटिकांतुकरेगृत्वातस्थुश्चान्यावरांगनाः ॥ १२ ॥ काश्चित्सुगंधहस्ताश्चकाश्चित्सिंदूरसंपुटाः ॥ काश्चिदादर्शहस्ताश्चकाश्चित्कंकाति
काकराः ॥१३॥ शृंगारंचापरागृह्यतस्थुश्चान्यापतद्ग्रहम्॥एतस्मिन्नंतरेकाचित्सखीकेशप्रसाधिका॥१४॥ वेण्याःपुष्पाणिकर्तुंचजानक्याः
प्रीतिसंयुता ॥ अपांगान्नेत्रयोःसातुनिषिद्धातत्रसीतया॥१५॥ नचकारतदावेण्यांपुष्पाणिसुरभीणिच॥तदाचसुभगाचालीह्युवाचमैथिलीं
प्रति ॥ १६ ॥ कृत्वाचप्रांजलिंसुभ्रूर्वचनंप्रीतिसंयुता ॥ सुभगोवाच ॥ निषेधंकुरुषेकस्मादालिकेशप्रसाधिकाम् ॥ १७ ॥ कातेभ्रांतिः
समुत्पन्नामह्यंब्रूहिसुलोचने॥श्रीजानक्युवाच॥ सुभगेत्वांप्रवक्ष्यामिह्यात्मभ्रांतिंमनोहराम्॥१८॥अहंपत्युःप्रकुर्वाणामालांकंठेमनोहराम्॥
पत्युःकंठेमयादृष्टासुंदरीदिव्यभूषणा॥१९॥हावभावंप्रकुर्वाणामादृशीकंजलोचना॥ संदेहोमानसेजातोराघवोन्यांबिभर्तिकिम्॥२०॥मन
साभ्रांतियुक्तेनस्थिताकुंजेपतिंविना॥एतस्मात्कारणाद्बुद्धासखीकेशप्रसाधिका॥२१॥श्रुत्वावाक्यंतुसीतायाजहाससुभगासखी॥नेतिनेती
तिधुन्वानाशिरःपाणिंतुचात्मनः ॥२२॥ उवाचसस्मितासीतांमाबुद्धिंत्वीदृशींकुरु ॥ त्वयाह्युक्तंपरेलोकेविरजायाःसुलोचने॥२३॥नान्ये
नममतुष्टात्वंयाचितस्तुपतिर्मया॥नप्रदास्यामित्रेतायामेकपत्नीव्रतंपतिम् ॥२४॥ विस्मृत्यवचनंतत्तुकथमेवंप्रभाषसे ॥ यादृशीकौस्तुभे
दृष्टानारीपंकजलोचना॥२५॥तादृशींपस्यचादर्शेत्वात्ममूर्तिंसुलोचने ॥ इत्युक्त्वादर्शयामासमुकुरंनिजपाणिना॥२६॥ दृष्ट्वासीतात्मनो
रूपंतादृशंसुमनोहरम् ॥ जहाससुस्मितापांगीचात्मानंगर्हतीमुहुः ॥२७॥ आत्माज्ञानात्कृतंत्वेतंमयापत्युश्चगर्हणम् ॥ आत्मनःकिलदो

षेणचात्मानंहेशपाम्यहम् ॥ २८ ॥ पत्युर्विरहजांपीडांगमिष्यामिनसंशयः ॥ सूतउवाच ॥ विमलानामकाचित्तुसखीरामस्यधीमती ॥
॥ २९ ॥ व्यथितांजानकींदृष्ट्वाराममागत्यचाब्रवीत् ॥ विमलोवाच ॥ किंकरोषिमहाराजपश्यसीतांवराननाम् ॥३०॥ विषीदंतीसखीनांतु
मध्येत्विंदुसमाननाम् ॥ श्रुत्वातुवचनंतस्यारामोरमयतांवरः ॥३१॥ विषादमगमद्वीरःश्रुत्वादेवींविषीदतीम्॥आसनाच्छीघ्रमुत्थायसखी
भिःपरिवारितः ॥ ३२ ॥ गजराजगतिर्वीरः पद्भ्यामेवचचालह ॥ विचारंमनसाकुर्वन्निश्चयं नाधिजग्मिवान् ॥ ३३ ॥ आयांतंतुपतिंदृ
ष्ट्वासीतासुरसुतोपमा ॥ प्रत्युज्जगामसाबालाह्रियात्यवनतासती ॥३४॥ कोटिकंदर्पलावण्यंविलोक्यसुंदरंपतिम् ॥ गंधर्वराजप्रतिमंदृष्ट्वा
मुदमवापसा ॥ ३५ प्रणाममकरोत्प्रेम्णाप्रोवाचवचनंत्विदम् ॥आत्माज्ञानान्महाराजदुःखिताहंत्वयाविना॥३६॥ जीवधर्मगताचाहंमानंकृ
त्वात्वयिप्रभो॥ एकपत्नीव्रतेराजन्याभ्रांतिस्तुमयाकृता ॥३७॥ तयादुःखमनुप्राप्तापादौचतेशपाम्यहम् ॥ सूतउवाच ॥ एवंगिरंब्रुवंतीं
तांसीतांचंद्रनिभाननाम् ॥३८॥ आलिंग्यतांचबाहुभ्यांप्रोवाचवचनंप्रियाम् ॥श्रीरामउवाच॥नचभ्रांतिंत्वमापन्नाप्रियेप्रियतरेमयि॥३९॥
सदैवहृदयेवासंकरोषित्वंसुलोचने ॥ एवमुक्त्वामहाबाहुःसीतांपीनपयोधराम् ॥ ४० ॥ दोर्भ्यांवक्षस्थलेकृत्वाह्यालिलिंगप्रियांनिजाम् ॥
पाणिनापाणिमादायह्याजगामनिजासनम् ॥ ४१ ॥ सीतयासहचासीनःपीठेमणिविचित्रिते ॥ ततस्तुसख्यस्ताःसर्वालेभिरेपरमां
मुदम् ॥ ४२ ॥ राघवेणसमाज्ञप्तानृत्यंचक्रुर्मनोहरम् ॥ मृदंगंवादयामासकाचित्परमसुंदरी ॥ ४३ ॥ वादयंत्यपरावीणांकांस्यवाद्यं
तथापरा ॥ वंशिकांतानपूरांश्चपणवंमुरजंमृदु ॥ ४४ ॥ गायंत्योभिनयंचक्रूरामस्याग्रेमनोहराः ॥ नानावेषधरास्तास्तुनृत्यमाना
कलंजगुः ॥४५ ॥ रा[illegible]ःपुत्रप्र[illegible]रामासुर्महिषींराघवस्यच ॥ शीधुंपपुःपुनःसर्वाक्रीडांचक्रुर्मनोहराम् ॥४६॥ रामोरमयतांश्रेष्ठोरमयामाससुं

दरीः ॥ हावभावैःस्वयतत्रैवतासांजग्राहमानसम् ॥ ४७ ॥भोजयामासताःसर्वाअन्नैर्नानाविधैरसैः ॥ क्रीडित्वासुचिरंतत्रसीतयासहवी
र्यवान् ॥ ४८ ॥ आनिनायपुनःसर्वाःस्वकीयेराजसद्मनि ॥ इदंतुचरितंरम्यंरामस्यपरमात्मनः ॥ ४९ ॥ श्रोतव्यंरासिकैःसर्वैर्भा
वुकैःप्रीतिपूर्वकम् ॥ श्रुत्वापापानिनश्यंतिरामेभक्तिःप्रजायते ॥ ५० ॥ यस्मैकस्मैनदातव्यंगोपनीयंप्रयत्नतः ॥ श्रद्धावतेचवक्त
व्यंरामभक्तायशौनक ॥ ५१ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादे उत्तरार्द्धेपंचविंशोऽध्यायः ॥ २५ ॥ ॥ सूत
उवाच ॥ ॥ कदाचित्पर्वतेरम्येनाम्नाशेषाचलाभिधे ॥ सीतयारमयासाकंजगामरघुनायकः ॥ १ ॥ कुल्यातुवर्ततेरम्यासमी
पेयत्तिलोत्तमा ॥ पूर्वभागेचपीठंतुनाम्नाविद्याभिधंमहत् ॥ २ ॥ दक्षिणेतुगणेशस्यकुंडंयत्रमनोहरम् ॥ निवासोयत्रशेषस्य
तस्मात्शेषाचलोभवत् ॥ ३ ॥ रामस्तुसीतयासार्द्धंविजहारसखीगणैः ॥ सखीभिःसहितासीतापत्यास्वात्मवशेनच ॥ ४ ॥
क्रीडांचकारसाबालापर्वतेसुमनोहरे ॥ नानावृक्षैःसमाकीर्णेनानापुष्पैःसुमंडिते ॥ ५ ॥ वर्षायांश्रावणेमासिरेमेसीताधवेनच ॥
मयूराःकोकिलायत्रचातकाःपक्षिणोपरे ॥ ६ ॥ कूजंतिशतशस्तत्रमंडूकाश्चपुनःपुनः ॥ समाकर्ण्यगिरस्तेषांघटाहृष्टामनोहराः ॥ ७ ॥
आंदोलनायरामस्यसीताचक्रेमनस्तदा ॥ रत्नैःसुरचितौस्तंभौरत्नवेदिपुरस्कृतौ ॥ ८ ॥ सुरत्नशिरसौतौचतत्रांदोलंविधायच ॥ सख्यो
निवेशयामासूरामचंद्रंमनोहरम् ॥ ९ ॥ तस्यैवांकेतथासीतांलज्जयासुस्मिताननाम् ॥ रामचंद्रंघनश्यामंसीतांविद्युल्लतोपमाम् ॥ १० ॥
आन्दोलयंतिसख्यस्तुप्रेम्णायुग्मंशनैः शनैः ॥ रागंहिंडोलकंनाममल्लारंचकलंजगुः ॥११ ॥ काश्चिन्नृत्यंतिरामाग्रेवादयंत्यस्तथापराः ॥
चामराणिप्रकुर्वाणाःरश्मीन्कर्षंतिचापराः ॥ १२ ॥ नागवल्लीदलंदिव्यंपूगीफलसमन्वितम् ॥ रामचंद्रायसीतायैददत्यस्ताःविजह्रिरे ॥

॥१३॥ जलंसौगंधिकंतास्तुववर्षुश्चतयोर्मुदा ॥ आंदोलेरेजतुस्तौचसीतारामौमनोहरौ ॥ १४ ॥ रक्तवस्त्रपरीधानौनानारत्नैःसुभूषितौ ॥
शीघ्रेचांदोलनेयातेभीतेवजनकात्मजा ॥ १५॥ सखेलंकंठमालिंग्यभर्तारंमुदमापसा ॥ उवाचसुस्मयंतीसामाशीघ्रंधूयतामिदम् ॥१६॥
तदारामःप्रसन्नात्माप्रियांचंद्रनिभाननाम् ॥ सूक्ष्मांकनकवर्णांगींपीनोन्नतपयोधराम् ॥ १७ ॥ कृत्वावक्षस्थलेश्यामामांदोलसुखमन्व
भूत् ॥ शीतामंदाःसुगंधाश्चवायवस्तंसिषेविरे ॥ १८ ॥जलविंदुकणान्मेघाःप्रकिंरतितदाप्रभुम् ॥ देवाःपुष्पाणिवर्षंतिससीतंराघवं
प्रति ॥ १९ ॥ आंदोलनसुखंकृत्वासखीभिः सीतयासह ॥ आंदोलनविमानात्तुप्रोत्तीर्यचतयासह ॥ २० ॥ पादुकांचसमारुह्यप्रियापा
णिंप्रगृह्यच ॥ पद्भ्यामेवमहाराजःप्रचचालनिकेतनम् ॥ २१ ॥ रामेच्छयातदावृष्टिर्नभूवमहतीपथि ॥ जलसिक्तास्तथाबालाःकौसुंभव
स्त्रधारकाः ॥ २२ ॥ च्योतंतिजलविंदूंश्चशाटिप्रांतैस्तथालकैः देहलग्नानिवस्त्राणिजलक्लिन्नानिरेजिरे ॥ २३ ॥ अधस्तस्थुश्चवृक्षाणांरम
ण्योयत्रतत्रच ॥ रामोपिसीतयासार्द्धंतथातस्थौस्मयन्प्रभुः ॥ २४ ॥ सीतामादायरामस्तूत्तरीयेणचछादताम् ॥ सुरंगशाठिकांबालां
प्रयांतींहस्तिनीमिव ॥ २५ ॥ गजराजगतिर्वीरोस्वयंकौसुंभकंचुकः ॥ तस्थतुस्तौचवृक्षस्यछायामाश्रित्यदंपती ॥ २६ ॥ जलक्लिन्नं
पतिंदृष्ट्वाशाटिप्रांतेनतन्मुखम् ॥ मार्जयंतीपतिंप्राहमयास्पृष्टौकपोलकौ ॥ २७ ॥ कुंडलंरचयामासपाणिनाचतथालकान् ॥ सु
स्मितारामचंद्रस्यमुकुटंप्रेक्षतीमुहुः ॥ २८ ॥ गंधर्वराजप्रतिममपांगैःपश्यतीमुहुः ॥ रामोपिकंचुकेनैवप्रियायावदनांबुजम् ॥ २९ ॥
पश्यंतीनांसखीनांतुममार्जप्रहसन्मुदा ॥ च्योतंतीजलविंदूंश्चमौक्तिकानीवनिर्मलान् ॥ ३० ॥ अलकैर्ऋजुतांप्राप्तैःस्रवद्भिःकुचकुं
भयोः ॥ ससूक्ष्मशाभिंजुःस्कग्नांदेहेव्यंजितभूषणा ॥ ३१ ॥ प्रियायाःसुषमांरामः पश्यन्नेवमुहुर्मुहुः ॥ चूडामणिंतथादिव्यंना

सायांमौक्तिकंतथा ।र्यरामा ॥ कर्णयोःकर्णपुष्पाणिरचयामासपाणिना ॥ जहसुस्तुतदासख्यस्तयोःप्रीतिंविलोक्यच ॥ ३३ ॥
परस्परंब्रुवंत्यश्चपश्यंत्यश्चपरस्परम् ॥ दांपत्यंनैवलोकेस्मिन्विद्यतेनैवलभ्यते ॥ ३४ ॥ अलौकिकंतुदांपत्यंविद्यतेरामसीतयोः ॥
एतस्मिन्नंतरेचैवजनन्याःप्रेषितारथाः ॥ ३५ ॥ षंढाअनेकशःप्राप्ताःप्रणिपत्यतुराघवम् ॥ रथेष्वारोपयामासुःसर्वास्ताश्चवराननाः ॥
॥ ३६ ॥ ससीतंराघवंस्थाप्यरथेमणिविचित्रिते ॥ आनिन्युस्तेचप्रासादंनानारत्नविचित्रितम् ॥ ३७ ॥ आधायशुभवस्त्राणिसर्वारेजुः
पुनस्तदा ॥ एतत्तुचरितंरम्यंसीताराघवयोःशुभम् ॥ ३८ ॥ नवदेयस्यकस्यापिह्यग्रेगोप्यंमनोहरम् ॥ प्रेम्णावैशृणुतेयस्तुतस्मैब्रूया
द्विचक्षणः ॥ ३९ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेषड्विंशोऽध्यायः ॥ २६ ॥ सूतउवाच ॥ एकादाकार्तिकेमासिदीपमालां
चराघवः ॥ तुलस्याःपूजनंलोकेस्थापयामासप्रेमतः ॥ १ ॥ द्यूतक्रीडांचकाराथसीतयाप्रिययासह ॥ जितस्तयातदारामःप्राहवाक्यं
मनोहरम् ॥२॥ श्रीरामउवाच ॥ त्वयाजितोह्यहंदेविकिंकरोमितवाधुना ॥ यत्त्वंचेच्छसिकल्याणितद्ददामिनसंशयः ॥ ३ ॥ सूतउवाच॥
इतिवाक्यंसमाकर्ण्यपत्युःसामृगलोचना ॥ उवाचवचनंसातुह्यपांगैःपश्यतीपतिम् ॥ ४ ॥ जानक्युवाच ॥ यदिदातुंतवेच्छास्तिमानसं
देहिमेप्रिय ॥ यथामेमानसंराजन्तथाहंत्वांरहःप्रभो ॥ ५ ॥ आलिंगनंकरिष्यामिचौष्ठौपास्यामितेप्रिय ॥ इतिश्रुत्वावचस्तस्यारामोराजी
वलोचनः ॥ ६ ॥ इदंशरीरंतेदेवियथेच्छसितथाकुरु ॥ गाढमालिंगनंभद्रेतुभ्यंदास्येरहःप्रिये ॥ ७ ॥ पुनर्द्यूतंतयाचक्रेजितारामेण
जानकी ॥ जानक्युवाच ॥ जिताहंचत्वयावीरतुभ्यंदास्यामिकिंवद ॥ ८ ॥ मह्यंब्रूहिमहाराजतन्मयाक्रियतेधुना ॥ दास्यहंतेसदास्वा
मिन्सेवकीतेपदाब्जयोः ॥ ९ ॥ तुभ्यंकिंकिंनदास्यामिमानसंतुसमर्पितम् ॥ आज्ञाकरींसदाराजन्विधेयांमामवेहिच ॥ १० ॥ प्रियावा

क्यंसमाकर्ण्यरामःप्राहवराननाम् ॥ एवमेवसदादेविकर्तव्यंचत्वयामयि ॥११॥सूतउवाच॥ अक्षैस्तुक्रीडनंकृत्वाप्रिययासहराघवः॥आरु
ह्यशिविकांरामस्तीर्थंगुप्तहरिंययौ ॥१२॥ कार्तिकेतीर्थराजोपिस्नातुमायातिनित्यशः ॥ कार्तिकंप्राप्यगर्जंतितीर्थानिसकलान्यपि ॥१३॥
॥ १३ ॥ देवंगुप्तहरिंदृष्ट्वापापंनश्यतितत्क्षणात् ॥ तस्मिन्क्षेत्रेमहादिव्येसीतयाचसखीगणैः ॥ १४ ॥ उवासतत्रधर्मात्माकल्पवासाचि
कीर्षया ॥ अयोध्यावासिनःसर्वैनरानार्यस्तुभूरिशः ॥ १५ ॥ रामदर्शनकामास्तुतथाजानपदाजनाः ॥ पटवेश्मानिशोभंतेशतशोथसह
स्रशः ॥ १६ ॥ आह्निकंकर्मकृत्वातुसर्वेपश्यंतिराघवम् ॥ फलंतुतीर्थयात्रायाइदमेवाहिमेनिरे ॥ १७ ॥ पौर्णमास्यांतदास्नात्वादत्वादा
नानिभूरिशः ॥ स्वर्गद्वारंपुनःप्राप्यस्नानंकृत्वातुसीतया ॥ १८ ॥ तदासीताददौदानंसखीभिःपरिवारिता ॥ सदाराःपूजिताविप्रानानाव
स्त्रैश्चभूषणैः ॥ १९ ॥ भोजिताःपरमान्नैश्चदक्षिणांचददौमुदा ॥ रामोपिविप्रवृंदेभ्योददौदानंपुनःपुनः ॥२० ॥ अश्वागजारथाश्चैवभूमिश्च
शिविकास्तथा ॥ रामेणभूरिशोदत्ताःप्रणताश्चैवभूसुराः ॥ २१ ॥ विधायचांजलिंरामोब्राह्मणानिदमब्रवीत् ॥ श्रीरामउवाच ॥ यूयंविष्णु
स्वरूपाश्च युष्माकंचैवपूजनात् ॥ २२ ॥ प्रीयतेलोकनाथस्तुरमाकांतोनसंशयः ॥ युष्माकंपूजनंयेतुकरिष्यंतिमहीतले ॥ २३ ॥ गमि
ष्यंतिपरंलोकंभुक्ताभोगांस्तुभूरिशः ॥ सूतउवाच ॥ वात्सल्यंवीक्ष्यतेविप्राराघवस्यतथाविधम् ॥ २४ ॥ ऊचुःप्रांजलयोभूत्वादत्वा
चाशिषमुत्तमाम् ॥ विप्राऊचुः ॥ भवान्नारायणोदेवःसीतालक्ष्मीर्नसंशयः ॥ २५ ॥ श्रेयसेसर्वलोकानामवतीर्णौस्वमायया ॥ युवयोःपू
जनंयेतुध्यानंवैकीर्तनंभजुः॥ २६ ॥ करिष्यंतिगमिष्यंतिपरलोकंपरंनराः ॥ कीर्तिर्वैपावनीलोकेभवताद्वैरघूत्तम ॥ २७॥ तदारामः

प्रसन्नात्मासीतयासहर्यरामान् ॥ पश्यतांसर्वलोकानांप्रणम्यद्विजपुंगवान् ॥ २८ ॥ आस्थायाशिबिकांरामःसीतापिशिबिकांस्वकाम् ॥
विवेशभवनंरम्यंभोगैःसर्वैरलंकृतम् ॥ २९ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेसप्तविंशोऽध्यायः ॥ २७ ॥ सूतउवाच ॥
एवंवैफाल्गुनेमासेराघवःसीतयासह ॥ चकारविविधांक्रीडांभाविकानांसुखप्रदाम् ॥ १ ॥ चरितानितुभूरीणिरामस्यपरमात्मनः ॥ नश
क्यतेमयावक्तुमपिजन्मशतैरपि ॥ २ ॥ शौनकउवाच ॥ ब्रूहिराजन्महाभागकृपांकृत्वाममोपरि ॥ फाल्गुनेचकथंरामोविजह्रेसीतया
सह ॥ ३ ॥ सूतउवाच ॥ जानकीफाल्गुनेमासिसखीःसर्वाजगादच ॥ अयंवैफाल्गुनोमासोहोलिकाक्रियतांमुदा ॥ ४ ॥ होलिकांकर्तुमु
द्युक्तावैदेह्यावचनेनतु ॥ गायंत्योनर्तनंचक्रुर्वाद्यंचक्रुर्मनोहरम् ॥ ५ ॥ हावभावप्रवीणास्तुसीताराघवयोःपुरः ॥ चिक्रीडुर्विविधांक्रीडां
तयोर्हास्यायचांगनाः ॥ ६ ॥ अरुणंचूर्णमादायविकिरंत्यःपरस्परम् ॥ दृतिभिःसिच्यमानास्तुरामेणापिवराननाः ॥ ७ ॥ सीताकनक
शृंगेणराघवंसिषिचेमुदा ॥ रंगकुंडेचरामेणसवस्त्रास्नापितामुदा ॥ ८ ॥रामंचापिसमानीयप्रसह्यरंगकुंडके॥ पातयित्वास्वयंसीताचिक्रीडे
पतिनामुदा ॥ ९ ॥ सुशोणकंचुकोरामउष्णीषेणसहाभवत् ॥ औदंचनात्तरंगस्यबहिर्निर्गत्यतास्थिवान् ॥ १० ॥ तदासखीभिरालिप्त
चूर्णरक्तैःसमंततः ॥ कज्जलंनेत्रयुग्मेचकर्तुकामाउपस्थिताः ॥ ११ ॥ निरंजनंचमेनामसांजनंतद्भविष्यति ॥ विचार्यमनसाह्येवंगमनाय
मनोदधौ ॥ १२ ॥ अंजनेनह्यनेनैवमंथरावदनंमया ॥ कर्तव्यंकलुषंलोकेहास्यायकिलयोषिताम् ॥ १३ ॥ तदापलायितोरामःप्रहसन्नृप
नंदनः ॥ जानकीप्रेरयामासह्यपांगैश्चसखीगणम् ॥१४॥ स्वयंजगामयाबालावेगेनापिसखीगणैः ॥ आधावद्रामचंद्रोपिकैकय्याःसदनंप्रति
॥१५॥ गुप्तोबभूवकैकय्या मंदिरेरघुनायकः ॥ प्रेम्णाजुगोपकैकेयीरामंशशिनिभाननम् ॥१६॥आगतायांतुसीतायांसखीनांचगणैःसह॥

मंथराकथयामासताभ्योरामंचगोपितम् ॥१७॥ अत्रैवभवनेरामोगुप्तोभूत्वाहिवर्तते ॥ तदातुकैकयीराज्ञीरुष्टावैमंथरांप्रति॥१८॥ स्वयं
निर्भर्त्सयामासमंथरांचैवसूचिकाम् ॥ उवाचसस्मितासीतांस्वयंदेवीतुकैकयी ॥१९॥ रंगेणक्रियतामस्याःसीतेकमललोचने ॥ वस्त्राणिब
हुमूल्यानिक्लिन्नानिकर्तुमर्हथ ॥२०॥ सूतउवाच ॥ इतिश्रुत्वावचस्तस्याःसीतायाश्चसखीगणाः॥ रंगैर्नानाविधैस्तांतुस्नापयांचक्रिरेमुदा॥
॥ २१ ॥ कज्जलंयत्तुरामस्यनेत्रेकर्तुंसमुद्यताः ॥ तत्तुतस्याःकपोलेतुचक्रुःसर्वैसखीगणाः ॥ २२ ॥ सुभगादर्शयामासमुकुरंतर्जनीगतम्॥
दृष्ट्वातुवदनंस्वस्यमंथरालज्जिताभवत् ॥२३॥ पलायनपराजातागुप्तातिष्ठतिमंदिरे ॥ एतस्मिन्नंतरेरामःकैकयीभवनात्प्रभुः ॥२४॥ निर्ग
त्यसहसास्वस्यजनन्याभवनंययौ ॥ कर्षन्मनांसिसर्वासांसुस्मितेनरमापतिः॥२५॥कंचुकादुत्तरीयाच्चक्षरन्बिंदूंश्चरंगजान् ॥ पर्यंकेजननीं
दृष्ट्वातस्याश्चांकेपपातच ॥ २६ ॥ प्रहसन्नम्बअंबेतित्रिवर्षइवबालकः ॥ मातातुवदनंतस्यमार्जतीस्वेनपाणिना ॥२७॥ ददर्शजानकींप्रा
प्तांसखीभिस्तुसशृंगिणीम् ॥ श्वश्रूंदृष्ट्वातदासीतालज्जितावाङ्मुखीह्रिया॥२८॥बभूवचासितापांगीनिवार्यतुसखीगणम्॥ तत्तुकनकशृंगंच
सुभगायैददौजवात् ॥२९॥ सीताश्वश्रूमुवाचाथश्रूयतांदेविमेवचः ॥ पुत्रस्त्वदीयोमांरङ्गैक्लिन्नांकृत्वापलायितः ॥३०॥ इदानींतवचांके
तुसाधुवत्तुविराजते ॥ सिक्तामेकंचुकीशृंगैर्वस्त्राणिचमुहुर्मुहुः ॥ ३१ ॥ तथाममवयस्याश्चरक्तचूर्णैनरंजिताः ॥ इतिवाक्यंतदातस्याः
श्रुत्वाचेवंजगादसा ॥ ३२ ॥ कौशल्योवाच ॥ सोपालंभमिदंवाक्यंनवक्तव्यंममाग्रतः ॥ भवतीनांभयाद्वीरोममांकेचसमागतः ॥ ३३ ॥
अयंवैफाल्गुनोमासःक्रीडावैजायतेबहु ॥ गृह्यतांपूजनंसीतेमत्पुत्रात्तुयथेप्सितम् ॥ ३४ ॥ इत्युक्त्वाबहुवस्त्राणिरत्नानिभूषणानिच ॥
कौशल्याप्रददौताभ्यःशृण्वंतीत्यैस्मितानना ॥ ३५ ॥ तदातुजानकींदेवीपाणिनापाणिमग्रहीत् ॥ रामंकमलपत्राक्षंवचनंचेदमब्रवीत् ॥

॥ ३६ ॥ गम्यतांप्रियेमेधेतेमंदिरेमेमयासह ॥ तदारामःसमुत्थायमात्राज्ञप्तोययैमुदा ॥ ३७ ॥ प्रहसन्प्रिययासाकंसखीभिःपरिवारितः
विजह्रेतत्रचागत्यरामोरमयतांवरः ॥ ३८ ॥ इत्थंतुसुतरांरामश्चिक्रीडेनिजवेश्मनि ॥ इदंतुचरितंरम्यंफाल्गुनेतुप्रकीर्तितम् ॥ ३९ ॥
यस्मैकस्मैनदातव्यंगोपनीयंप्रयत्नतः ॥ श्रुत्वानसहतेयस्तुरामंनिंदतियोनरः ४० ॥ नश्रावयेत्कदाचित्तुतस्मैदुष्टायवाचकः ॥ पुस्तकं
दर्शयेन्नैवब्रूयाच्छ्रद्धावतेस्वयम् ॥ ४१ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेअष्टाविंशोऽध्यायः ॥ २८ ॥ सूतउवाच ॥
ज्येष्ठमासिसितेपक्षेदशमीयातिथिर्भवेत् ॥ दशाहराचसाज्ञेयादशपापानिहंतिया ॥ १ ॥ ग्रीष्मोनामऋतुश्चैवतस्मिन्रामोमनोदधौ ॥
विहारायसरय्वाश्चजलेपोतेनसीतया ॥ २ ॥ गच्छसीतेमयासार्द्धंसखीभिःपरिवारिता ॥ विहारंतुकरिष्यामिसरय्वानिर्मलेजले ॥ ३ ॥
इत्युक्त्वाराघवःश्रीमान्जनानाज्ञापयंस्तदा ॥ स्थाप्यतांसरयूतीरेप्रतिसीरास्तुभूरिशः ॥ ४ ॥ आज्ञयारामचंद्रस्यतिरस्कारिण्यउत्तमाः
॥ शिबिकांतुतदारुह्यसीतयाचसखीगणैः ॥ ५ ॥ गच्छन्ददर्शरामोथसीतांचैवसखीगणान् ॥ शाटीप्रांतंतुमुक्तानांमालयाचविनिर्मितम्
॥ ६ ॥ उत्तरीयंतथातासांजानक्याश्चैवशोभितम् ॥ निश्वासवातहार्य्यंचददर्शपथिराघवः ॥ ७ ॥ दीर्घिकानांयदंभस्तुनीचैःसोपानतोययौ॥
शोभंतेतत्रपद्मानिनालैरुच्चैर्यतस्ततः॥८॥नितंवद्वयसंजातंज्येष्ठेमासिसुशोभने॥मल्लिकानांचपुष्पेषुकुड्मलेषुयतस्ततः ॥
॥ ९ ॥ भ्रमरोगायमानोहितत्रतत्रमदंदधत् ॥ गणनामिवपुष्पाणांकुर्वन्यातियतस्ततः ॥ १० ॥ प्रयांतीनांचबालानांमुखेस्वेदोबभूवह॥
शिरीषकुसुमंतेनगंडलग्नेनचापतत् ॥ ११ ॥ कर्णादपिच्युतंतासांभुवंरामोऽव्यलोकयत् ॥ ताभिःसाकंमहाराजोजगामसरयूनदीम् ॥
॥ १२ ॥ अप्सरोभिर्यथादेवःस्वर्णदीमिवदेवराट् ॥ दुर्गात्पूर्वेदिशाभागेसरयूर्यत्रराजते ॥१३॥ ऊर्मिभीरत्नसोपानैर्हंसैःपुष्पैःसुशोभनैः ॥

सीतासखस्यरामस्यवनिताभिर्युतस्यच ॥ १४ ॥ तस्यास्तीर्थेविहर्तुंचमानसंचबभूवह ॥ उत्तीर्यशिबिकाभ्यस्तुरामः सीतासखीगणैः ॥
॥ १५ ॥ सोपानेषुददूरंघ्रीन्नूपुरैर्हंसकैर्युतान् ॥ तेषांरवेणतेहंसाविविग्नाःसहसाभवन् ॥ १६ ॥ सोपानेभ्यस्तदासर्वास्ताःस्त्रियश्चजले
विशन् ॥ सरय्वाश्चजलंशुद्धंतिमिनक्रैर्विवर्जितम् ॥ १७ ॥ रामस्यचाज्ञयाकृष्टाःशणसूत्रेणधीवरैः ॥ नारीनितंबद्वयसंजलंनद्याबभूवह ॥
॥ १८ ॥ पोतेस्थितस्तदारामःपार्श्वस्थांचैवजानकीम्॥ उपातजामरांतांतुवभाषेराघवःप्रियाम् ॥ १९ ॥ श्रीरामउवाच ॥ यस्यसीतेप्र
कुर्वंतिसेचनंतुसखीगणाः ॥ आसांचैवांगरागेणराजतेसरयूर्नदी॥२०॥आसांयदंजनंधौतंजलेनतुपुनःपुनः॥तदंजनंतुनौकाभिर्वारिणाध्रियते
मुहुः ॥ २१॥ जलरागंतुकुर्वंतिनयनेषुसखीगणाः ॥ पंकजानिविराजंतेनेत्राणिविकचानिच ॥२२॥ पयोधरगुरुत्वाच्चनितंबस्यचगौरवात् ॥
जलेशक्तानतर्तुंवैकेयूरैर्वद्धवाहुभिः ॥ २३ ॥ क्लेशोन्तरंप्लवंतिस्मअमीतवसखीजनाः ॥ अवतंसाःशिरीषाणांशिरोभ्यःपतिताजले
॥ २४ ॥ निम्नगायाःप्रवाहेतुयान्तिपारीप्लुवाहिते ॥ मुक्तातुल्यंयदंभस्तुयोषितांस्तनमंडले ॥ २५ ॥ मालेवराजतेतत्तुमुक्तानामिव
निर्मिता ॥ जलावर्तस्यनाभिस्तुकुचौवैचक्रवाकयोः ॥ २६ ॥ विलासिन्यस्तुतेसीतेतुल्यांशोभांप्रपेदिरे ॥ तीरस्थिताःप्रगायं
तिवह्योह्येतावरांगनाः ॥ २७ ॥ मृदंगजलवाद्यंतुकर्णेप्राप्तंमनोहरम् ॥ कौशेयंरक्तवस्त्रंतुजलार्द्रंतच्चराजते ॥ २८ ॥ नितं
वेष्ववलानांतुवद्धंरशनयाचयत् ॥ जलसंगाच्चवस्त्रस्यभजंत्यामौनमेवच ॥ २९ ॥ सखीभिर्वदनेसिक्ताअलकाआर्द्रतांगताः ॥
च्योतंतिजलबिंदूंश्चकपोलोपरिलंबिताः ॥ ३० ॥ आसांवेण्योविराजंतेजलेनैवविधूनिताः ॥नागाइवविशोभंतेपृष्ठभागेयतस्ततः ॥३१॥
जलार्द्राअपिशोभांत[illegible]र्वावरांगनाः ॥ सूतउवाच ॥ तासांविहारंसंवीक्ष्यस्पृहयामासजानकी ॥ ३२ ॥ सीतयाप्रार्थितोरामोनौविमा

नात्तयासह ॥ जलेवतीमेधेते:भीरेमेरामोमनोरमः ॥ ३३ ॥ स्कंधेविलोलमालस्तुयथारत्यामनोभवः ॥ यथावन्यगजेंद्रस्तुगजीभिस्तु
नदीजले ॥ ३४ ॥ नराधिपेनताः सर्वाविरेजुश्च शुभाननाः ॥ इंद्रनीलमणिश्यामंरामंताः पंकजेक्षणम् ॥ ३५ ॥ हतिभिश्चापिस्वर्णा
नांस्वर्णाग्यःसिषिचुःस्मतम् ॥ ताभिः सार्द्धमहाराजोगंगायांसुरराडिव ॥ ३६ ॥ अप्सरोभिश्चशच्याचरराजरघुनंदनः ॥ एवंकृत्वाविहा
रंतुनद्याःकूलेचराघवः ॥ ३७ ॥ स्थित्वाविलोकयामासानिः सरंतींचजानकीम् ॥ समुद्रमथनेपूर्वसखीभिःकमलामिव ॥३८॥ आगच्छं
तींजलात्कूलमार्द्रवस्त्रांह्रियानताम् ॥ पीनस्तनद्वयांसाध्वीमलकैश्चापिसिंचतीम् ॥३९॥ एवंदृष्ट्वापियांरामःपाणिनापाणिमग्रहीत् ॥ पट
वेश्मतदारामोजगामप्रिययासह ॥ ४० ॥ रामःसीतातथाचाल्योवेषंकृत्वामनोहरम् ॥ दत्वादानानिविप्रेभ्योयानान्यारुरुहुःपुनः ॥४१॥
रामःसीतामुपादायविवेशनिजमंदिरम् ॥ ४२ ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेएकोनत्रिंशोऽध्यायः ॥ २९ ॥
सूतउवाच ॥ एवंरामोरमानाथोविजहारसदैवहि ॥ मातरंपितरंभ्रातॄन्पौरान्भृत्यान्सर्वांस्तथा ॥ १ ॥ प्रीणयामासतान्रामोविनो
दैर्मंगलप्रदैः ॥ साकेतनगरंरम्यंनानारत्नैर्विराजितम् ॥ २ ॥ सत्याचविमलाचैवपुरीचाद्याप्रकीर्तिता ॥ अयोध्यानामविख्यातावेदेलोके
तथैवच ॥ ३ ॥ तत्रराजगृहेरम्येनानारत्नैर्विभूषिते ॥ अयोध्यानगरेरम्येरत्नमंडपशोभिते ॥ ४ ॥ अनेकरत्नसंकीर्णेज्वलनार्कसमप्रभे ॥
आवासैरुत्तमैर्युक्तेदिव्यप्राकारतोरणे ॥ ५ ॥ सुवर्णदुर्गसंयुक्तेरौप्यताम्रककोष्ठके ॥ परिखामारकूटेचहर्म्यस्वर्णविराजते ॥ ६ ॥ प्रा
कारोपवनाट्टालपरिखारत्नतोरणे ॥ अनेकगृहसंयुक्तेरचितेविश्वकर्मणा ॥ ७ ॥ स्वर्णरौप्यायसैःशृंगैःसंकुलेसर्वतोगृहैः ॥ नीलस्फटिक
वैडूर्यमुक्तामरकततोरणैः ॥ ८ ॥ कृतहर्म्यस्थलेरम्येसर्वदेवनमस्कृते ॥ सरयूतीरमासाद्यदिव्येपरमशोभिते ॥ ९ ॥ हस्त्यश्वरथपत्या

द्यैर्नानाभृत्यैर्विराजिते ॥ प्राकारैश्चप्रतोलीभिस्तोरणैःकांचनैःशुभैः ॥ १० ॥ स्वरूपवेषैः सर्वत्रसुविभक्तचतुष्पथे ॥ अनेकभूमिप्रासादे
वहुभांडसुविक्रमे ॥ ११ ॥ पद्मोत्पलसुयुक्ताभिर्वापीभिरुपशोभिते ॥ देवतायतनैर्दिव्यैर्वेदघोषैश्चशोभिते ॥ १२ ॥ वीणावेणुमृदंगाद्यैः
शब्दैरुत्कृष्टकैर्युते ॥ शालैस्तालैर्नारिकेलैःपनसैराम्लकैस्तथा ॥ १३ ॥ तथैवाम्रकपित्थाद्यैरशोकैरुपशोभिते ॥ आरामैर्विविधैर्युक्तेसर्व
र्तुफलपादपैः ॥ १४ ॥ मालतीजातिवकुलपाटलानागचंपकैः ॥ करवीरैःकर्णकारैःकेतकीभिरलंकृते ॥ १५ ॥ निंवजंभीरकदलीमातु
लिंगमहाफलैः ॥ लसच्चंदनगंधाढ्यैर्नागरैरुपशोभिते ॥ १६ ॥ देवतुल्यप्रभायुक्तैःक्षत्रियैश्चसुशोभिते ॥ सुरूपाभिर्वरस्त्रीभिर्देवस्त्रीभिरि
वावृते ॥ १७ ॥ श्रेष्ठैःसत्कविभिर्युक्तेबृहस्पतिसमैर्द्विजैः ॥ वणिग्जनैस्तथापौरैःकल्पवृक्षैरिवावृते ॥ १८ ॥ अश्वैरुच्चैःश्रवःप्रख्यैर्दंति
भिर्दिग्गजैर्युते ॥ तस्मिन्राजगृहेरम्ये नानारत्नैर्विभूषिते ॥ १९ ॥ अंतःपुरेसदारामोराजतेसीतयासह ॥ सिंहासनेमहादिव्येनानारत्नैर्वि
राजिते ॥ २० वामेसीतांसमालंब्यराजंतंरघुनंदनम् ॥ सीतासंलापचतुरंभक्ताभीष्टप्रदंसदा ॥ २१ ॥ सखीगणैस्तथासद्भिःकिंकरैश्चसुसे
वितम् ॥ पूरयंतंसदाकामान्सेवकानांमुहुर्मुहुः ॥ २२ ॥ एवंध्यायेत्सदारामंजानकीपतिमव्ययम् ॥ रमंतेयोगिनोयस्मिन्सत्यानंदेचिदा
त्मनि ॥ २३ ॥ इतिरामपदेनासौपरब्रह्माभिधीयते ॥ रामोमातापितारामोभ्रातारामःसुहृत्सखा ॥ २४ ॥ स्वामीरामोमहाराजोरामचंद्रः
सदावतु ॥ इदंतुचरितंरम्यंसीताराघवयोःशुभम् ॥२५॥ श्रुत्वाव्यासान्मयातुभ्यंशौनकेदंप्रकीर्तितम् ॥ धन्यंयशस्यमायुष्यंपुण्यंवंशवि
र्द्धनम् ॥ २६ सदैवशृण्वतांलोकेमंगलप्रदमुत्तमम् ॥ चतुर्वर्गप्रदंह्येतच्छ्रोतॄणांमोदकारकम् ॥ २७ ॥ यश्चैतच्छृणुयाद्वापिवाचयेद्वास

माहितः ॥ उभौतौसुखमेधेतेव्यासवाक्यमिदंशुभम् ॥ २८ ॥ वाचकस्ययथाशक्तिपूजांकुर्यान्महामनाः ॥ मंगलानिप्रजाभ्यस्तुनृपेभ्यस्तुसदैवहि ॥ २९ साधुगोविप्रभूमिभ्यःश्रीशोदिशतुमंगलम् ॥ ३० ॥ इतिश्रीसत्योपाख्यानेसूतशौनकसंवादेउत्तरार्द्धेत्रिंशोऽध्यायः ॥ ३० ॥ इतिसत्योपाख्यनंसमाप्तम् ॥ श्रीसीतारामचंद्रार्पणमस्तु ॥ श्रीरस्तु ॥ शुभंभवतु ॥ ॥ छ ॥ ॥ छ ॥

इदं पुस्तकं मुंबय्याख्यराजधान्यां खेमराज श्रीकृष्णदास इत्यनेन स्वकीये-
“श्रीवेङ्कटेश्वराख्य” मुद्रणालये मुद्रितम् । संवत् १९५४, शकाब्दाः १८१९.

विक्रय्यपुस्तकोंकी-संक्षिप्त-सूची ।

नाम.	की. रु. आ.
संस्कारभास्कर(यजुर्वेदी सब संस्कारोंकी विधि प्रयोग और मंत्र सहित) ...	२-१२
जन्मदिनपूजापद्धति.	०-२
गोदानपद्धति	०-१॥
पूजापंकजभास्कर	२-०
सकाम शिवपूजनविधान भाषाटीका...	०-४
स्वस्तिवाचन (पुण्याहवाचन) ...	०-१॥

नाम.	की. रु. आ.
दशकर्मपद्धति.	०--७
वासिष्ठीहवनपद्धति	०-४
लंबोदरीहवनपद्धति	०-४
एकोद्दिष्टश्राद्धप्रयोग	०-२
पार्वणश्राद्धप्रयोग	०-२
उपाकर्मपद्धति(श्रावणीयजुर्वेदकी) ...	०--१२
कर्मविपाकचरणगत रफ़् १० आना ग्लेज	०-१२

नाम.	की. रु. आ.
कर्मविपाक भाषाटीका	१-४
वेदोक्तवास्तुपद्धति.	०-६
व्रतोद्यापनकौमुदी.	०-१२

व्याकरण ग्रन्थाः ।

सिद्धांतकौमुदी अष्टाध्यायी, गणपा०, धातुपा० लिंगानुशासनपा० और सूत्रसूचीस० अक्षर मोटा ..	४-०
सिद्धांतकौमुदी अतिउत्तम और	

नाम.	की. रु. आ.
बारीकटैप	२—०
अष्टाध्यायी, गणपाठ, धातुपाठ, लिंगानुशासन.	०—१२
लघुसिद्धांतकौमुदीटिप्पणसहितजिल्द मोटा अक्षर	०—१२
लघुसिद्धांतकौमुदी टिप्पणस॰ ग्लेज छोटी	०—४
लघुकौमुदी उदाहरण, स्पष्टीकरण, नियमाङ्क योजना भाषाटीका समेत	२—८
लघुभाष्य छपता है	०—०

नाम.	की. रु. आ.
कारकस्वरूप भाषाटीका सहित (व्याकरण)	०—६
सिद्धांतकौमुदी तत्त्वबोधिनीटीका सहित संपूर्ण	६—०
कलिविडंबन भाषाटीकासह	०—४
सौन्दर्यलहरी सटिप्पण	०—३
कटाक्षशतकम् सटिप्पण	०—३
भावशतकम् सटिप्पण	०—३
आर्यशतकम् सटिप्पण	०—२
कामाक्षिस्तुतिशतकम् सटिप्पण	०—३
अंबाष्टकम् सटिप्पण	०—१॥

नाम.	की. रु. आ.
प्रशस्तिकाशिका	०—३
भक्तिरत्नावली	०—४
घटकर्परकाव्य सटीक	०—२

काव्यग्रंथाः ।

गीतगोविंदमूल	०—३
गीतगोविंद राधाविनोद सहित संस्कृतटीका और भाषाटीका	१—०
भामिनीविलासमूल	०—४
भामिनीविलास महावीरप्रसादकृत भा.टी.	१—०

नाम.	की. रु. आ.
माघकाव्य (शिशुपालवध) सटीक संपूर्ण	२–८
भर्तृहरिशतकत्रयसंस्कृतटीका और भाषा टीका ग्लेजकागज	१–०
अमरुशतक (शृंगार और वेदान्तपर दोटीकासह)	०–१०
भोजप्रबंध मूल (राजनीति)	०–७
रसिकप्रियाकविवरकेशवदासकृत (नायकाभेद)	०--१२
रामचंद्रिका सटीक कविकेशवदास प्रणीत	२--०
विज्ञानगीता केशवदासकृत (वेदान्त)	०--८
काव्यनिर्णयभाषा छन्दवद्ध [भिखारी दासकृत] मनहरण छन्दोंमें कठिन (नायका भेद) वर्णन	१–०
जगद्विनोद [पद्माकरकृत नायकाभेद]	०--८
रसराज [मतिरामकृत नायकाभेद]	०–६
ब्रजविलास बड़ा मोटेअक्षरकाटिप्पणी सहित	४--०

अनुष्ठानमंत्रशास्त्र स्तोत्रपाठग्रंथाः ।

नाम.	की. रु. आ.
शाक्तप्रमोददशमहाविद्या और पांचों देवतोंका पंचांग द्वादशांग सहित इसमें १८४ विषयहैं शाक्त लोगोंको अवश्य लेना चाहिये	५--०
नित्यतंत्रभाषाटीका (नैमित्तिक कर्मोंमें उपयोगी)	०-१२
मंत्रमहोदधि सटीक सटिप्पण मातृका कोष तथा अनुष्ठानिकयंत्रों समेत	३--४
महानिर्वाणतंत्रम् भाषाटीका समेतम् चौंसठ तंत्रोंमें सर्वतंत्रोत्तमोत्तम है	२--०

नाम	की. रु. आ.
माहेश्वरीतंत्र भाषाटीका (मारण मोहन वशीकरण उच्चाटनादि विधि) वर्णितहै	०-४
कामशास्त्र भाषाटीका छपताहै	१-०
इन्द्रजाल (संस्कृत और भाषा मंत्र तंत्र मारण मोहन उच्चाटन वशीकरण प्रयोग और वैद्यक तथा समस्त कार्योंके सिद्ध करनेवाले १२८ यंत्रों समेत	०-१२
दुर्गासप्तशती शान्तवीटीकासहित	१-४
दुर्गासप्तशती भट्टनागोजीकृतटीकासहित	१-०
दुर्गासप्तशती भाषाटीका शान्तनवी टीकाके	

नाम.	की. रु. आ.
अनुकूल	१-०
तथा रफ़कागज	०-१२
दुर्गासप्तशती मोटे अक्षर टाईप खुली संची	१-०
दुर्गासप्तशती ७ पंक्तिवाली बड़ा अक्षर खुला पत्रा	०-१२
दुर्गासप्तशती ७ पंक्तिकी जिल्दबंधी	१-०
दुर्गासप्तशती ९ पंक्ति वाली मध्यम अक्षर टाईप खुला पत्रा	१-८
दुर्गासप्तशती९पंक्तिवाली बंधेली रेशमी	०-१२

नाम.	की. रु. आ.
दुर्गासप्तशती ३२ पेजी गुटका	०-१०
तथा खुला पत्रा	०-७
दुर्गासप्तशती छोटा गुटका बारीक	०-६
बृहत्स्तोत्ररत्नाकर स्तोत्र संख्या १४४	१-०
" छोटा अक्षर गुटका	०-१०
स्तोत्ररत्नाकर भाग दूसरा छपताहै	१-०
प्रत्यङ्गिरापंचांग	०-८
वेंकटेशसहस्रनाम सटीक	१:८
वेंकटेशसहस्रनाम मोटा	०-४

नाम.	की. रु. आ.	नाम.	की. रु. आ.	नाम.	की. रु. आ.
राधाकृष्णभूषण	०-३	आदित्यहृदयबड़ा	०-३	देवीसहस्रनामावली	०-१॥
कालिकासहस्रनाम	०-४	आदित्यहृदय छोटा अक्षर	०-१॥	वेंकटेसहस्रनामावली	०-१॥
गायत्रीपुरश्चरण	०-२	पुरुषोत्तमसहस्रनाम	०-१॥	सूर्यसहस्रनामावली	०-१॥
गायत्रीपंचांग	०-१२	विष्णुसहस्रनामावली	०-१॥	गोपालसहस्रनामावली	०-३
लक्ष्मीनारायणहृदय	०-४	शिवसहस्रनामावली	०-१॥	गंगालहरी मूल	०-१॥
लक्ष्मीस्तोत्र	०-२	गणेशसहस्रनामावली	०-१॥	विष्णुसहस्रनामबड़ेअरका खुला	०-४

निवे

पुस्तक मिलनेका ठिकाना-खेमराज श्रीकृष्णदास, “श्रीवेंकटेश्वर” छापाखाना-मुंबई.

न

पुराण-इतिहासग्रंथाः।

नाम.	की० रु०आ०
श्रीमहाभारत सटीक अतिउत्तम बडे अक्षरका मजबूत कागज गणपतकृ० छापेका अनुक्रमणिका सहित	५०-०
ब्रह्मवैवर्तपुराण संपूर्ण चारौखण्ड	७-८
पद्मपुराण सम्पूर्ण ५५००० ग्रंथ बहुतपुस्तकोंके द्वारा शुद्ध होकर छपा तयार है	१८-०
हरिवंशपुराण सटीक	४-०
श्रीवाल्मीकिरामायण संस्कृत मूळ और अत्युत्तम भाषाटीका माहात्म्य और अनुक्रमणिका सहित मोटा कागज सुंदर अक्षर	२१-०
श्रीमद्वाल्मीकीयरामायण तनिश्लोकी रामानुजी भूषण टीकासहित संस्कृत	२५-०
वाल्मीकीयरामायण सटीक मध्यम अक्षर	८-०
श्रीमद्भागवत श्रीधरीटीका और टिप्पणीसह परमोत्तम ग्लेज कागज	१०-०
श्रीमद्भागवत श्रीधरीटीका और टिप्णीसहित रफ् कागज	९-०

नाम	की० रु० आ०
श्रीमद्भागवतसचूर्णिकामोटेअक्षर उत्तम कागजकी (सप्ताहबांचनेमेंपरमोपयोगी)	८-०
मार्कण्डेयपुराण सप्तशती शान्तनवीटीकास.	५-०
अध्यात्मरामायण सटीक चिकना कागज	३-०
अध्यात्मरामायण भाषाटीकासहित	४-०
गर्गसंहिता उग्रसेनकृताश्वमेधादि १० खंड और माहात्म्य सहित सम्पूर्ण	४-०
वायुपुराण (श्रीमद्वेदव्यासप्रणीत)	५-०
भागवत दशमस्कंध भाषाटीका दृष्टान्त सह	४-०
श्रीमद्भागवताद्यपद्यव्याख्याशतक (जन्माद्यस्य श्लोकके सौ अर्थ)	२-०
भागवतलीलाकल्पद्रुम (श्रीमद्भागवतके सब चरित्र जन्माद्यस्य इस श्लोकमें)	१-८
सांबपुराण (सूर्यमहिमा वर्णन)	२-०
मत्स्यपुराण (श्रीमद्वेदव्यासप्रणीत)	५-०

पुस्तक मिलनेका ठिकाना- खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" छापाखाना, खेतवाड़ी-(मुंबई.)

इति सत्योपाख्यानं समाप्तम् ।